(२) उद्धत श्चासौ आजिश्च—उद्धताजिः, ( वि. पू. क. ) नवः रागः यस्य तद्—नवरागम् , ( स.ब.व्री. ) नवरागं च तद् मनश्च—नवरागमनः, ( वि. पू. क. ) उद्धताजौ नवरागमनः—उद्धताजिनवरागमनः, (स.त.पु.) उद्धताजिनवरागमनसि भवा — उद्धताजिनवरागमनोभवा, ( स. त. पु. ) उद्धताजिनवरागमनोभवा चासौ माया च—उद्धताजिनवरागमनोभवमाया, (वि.पू.क.) शेष पूर्ववत्—(३) उद्धतम्—अजिनं येन सः उद्धताजिनः, (स.ब.व्री.) न गच्छति—अगः, (उप.त.पु.) वरः अगः—वरागः, (वि.पू.क.) वरागे मनः यस्य सः—वरागमनाः, ( व्यधि. ब. व्री. ) वरागमनाश्चासौ भवश्च—वरागमनोभवः, ( वि. पू. क. ) उद्धताजिनश्चासौ वरागमनोभवश्च—उद्धताजिनवरागमनोभवः, (वि.पू.क.) उद्धताजिनवरागमनोभवस्य माया—उद्धताजिनवरागमनोभवमाया, ( ष. त. पु. ) शेष पूर्ववत् .

**विशिखशङ्कुजुषा धनुषाऽस्तसत्—**
**सुरभिया ततनुन्नमहारिणा ।**
**परिगतां विशदामिह रोहिणीं,**
**सुरभियाततनुं नम हारिणा ॥१॥ ॥१६॥**

अन्वय—इह विशिखशङ्कुजुषा अस्तसत्सुरभिया ततनुन्नमहारिणा हारिणा धनुषा परिगतां विशदां सुरभियाततनुं रोहिणीं नम ।

**અર્થ**—આ લોકને વિષે બાણ અને શંખથી યુક્ત, નાશ કરાયો છે ઉત્તમ દેવોનો ભય જેના વડે તેવા, વિસ્તાર પામેલા એવા નિર્મૂલન કરાયા છે મહાન્ શત્રુઓ જેના વડે એવા, સુંદર ધનુષ્યથી યુક્ત, નિર્મલ, કામધેનુ ઉપર બેઠેલા શરીરવાળી, એવી રોહિણીદેવીને તું નમસ્કાર કર....

**समास**—

**विशिखशङ्खजुषा**—विशिखश्च शङ्खश्च–विशिखशङ्खौ, (इ. द्व.) विशिखशङ्खौ जुषते इति–विशिखशङ्खजुट्, तेन–विशिखशङ्खजुषा । 'क्विप्' ५।१।१४८.....क्विप्, (उप.त.पु.) ।

**अस्तसत्सुरभिया**—सन्तश्चामी. सुराश्च–सत्सुराः, 'सन्महत्०' ३।१।१०७ (वि.पू.क.) सत्सुरेभ्यः भियः–सत्सुरभियः, (पं.त.पु.) अस्ताः सत्सुरभियः येन तद्–अस्तसत्सुरभि, तेन–अस्तसत्सुरभिया। (स. ब. व्री.)

**ततनुन्नमहारिणा**—ताताश्चामी नुन्नाश्च–ततनुन्नाः, (वि.उभ.क.) महान्तश्चामी अरयश्च–महारयः, 'सन्महत्.' ३।१।१०७ (वि.पू.क.) ततनुन्नाः महारयः येन तद्–ततनुन्नमहारि, तेन–ततनुन्नमहारिणा । (स.ब.व्री.)

---

નોંધ-'**अस्तसत्सुरभिया**-' આ પ્રયોગ શ્રી સિદ્ધહેમશબ્દાનુશાસન (વ્યાકરણ)ની દૃષ્ટિએ આ પ્રમાણે સિદ્ધ થશે. '**अस्तसत्सुरभिया**' એ સમસ્તપદ '**धनुषा**'નું વિશેષણ હોવાથી વિશેષ્યનાં વશથી નપું. માં વર્તે છે.

**अस्ताः सत्सुरभियः येन तद्**-'**अस्तसत्सुरभि**'....'**क्लीबे**' २।४।९७ સૂત્રથી નપું. માં વર્તતા સમાસાન્ત નામનો અન્ત્ય સ્વર હ્રસ્વ થાય... હવે તૃ. એ. વ. નો **आ (टा)** પ્રત્યય લગાડીએ ત્યારે '**अनाम् स्वरे**' १।४।६४થી **न्** આગમ થતાં (**वारिणा**ની જેમ) '**अस्तसत्सुरभिणा**' થવું જોઈએ, પણ અહીં "**वाऽन्यतः**" १।४।६२ સૂત્રથી પુંવદ્ ભાવ થવાથી "**धातोरिवर्ण०**" २।१।५० થી **इय्** થઈને '**अस्तसत्सुरभिया**' સિદ્ધ થશે.

**सुरभियाततनुम्**—सुरभिं याता–सुरभियाता, (द्वि.त.पुः) सुरभियाता तनुः यस्याः साः–सुरभियाततनुः, ताम्–सुरभियाततनुम् । (स.ब.व्री.)

**॥ श्री सुमतिजिनस्तुतिः ॥**

(आर्यागीतिः)

**मदमदनरहित ! नरहित !**
**सुमते ! सुमतेन ! कनकतारेतारे !**
**दमदमपालय ! पालय**
**दरादरातिक्षतिक्षपातः पातः ॥१॥ ॥१७॥**

**अन्वय–मदमदनरहित ! नरहित ! सुमतेन ! कनकतार ! इतारे ! अपालय ! अरातिक्षतिक्षपातः पातः ! सुमते ! दमदं दरात् पालय ! ! !**

અહંકાર અને કામથી રહિત, માણસોને હિતકારી, સારા મત=સિદ્ધાંતવાળાનાં ( મુનિઓનાં ) સ્વામી, સુવર્ણ જેવા ઉજ્જવલ, દૂર થયાં છે શત્રુઓ જેનાં એવા, ઘરમાંથી નીકળી ગયેલ, અથવા દૂર થયું છે ઘર જેનું એવા, શત્રુઓનાં ઉપદ્રવ રૂપી રાત્રિથી રક્ષણ કરનાર, એવા હે સુમતિનાથ ભગવાન ! મુનિઓનું ભયથી રક્ષણ કર...!!!

**समास—**

**मदमदनरहित** !—मदश्च मदनश्च–मदमदनौ, (इ. द्व.) मदमदनाभ्यां रहितः–मदमदनरहितः, तदामन्त्रणम्–मदमदनरहित ! 'उनार्थे'० ३।१।६५ (तृ.त.पु.) ।

**नरहित** !—नरेभ्यः हितः–नरहितः, तत्संबोधनम्–नरहित ! । 'हितादिभिः' ३।१।७१ (च.त.पु.) ।

**सुमते !**—शोभना मतिः यस्य सः–सुमतिः, तत्सम्बोधनम्–सुमते ! (सुपू.ब.व्री.) ।

**सुमतेन !**—शोभनं मतं येषां ते–सुमताः, (मुनयः) (सु पू.ब.व्री) सुमतानाम् इनः–सुमतेनः, तत्सम्बोधनम्–सुमतेन ! (ष.त.पु.) ।

**कनकतार !**—कनकवत् तारः–कनकतारः, तत्सम्बोधनम्–कनकतार ! (उ.पू.क.) अथवा....कनकस्य तारा इव तारा यस्य सः–कनकतारः, तदामन्त्रणम्-कनकतार ! (उपमानोपमेय.ब.व्री.) ।

**दमदम्**—दमं ददाति इति दमदः, तम्–दमदम् । (उप.त.पु.) 'आतो डोऽह्वा०' ५।१।७६....ड ।

**अपालय !**—अपगतः आलयात् – अपालयः – तत्सम्बोधनम्–अपालय ! ( प्रादि. त. पु. )

अथवा–अपगतम् आलयं यस्मात्सः–अपालयः, तत्संबोधनम्–अपालय ! ( प्रा. ब. व्री. )

**अरातिक्षतिक्षपातः**—अरातिभ्यः क्षतिः–अरातिक्षतिः । (पञ्चमी तत्पु.) *अरातिक्षतिरेव क्षपा–अरातिक्षतिक्षपा (अव.पू.क.)*

*अरातिक्षतिक्षपायाः इति अरातिक्षतिक्षपातः ।* "अहीय–रुहोऽपादाने" ७।२।८८....तसु ( तस् ) ।

**विधुतारा ! विधुताराः !**
**सदा सदाना ! जिना ! जिताघाताघाः ।**
**तनुतापातनुतापा !**
**हितमाहितमानवनवविभवा ! विभवाः ! ॥२॥१८॥**

अन्वय—विधुतारा: ! विधुतारा: ! सदाना: ! जिताघाताघा: ! अपातनुतापा: ! आहितमानवनवविभवा: ! विभवा: ! जिना: ! सदा हितं तनुत ॥

અર્થ—નાશ કરાયો છે શત્રુનો સમૂહ જેના વડે એવા, ચંદ્ર જેવા ઉજ્જવલ, દાનવાળા, જીતાયા છે અઘાતી કર્મો જેના વડે એવા, દૂર થયો છે મહાન્ સંતાપ જેમનો એવા, ધારણ કરાયું છે માનવોનું નૂતન ઐશ્વર્ય જેના વડે તેવા, દૂર થયો છે સંસાર જેમનો તેવા, હે જિનેશ્વર દેવો! ( પ્રાણીઓનાં ) હિતને વિસ્તારો !!!

समास—

**विधुतारा: !**—अरीणां समूह:—आरम्, 'षष्ठया: समूहे' ६।२।९ अण्,। विधुतम् आरं यै: ते—विधुतारा:, तत्सम्बोधनम्— विधुतारा: !। ( समा. ब. व्री. ) ।

**विधुतारा: !**—विधुवत् तारा:—विधुतारा: तत्सम्बोधनम्—विधुतारा: ! (उपमान पू. क.)....।

**सदाना: !**—दानेन सह वर्तन्ते ये ते—सदाना:, तत्सम्बोधनम्—सदाना: ! ( सहार्थ ब. व्री.) ।

**जिताघाताघा: !**—न घातम्—अघातम्, (नञ तत्पु.) जितम् अघातम् अघम् यै: ते—जिताघाताघा:, तत्सम्बोधनम्—जिताघाताघा: ! (स.ब.व्री.) ।

**अपातनुतापा !**—न तनु:—अतनु:, ( न. त. पु. ) अतनुश्चासौ तापश्च—अतनुताप:, (वि.पू.क.) अपगत: अतनुताप: येषां ते—अपातनुतापा:, तत्सम्बोधनम्—अपातनुतापा: ! (प्रादि.ब.व्री.) ।

**आहितमानवनवविभवा: !** — नवश्चासौ विभवश्च—नवविभव:, "पूर्वकालैक" ३।१।९७...(वि. पू. क.) ।

मानवानां नवविभवः—मानवनवविभवः, (ष.त.पु.) आहितः मानवनवविभवः यैः ते—आहितमानवनवविभवाः, तत्सम्बोधनम्-आहित मानवनवविभवाः! (स. ब. व्री.)।

**विभवाः!**— विगतः भवः येभ्यस्ते—विभवाः, तत्सम्बोधनम् विभवाः! (प्रा. ब. व्री.)।

**मतिमति जिनराजि नरा—**
**ऽऽहितेहिते रुचितरुचि तमोहेऽमोहे।**
**मतमतनूनं नूनं**
**स्मरास्मराधीरधीरसुमतः सुमतः ॥३॥॥१९॥**

**अन्वय-अस्मराधीरधीः, असुमतः सुमतः (त्वं) मतिमति, नराहितेहिते, रुचितरुचि, तमोहे, अमोहे जिनराजि, अतनूनं मतं नूनं स्मर॥**

**અર્થ**—કામવડે અસ્થિર બુદ્ધિ નથી જેની એવો, પ્રાણીઓમાં સારી રીતે માન્ય થયેલ, (તું) બુદ્ધિમાન, માણસોનું ઇચ્છિત પુરાયું છે જેનાવડે એવા, મનોહર કાંતિવાળા, અજ્ઞાનને હણનારા, મોહ વગરનાં જિનેશ્વર દેવને વિષે (જે) તુચ્છ અને ન્યૂન નહીં એવા (તે) સિદ્ધાંતનું નિશ્ચે સ્મરણ કર !!!

**समास—**

**मतिमति!**—मतिः अस्ति यस्य सः-मतिमान्, तस्मिन्—मतिमति।

**जिनराजि!**—जिनेषु राजते—जिनराट्, तस्मिन्—जिनराजि। (उप.त.पु.)

**नराऽऽहिते हिते**—नराणामाहितमीहितं येन सः–नराहितेहितः, तस्मिन्–नराऽऽहितेहिते। (व्य.ब.व्री.)

**रुचितरुचि**—रुचिता रुक् यस्य सः–रुचितरुक्, तस्मिन्–रुचितरुचि। (स.ब.व्री.)

**तमोहे**—तमः हन्तीति–तमोहः, तस्मिन्–तमोहे। (उप.त.पु.) 'आशिषि हनः' ५।१।८०....ड,

**अमोहे**—नास्ति मोहो यस्य सः–अमोहः, तस्मिन्–अमोहे। ( न. ब. व्री. )।

**अतनूनम्**—तनु च तद् ऊनं च–तनूनम्, (वि.उभ.क.) न तनूनम्–अतनूनम्, तद्–अतनूनम्। (न. त. पु.)

**अस्मराधीरधीः**—न धीरा-अधीरा, (न.तत्पु.) स्मरेण (कृता) अधीरा–स्मराधीरा, 'तृतीया तत्कृतैः' ३।१।६५ (तृ.तत्पु.) नास्ति स्मराधीरा धीः यस्य सः–अस्मराधीरधीः। (न.ब.व्री)

**असुमतः**—असवः सन्ति यस्य सः असुमान्, तस्य–असुमतः।

**सुमतः**—शोभनः मतः सुमतः। (सु.पु.क.)

नगदाऽमानगदा मा–
महो ! महोराजिराजितरसा तरसा।
घनघनकाली काली
बतावतादून दून सत्रासत्रा ॥४॥ ॥२०॥

**अन्वय**—अहो नगदामानगदा, महोराजिराजितरसा, घनघनकाली, ऊनदूनसत्रा–सत्रा काली बत तरसा माम् अवतात्।

**અર્થ**—અહો ! પર્વતને ભેદનારી, પ્રમાણ વિનાની ગદાવાળી, તેજની શ્રેણીવડે શોભાવાઈ છે ભૂમિ જેનાવડે એવી, ગાઢ મેઘ જેવી શ્યામ, અપૂર્ણ અને દુઃખી થયેલ, ત્રાસવાળાનું રક્ષણ કરનારી, અથવા અપૂર્ણ અને દુઃખી થયેલ ( માણસો )જ છે ધન જેનું એવી અને સદાચારિણી એવી કાલીદેવી જલ્દીથી મારું રક્ષણ કરો !!!

**समास—**

**नगदामानगदा**—न गच्छन्ति इति–नगाः, (उप.त.पु.) 'नाम्नो गमः खड्डौ च.' ५।१।१३१ ड....। नगान् द्यतीति–नगदा, (उप.त.पु.) 'आतोडोऽह्वावामः' ५।१।७६....ड....। न विद्यते मानं यस्याः सा–अमाना, (न.ब.व्री.) नगदा अमाना गदा यस्याः सा–नगदामानगदा। (स.ब.व्री).....।

**महोराजिराजितरसा**—महसां राजयः–महोराजयः, (ष.त.पु.) महोराजिभिः राजिता रसा यया सा–महोराजिराजितरसा। (व्य.ब.व्री)

**घनघनकाली**—घनश्चासौ घनश्च घनघनः, (वि.पू.क.) घनघनवत् काली–घनघनकाली। (उ.पू.क.)

**ऊनदूनसत्रासत्रा**—त्रासेन सह वर्तन्ते ये ते–सत्रासाः, (स.ब.व्री.) दूनाश्चामी सत्रासाश्च–दूनसत्रासाः, (वि.पू.क.) ऊनाश्चामी दूनसत्रासाश्च–ऊनदूनसत्रासाः, (वि.पू.क.) ऊनदूनसत्रासान् त्रायते–ऊनदूनसत्रासत्रा, (उप.त.पु.) "स्थापास्नात्रः कः" ५।१।१४२...क। अथवा ऊनदूनसत्रा–ऊनाश्चामी दूनाश्च ऊनदूनाः, (वि.उभ.क.) ऊनदूनाः एव सत्रं यस्याः सा–ऊनदूनसत्रा। (उ.ब.व्री.)

## ॥ श्री पद्मप्रभजिनस्तुतिः ॥

( वसन्ततिलकावृत्तम् )

पादद्वयी दलितपद्ममृदुः प्रमोद–
मुन्मुद्रतामरसदामलतान्तपात्री ।

पाद्मप्रभी प्रविदधातु सतां वितीर्ण-
मुन्मुद्रतामरसदा मलतान्तपात्री ॥१॥ ॥२१॥

अन्वय–उन्मुद्रतामरसदामलतान्तपात्री, वितीर्णमुद् मुद्रतामरसदाः मलतान्तपात्री दलितपद्ममृदुः पाद्मप्रभी पादद्वयी सताम् प्रमोदम् प्रविदधातु ।

અર્થ–ઊંચી થઇ છે મુદ્રાઓ જેનાં એવા કમલની માલા, અને વેલડીને અંતે રહેલાં ( પુષ્પો )નાં સ્થાનભૂત, અથવા વિકસિત લાલ કમલને ધારણ કરનાર, ( લંછન તરીકે ) અને રોગરૂપી વેલડીનો નાશ કરવાનાં સ્થાનરૂપ, અથવા હર્ષપૂર્વક આસક્તિના કાચા રસને છેદી નાખનાર અને ( કર્મ ) મલતાનાં અંતનાં સ્થાન સરખા, અપાયો છે આનંદ જેનાવડે એવા, હર્ષથી અને રક્ત થયેલી છે દેવોની સભા જેને વિષે એવા, તથા ( કર્મ ) મલથી પીડાયેલાનું રક્ષણ કરનાર, વિકસિત પદ્મ જેવા કોમલ, એવા–પદ્મપ્રભુનાં ચરણ યુગલ સજ્જનોનાં આનંદને અતિશય કરો...!

समास—

**पादद्वयी**–द्वौ प्रकारौ यस्याः–द्वयी, 'द्वित्रिभ्या.' ७।१।१५२... अयट्, 'अणञेयेकण्' २।४।२०....ङी, पादयोः द्वयी–पादद्वयी । (ष. त. पु.) ।

**दलितपद्ममृदुः**–दलानि जातानि यस्य तद्–दलितम्, 'तदस्य सञ्जातम्' ७।१।१३८...इत, दलितं च तद् पद्मं च–दलितपद्मम्, (वि.पू.क.) दलितपद्मवत् मृदुः–दलितपद्ममृदुः । (उप.पू.क.)

**प्रमोदम्**–प्रकर्षेण मोदयति जनान्–प्रमोदः, तम्–प्रमोदम् । (उप.त.पु.) 'व्यञ्जनाद् घञ्' ५।३।१३२...घञ्।

**उन्मुद्रतामरसदामलतान्तपात्री**–उद्गता मुद्रा येभ्यः तानि-उन्मुद्राणि, (प्रा.ब.व्री.) उन्मुद्राणि तामरसानि–उन्मुद्रतामरसानि, (वि.पू.क.) उन्मुद्रतामरसानां दामानि–उन्मुद्रतामरसदामानि, (ष.त.पु.) लतायाः अन्तानि–लतान्तानि, (ष.त.पु.) उन्मुद्रतामरसदामानि च लतान्तानि च उन्मुद्रतामरसदामलतान्तानि, (इ.द्व.) उन्मुद्रतामरसदामलतान्तानां पात्री–उन्मुद्रतामरसदामलतान्तपात्री (ष. त. पु.)।

(२)उद्गतं मुद्रं यस्य तद्–उन्मुद्रम्, (प्रा.ब.व्री.) उन्मुद्रं तामरसं–उन्मुद्रतामरसम्, (वि.पू.क.) उन्मुद्रतामरसम् दयते–उन्मुद्रतामरसदा, (उप. त. पु.) 'आतो डोह्वा०' ५।१।७६....ड, आम एव लता–आमलता, (अव.पू.क.) आमलतायाः अन्तः–आमलतान्तः, (ष.त.पु.) आमलतान्तस्य पात्री–आमलतान्तपात्री, (ष.त.पु.) उन्मुद्रतामरसदा चासौ आमलतान्तपात्री च–उन्मुद्रतामरसदामलतान्तपात्री . (विशेषणोभय.क.)

(३) उद्गता मुद् यस्मिन् तद्–उन्मुद्, (प्रा.ब.व्री.) उन्मुद् च तद् रतं च–उन्मुद्रतम्, (वि.पू.क.) आमः रसः–आमरसः, (वि.पू.क.) उन्मुद्रते आमरसः—उन्मुद्रतामरसः, (स.त.पु.) उन्मुद्रतामरसं धति–उन्मुद्रतामरसदा, 'आतो डो०' ५।१।७६....ड, आप्, (उप.त.पु.) मलस्य भावः–मलता, 'भावे त्वतल्' ७।१।५५...तल्, मलतायाः अन्तः–मलतान्तः, (ष.त.पु.) मलतान्तस्य पात्री–मलतान्तपात्री, (ष.त.पु.)

**पाद्मप्रभी**–पद्मस्य प्रभा इव प्रभा यस्य सः–पद्मप्रभः, (उपमानोपमेय.ब.व्री.) पद्मप्रभस्य इयम्–पाद्मप्रभी। 'तस्येदम्' ६।३।१६० ना सूचनथी 'प्राग् जितादण्' ६।१।१३...अण्.

**वितीर्णमुद्**–वितीर्णा मुद् यया सा–वितीर्णमुद्। (स.ब.व्री.)

मुद्रतामरसदा- अमराणां सदाः—अमरसदाः, ( ष. त. पु. ) मुदा रता—मुद्रता, ( तृ. त. पु. ) मुद्रता अमरसदाः यस्यां सा—मुद्रतामरसदाः । ( स. ब. व्री. ) ।

मलतान्तपात्री—मलेन तान्ताः—मलतान्ताः ( तृ.त.पु. ) मलतान्तान् पाति—मलतान्तपात्री, 'णकतृचौ.' ५।१।४८....तृच्-ङी,(उप.त.पु.)

**सा मे मतिं वितनुताज्जिनपङ्क्तिरस्त-**
**मुद्राऽऽगतामरसभाऽसुरमध्यगाऽऽद्याम् ।**
**रत्नांशुभिर्विदधती गगनान्तराल-**
**मुद्रागतामरसभासुरमध्यगाद्याम् ॥२॥ ॥२२॥**

**अन्वय—**रत्नांशुभिः गगनान्तरालम् उद्रागतामरसभासुरं विदधती अस्तमुद्रा आगता असुरमध्यगा अमरसभा आद्यां याम् अध्यगात् सा जिनपङ्क्तिः मे मतिं वितनुतात् ।

**અર્થ**—રત્નોનાં કિરણો વડે આકાશનાં મધ્યભાગને અતિરક્ત એવા લાલ કમલ જેવું દેદીપ્યમાન કરતી, દૂર થયું છે પ્રમાણ જેનું એવી, ( સુરલોકથી ) આવેલી, અસુરોની મધ્યમાં રહેનારી, એવી દેવોની સભાએ પ્રથમ જ જેનો આશ્રય કર્યો છે એવી તે જિનેશ્વર દેવોની શ્રેણિ મારી બુદ્ધિનો વિસ્તાર કરો....

**समास—**

**जिनपङ्क्तिः**—जिनानां पङ्क्तिः—जिनपङ्क्तिः । (ष.त.पु.)

**अस्तमुद्रा**—अस्ता मुद्रा यस्याः सा—अस्तमुद्रा । (स.ब.व्री.)

**अमरसभा**—अमराणां सभा—अमरसभा । (ष.त.पु.)

असुरमध्यगा—असुराणां मध्यम्—असुरमध्यम्, ( ष.त.पु. ) असुरमध्ये गच्छति—असुरमध्यगा। ( उप. त. पु. ) 'नाम्नो गम०' ५।१।१३१....ड, आप्।

आद्याम्—आदौ भवा-आद्या, ताम्—आद्याम्। 'दिगादिदेहांशाद्यः' ६।३।१२४...य।

रत्नांशुभिः—रत्नानाम् अंशवः—रत्नांशवः, तैः—रत्नांशुभिः। (ष. त. पु.)।

गगनान्तरालम्—गगनस्य अन्तरालम्—गगनान्तरालम्, तद्—गगनान्तरालम्। ( ष.त.पु. )

उद्रागतामरसभासुरम्—उत्कृष्टः रागः यस्मिन् तद्—उद्रागम्, ( प्रादि.ब.व्री. ) उद्रागम् तामरसम्—उद्रागतामरसम्, (वि.पू.क.) उद्रागतामरसम् इव भासुरम्—उद्रागतामरसभासुरम्, तद्—उद्रागतामरसभासुरम्। ( उप.पू.क. )

**श्रान्तिच्छिदं जिनवरागममाश्रयार्थ-**
**मारामममानम लसन्तमसङ्गमानाम्।**
**धामाग्रिमं भवसरित्पतिसेतुमस्त-**
**मारामममानमलसन्तमसं गमानाम् ॥३॥ ॥२३॥**

अन्वय—श्रान्तिच्छिदम् असङ्गमानाम् आश्रयार्थम् आरामम् लसन्तम्, गमानाम् अग्रिमं धाम, भवसरित्पतिसेतुम्, अस्तमाराममानमलसन्तमसम् जिनवरागमम् आनम।

**અર્થ**– સંસારના ખેદને કાપી નાખનાર, નિસ્સંગમુનિઓને આશ્રયને માટે ઉદ્યાન સરખાં, શોભાયમાન, સરખા પાઠોનું શ્રેષ્ઠધામ, સંસારરૂપી સમુદ્રમાં પુલ સમાન, નાશ કરાયો છે કામ, રોગ ગર્વ (કર્મરૂપી) મલરૂપી ગાઢ અંધકારનો જેનાવડે, એવા શ્રી જિનેશ્વર દેવનાં આગમને તું નમસ્કાર કર...

**समास—**

**श्रान्तिच्छिदम्**—श्रान्ति छिनत्ति–श्रान्तिच्छिद्, तम्–श्रान्तिच्छिदम्। (उप. त. पु.) 'क्विप्' ५।१।१४८... क्विप्।

**जिनवरागमम्**—जिनेषु वराः जिनवराः, (स.त.पु.) जिनवरैः प्रणीतः–जिनवरप्रणीतः, (तृ. त. पु.) जिनवरप्रणीतश्चासौ आगमश्च–जिनवरागमः, तम्–जिनवरागमम् (म.प.लो.क.)

**आश्रयार्थम्**—आश्रयाय अयम्–आश्रयार्थः, तम्–आश्रयार्थम्। 'तदर्थार्थेन' ३।१।७२ (च.त.पु.)।

**असङ्गमानाम्**—न विद्यते संङ्गमः येषां ते–असङ्गमाः, तेषाम्–असङ्गमानाम्। (न.ब.व्री.)

**भवसरित्पतिसेतुम्**—सरितां पतिः–सरित्पतिः, (ष.त.पु.) भव एव सरित्पतिः–भवसरित्पतिः, (अव.पू.क.) भवसरित्पतौ सेतुः इव–भवसरित्पतिसेतुः, तम्–भवसरित्पतिसेतुम्। "सिंहाद्यैः" ३।१।१०२ (स. त. पु.)।

**अस्तमाराममानमलसन्तमसम्**—मारश्च आमश्च मानश्च मलश्च–माराममानमलाः, (इत.द्व.) संपूर्णं च तद् तमश्च–सन्तमः, (प्रादि. त.पु.) माराममानमलाः एव सन्तमः–माराममानमलसन्तमः, (उपमानोत्तर.क.)

अस्तं मारामममानमलसन्तमः येन सः–अस्तमारामममानमलसन्तमाः, तम्–अस्तमारामममानमलसन्तमसम् । ( स.ब.व्री. )

**गमानाम्**—गम्यन्ते इति गमाः, तेषाम् गमानाम् । "युवर्ण वृ–द० " ५।३।२८...अल् ।

**गान्धारि ! वज्रमुसले जयतः समीर–**
**पातालसत्कुवलयावलिनीलभे ते ।**
**कीर्तीः करप्रणयिनी तव ये निरुद्ध–**
**पातालसत्कुवलया बलिनी लभेते ॥४॥२४॥**

**अन्वय—**गान्धारि ! ये निरुद्धपातालसत्कुवलयाः कीर्तीः लभेते ते तव करप्रणयिनी बलिनी समीरपातालसत्कुवलयावलिनीलभे वज्रमुशले जयतः ।

**અર્થ**—હે ગાન્ધારિદેવી ! જેણે (બે શસ્ત્રોએ) આવરણભૂત કરાયું છે પાતાલરૂપ સુંદર પૃથ્વી મંડલ જેણી વડે એવી, અથવા–આવરણભૂત કરાયું છે પાતાલવાસીઓનું પૃથ્વી મંડલ જેણી વડે એવી, કીર્તિને પ્રાપ્ત કરી છે તે (બે શસ્ત્રો) તારા હાથને વિષે પ્રેમ છે જેને એવા, બળવાળા, વાયુનાં આવવાથી ચારે બાજુ વિલાસ કરતાં કમલની શ્રેણી જેવી નીલ કાંતિવાળાં એવા વજ્ર અને મુશલ જય પામે છે....

**समास–**

**गान्धारि**—गां ( भूमिं ) धारयति–गान्धारी, तत्संबोधनम्–गान्धारि । ( उप.त.पु. ) 'पृषोदरादयः' ३।२।१५६...निपातन ।

**वज्रमुसले**—वज्रश्च मुसलं च–वज्रमुसले । ( इत.द्व. ) ।

**समीरपातालसत्कुवलयावलिनीलभे**—समीरस्य पातः—समीरपातः, 'कृति' ३।१।७७ (ष.त.पु.) समीरपातेन आलसन्ती—समीरपाताल-सन्ती, (तृ.त.पु.) कुवलयानाम् आवलिः—कुवलयावलिः, (ष.त.पु.) समीरपातालसन्ती चासौ कुवलयावलिश्च— समीरपातालसत्कुवलयावलिः (वि.पू.क.)

नीला चासौ भा च—नीलभा, (वि.पू.क.) समीरपातालसत्कु-वलयावल्याः इव नीलभा ययोः ते—समीरपातालसत्कुवल्यावलिनीलभे । (उपमान, ब.व्री.)

**करप्रणयिनी**—करे प्रणयः ययोः ते—करप्रणयिनी । (व्य. ब. व्री) 'अतोऽनेकस्वरात्.' ७।२।६....इन् ।

**निरुद्धपातालसत्कुवलयाः**—कोःवलयम्—कुवलयम् (ष. त. पु.) सत् कुवलयं—सत्कुवलयम् 'सन्महत्' ३।१।१०७ (वि. पू. क.) निरुद्धं पाताले सत्कुवलयं याभिः ताः-निरुद्धपातालसत्कुवलयाः । (स. ब. ब. व्री.)

(२) पाताले सीदन्ति—पातालसदः, (उप. त. पु.) 'क्विप्' ५।३।१४८ क्विप्, पातालसदां कुवलयम्—पातालसत्कुवलयम्, (ष. त. पु.) निरुद्धं पातालसत्कुवलयं याभिः ताः—निरुद्धपातालसत्कुवलयाः । ताः—निरुद्धपातालसत्कुवलयाः । द्वि. ब. व. (स. ब. व्री.) ।

## ॥ श्री सुपार्श्वजिनस्तुतिः ॥

(मालिनी)

**कृतनति कृतवान् यो जन्तुजातं निरस्त-**
**स्मरपरमदमायामानबाधायशस्तम् ।**
**सुचिरमविचलत्वं चित्तवृत्तेः सुपार्श्वं,**
**स्मर परमदमाया मानबाधाय शस्तम् ॥१॥२५॥**

अन्वय—यः कृतनति जन्तुजातं निरस्तस्मरपरमदमायामानबाधायशः कृतवान् हे मानव ! परमदमायाः चित्तवृत्तेः अविचलत्वं सुचिरम् आधाय शस्तम् तम् सुपार्श्वं स्मर ।

અર્થ—જેણે–કરાયેલો છે નમસ્કાર જેનાવડે એવા પ્રાણીઓનાં સમૂહને, દૂર કર્યાં છે કામ શત્રુઓ–મદ માયા માન પીડા અપયશ જેના એવો કર્યો, હે માનવ ! શ્રેષ્ઠ છે નિગ્રહ જેનો એવી ચિત્ત-વૃત્તિના એકાગ્રપણાને લાંબા કાળ સુધી ધારણ કરીને પ્રશસ્ત એવા તે સુપાર્શ્વનાથ ભગવાનનું તું સ્મરણ કર !

समास—

कृतनति—कृता नतिः येन तद्—कृतनति, तद्—कृतनति । ( स. ब. व्री. )

जन्तुजातम्—जन्तूनां जातम्—जन्तुजातम्, तद्—जन्तुजातम् । ( ष. त. पु. )

निरस्तस्मरपरमदमायामानबाधायशः—स्मरश्च परे च मदश्च माया च मानश्च बाधा च अयशश्च—स्मरपरमदमायामानबाधायशांसि ( इ. द्व. ) निरस्तानि स्मरपरमदमायामानबाधायशांसि यस्य तद्—निरस्तस्मरपरमदमायामानबाधायशः, तद्—निरस्तस्मरपरमदमायामानबाधायशः । (स. ब. व्री.) ।

सुचिरम्—अतिक्रमं चिरम्—सुचिरम् । 'अतिरतिक्रमे च' ३।१।४५ ( सु. पू. त. पु. ) ।

अविचलत्वम्—न विचलत्वम् अविचलत्वम्, तद्—अविचलत्वम् । ( न. त. पु. )

चित्तवृत्तेः—चित्तस्य वृत्तिः–चित्तवृत्तिः, तस्याः—चित्तवृत्तेः । (ष. त. पु.)

सुपार्श्वम्—शोभनौ पार्श्वौ यस्य सः–सुपार्श्वः, तम्–सुपार्श्वम् । (अव्यय. ब. व्री.) ।

परमदमायाः—परमो दमो यस्याः सा–परमदमा, तस्याः–परमदमायाः । (स. ब. व्री.) ।

आधाय—आ हित्वा–आधाय । (गति. त. पु. )

व्रजतु जिनततिः सा गोचरे (रं) चित्तवृत्तेः,
सदमरसहितायाः वोऽधिका मानवानाम् ।
पदमुपरि दधाना वारिजानां व्यहार्षीत्,
सदमरसहिता या बोधिकामा नवानाम् ॥२॥२६॥

अन्वय—या नवानां वारिजानाम् उपरि पदं दधाना व्यहार्षीत् सा मानवानाम् अधिका सदमरसहिता बोधिकामा जिनततिः वः सदमरसहितायाः चित्तवृत्तेः गोचरे (रं) व्रजतु ॥

અર્થ–જેણે (જિનવર શ્રેણિએ) નવ કમલોની ઉપર પગલાંને ધારણ કરતાં વિહાર કર્યો હતો તે માનવોમાં અધિક, (શ્રેષ્ઠ) સુંદર દેવોથી યુક્ત, સમ્યગ્દર્શન ( આપવા )ની ઇચ્છાવાળી, એવી જિનેશ્વરદેવોની શ્રેણિ તમારી ઉપશમ રસવાળાને હિતકારી, એવી ચિત્તવૃત્તિનાં વિષયમાં પ્રાપ્ત થાઓ.

समास—

जिनततिः—जिनानां ततिः–जिनततिः । ( ष. त. पु. )

चित्तवृत्तेः—वर्त्तनम् इति वृत्तिः, 'स्त्रियां क्तिः' ५।३।९१ क्ति, चित्तस्य वृत्तिः–चित्तवृत्तिः, तस्याः–चित्तवृत्तेः । 'कृति' ३।१।७७ ( ष. त. पु. )

सदमरसहिता—सन्तश्चामी अमराश्च–सदमराः, 'सन्महत्'० ३।१।१०७ (वि.पू.क.) सदमरैः सहिता–सदमरसहिता, 'ऊनार्थपूर्वाद्यैः' ३।१।६७...। ( तृ. त. पु. )

**वारिजानाम्**—वारिणि जातानि—वारिजानि, तेषां—वारिजानाम्। 'सप्तम्याः' ५।१।१६९....ड,

**सदमरसहितायाः**—दम एव रसः—दमरसः, (अव. पू. क.) दमरसेन सह वर्तन्ते ये ते—सदमरसाः, (सह. ब. व्री.)

सदमरसेभ्यः हिता—सदमरसहिता, तस्याः—सदमरसहितायाः। 'हितादिभिः' ३।१।७१ (च. त. पु.)

**बोधिकामा**—कामनं—कामः, 'व्यञ्जनाद्'. ५।३।१३२...घञ्, बोधौ कामः यस्याः सा—बोधिकामा। (व्य. ब. व्री.)

**दिशदुपशमसौख्यं संयतानां सदैवो-**
**रु जिनमतमुदारं काममायामहारि।**
**जननमरणरीणान्वासयत्सिद्धि(द्ध)वासे-**
**ऽरुजि नमत मुदाऽरं काममायामहारि ॥३॥२७॥**

**अन्वय—संयतानां सदैव उरु उपशमसौख्यं दिशत् उदारम् आयामहारि जननमरणरीणान् अरुजि सिद्धि(द्ध)वासे अरं वासयत् काममायामहारि जिनमतं मुदा कामं नमत।**

અર્થ-મુનિઓને હંમેશા વિશાળ એવાં ઉપશમસુખને બતાવતાં, ઉદાર, દીર્ઘતાવડે કરીને મનોહર, જન્મ-મરણથી ખેદ પામેલાને રોગરહિત એવા સિદ્ધિસ્થાનને વિષે જલ્દીથી વાસ કરાવતા, કામ અને માયાને ભેદનાર મહાન ચક્ર સમાન,-(અથવા—કામ માયા અને રોગને હરવાનાં સ્વભાવવાળાં) એવા જિનાગમને (તમે) હર્ષથી સુંદર રીતે નમસ્કાર કરો.

**समास—**

**उपशमसौख्यम्**—सुखमेव – सौख्यम्, 'भेषजादिभ्यष्ट्यण्' ७।२।१६४ ट्यण्, उपशम एव सौख्यम्–उपशमसौख्यम्, तद्–उपशमसौख्यम्। (अव. पू. क.)

**जिनमतम्**—जिनैः प्रणीतम्–जिनप्रणीतम्, (तृ. त. पु.) जिनप्रणीतं मतं–जिनमतम्, तद्–जिनमतम्। (म. प. लो. क.)

**आयामहारि**—हरतीत्येवं शीलम्–हारि, 'अजातेः' ५।१।१५४ ....णिन्, आयामेन (कृतं) हारि–आयामहारि, तद्–आयामहारि। 'तृतीया०' ३।१।६५ (तृ. त. पु.)

**जननमरणरीणान्**—जायते इति–जननम्, म्रियते इति–मरणम्, 'अनट्' ५।३।१२८....अनट्, जननं च मरणं च–जननमरणे, (इ. द्व.) जननमरणाभ्यां रीणाः–जननमरणरीणाः, तान्–जननमरणरीणान्। (तृ. त. पु.)

**सिद्धिवासे**—सिद्धिरेव वासः–सिद्धिवासः, तस्मिन्–सिद्धिवासे। (अव. पू. क.)

**सिद्धवासे**—वसन्ति यत्र–वासः, 'भावाऽकर्त्रोः' ५।३।१८ घञ्, सिद्धानां वासः–सिद्धवासः, तस्मिन्–सिद्धवासे। (ष.त.पु.)

**अरुजि**—नास्ति रुक् यस्मिन् सः–अरुक्, तस्मिन्–अरुजि। (न. ब. व्री.)

* **काममायामहारि**—कामश्च माया च–काममाये, (इ. द्व.)

---

* **काममायामहारि—**

नोंध–सरलाटीकायाम्–"कामश्च माया च–तयोर्महारिः महाशत्रुरिव..."

–श्रीजयविजयगणिविरचितविवृत्तौ–कामः–कन्दर्पः

माया–कषायविशेषः तयोर्महारि–बृहदमित्रभूतम्,....

काममाये भिनत्ति—काममायाभेदकम्, 'णकतृचौ' ५।१।४८... णक, (उप. त. पु.) अराणि सन्ति यस्य तद्—अरि, 'अतोऽनेक०'. ७।२।६...इन्, महच्च तद् अरि च—महारि, 'सन्महत्'. ३।१।१०७ (वि. पू. क.) काममायाभेदकम् महारि—काममायामहारि, तद्—काममायामहारि। (म. प. लो. क.)

**दधति! रविसपत्नं रत्नमाभास्तभास्वन्–**
**नवघनतरवारिं वा रणारावरीणाम् ।**
**गतवति! विकिरत्यालीं महामानसीष्टा–**
**नव घनतरवारिं वारणारावरीणाम् ॥४॥२८॥**

अन्वय—(१) रविसपत्नं रत्नम् आभास्तभास्वन्नवघनतरवारिं घनतरवारिं वा दधति! अरीणां रणारावरीणाम् आलीं विकिरति! वारणारौ गतवति! महामानसि! इष्टान् अव।...

—श्रीसिद्धचन्द्रगणिरचितवृत्तौ—कामः—स्मरः माया—कषायविशेषः कामश्च माया च काममाये 'इतरेतरद्वन्द्वः' तयोः महांश्चासावरिश्च इति 'कर्मधारयः' तत् तथा, वृहदमित्रभूतमित्यर्थः।

ઇત્યાદિ વૃત્તિઓના આધારે જો અર્થ કરીએ તો કામ અને માયાનાં મહાન્ શત્રુ સરખા....પણ અહિં પ્રશ્ન થાય કે 'अरि' (શત્રુ) શબ્દ પુલિંગમાં છે જ્યારે અહિં નપું. ના વિશેષણ તરીકે લઈએ તો પણ अरि શબ્દ નપું.માં ઉપયુક્ત કરી શકાય નહિ કારણ કે કર્મધારય સમાસ છે. પરંતુ અહિંયા નપું.માં ઉપયુક્ત કરેલ છે. અને થવાની શક્યતા ન હોવાથી અર્થભેદ કરવો યોગ્ય લાગવાથી અર્થભેદ કરેલ છે. અને શત્રુવાચી 'अरि' શબ્દ ન લેતા ચક્ર વાચી 'अरिन्' શબ્દ લીધેલ છે.

(२) आभास्तभास्वत् रविसपत्नं रत्नं नवघनतरवारिं घनतरवारिं वा दधति !...शेष पूर्ववत्....

**અર્થ**-(૧) સૂર્યના શત્રુભૂત રત્નને અને કાંતિવડે પરાજીત કરાયો છે સૂર્ય જેના વડે એવા નવા મેઘ જેવા અત્યંત તેજવાળી પ્રચંડ તલવારને ધારણ કરતી, શત્રુઓની યુદ્ધ શબ્દ.( માત્ર )થી ખેદ પામેલી એવી શ્રેણિને દૂર કરતી, સિંહ ઉપર બેઠેલી, હે મહામાનસી દેવી ! ઈષ્ટ એવાનું તું રક્ષણ કર.

(૨) કાંતિવડે પરાજીત કરાયો છે સૂર્ય જેનાવડે એવા, સૂર્યના શત્રુભૂત રત્નને અને નવા મેઘ જેવી અત્યંત તેજવાળી પ્રચંડ તલવારને ધારણ કરતી......શેષ પૂર્વવત્

**समास**–

**रविसपत्नम्**—रवेः सपत्नम्-रविसपत्नम्, तद्-रविसपत्नम् । ( ष. त. पु. )

**आभास्तभास्वत्**—आभया अस्तः भास्वान् येन तद्—आभास्तभास्वत्, तद्—आभास्तभास्वत् । ( व्य. ब. व्री. )

**आभास्तभास्वन्नवघनतरवारिम्**—आभया अस्तः भास्वान् येन सः—आभास्तभास्वान्, ( व्य. ब. व्री. ) नवः घनतरः—नवघनतरः, " पूर्वकालैक० " ३।१।९७...( वि. पू. क. )

आभास्तभास्वान् चासौ नवघनतरश्च—आभास्तभास्वन्नवघनतरः, ( वि. पू. क. ) आभास्तभास्वन्नवघनतरवत् वारि यस्मिन् सः—आभास्तभास्वन्नवघनतरवारिः, तम्—आभास्तभास्वन्नवघनतरवारिम् । (उपमान.ब.व्री.)

**रणारावरीणाम्**— रणस्य आरावः-रणारावः, ( ष.त.पु. ) रणारावेण रीणा—रणारावरीणा, ताम्—रणारावरीणाम् ।. ( तृ. त. पु. )

**घनतरवारिम्**—घनश्चासौ तरवारिश्च-घनतरवारिः, तम्—घनतरवारिम् । ( वि. पू. क. )

**वारणारौ**—वारणानाम् अरिः-वारणारिः, तस्मिन्—वारणारौ । ( ष. त. पु. )

॥ श्रीचन्द्रप्रभजिनस्तुतिः ॥

**तुभ्यं चन्द्रप्रभ ! जिन ! नमस्तामसोज्जृम्भितानां**
**हाने कान्तानलसम ! दयावन् ! दितायासमान ! ।**
**विद्वत्पङ्क्त्या प्रकटितपृथुस्पष्टदृष्टान्तहेतू-**
**हानेकान्तानलसमदया वन्दितायासमान ! ॥१॥२९॥**

अन्वय—तामसोज्जृम्भितानां हाने कान्तानलसम ! दयावन् ! दितायासमान ! प्रकटितपृथुस्पष्टदृष्टान्तहेतूहानेकान्त ! असमान ! चन्द्रप्रभ ! जिन ! अनलसमदया विद्वत्पङ्क्त्या वन्दिताय तुभ्यं नमः ।

**અર્થ**—અંધકારનાં પ્રગટપણાને દૂર કરવામાં મનોહર અગ્નિ સમાન ! દયાવાળા ! હણાયો છે ખેદનો ગર્વ જેનાવડે એવા ! અથવા–દળી નંખાયો છે ખેદ અને અહંકાર જેનાવડે એવા ! પ્રગટ કરાયો છે વિસ્તૃત અને સ્પષ્ટ દૃષ્ટાંત હેતુ અને તર્કવાળો અનેકાન્તવાદ જેમના વડે એવા, અદ્વિતીય એવા હે ચંદ્રપ્રભસ્વામિ ! આલસ અને મદ વગરની વિદ્વાનોની પંક્તિવડે વંદાયેલા એવા તમને નમસ્કાર થાઓ....

**समास**—

**चन्द्रप्रभ !**—चन्द्रस्य प्रभा इव प्रभा यस्य सः—चन्द्रप्रभः, तत्संबोधनम्—चन्द्रप्रभ ! । ( उपमानोपमेय, ब. व्री. )

**तामसोज्जृम्भितानाम्**—तमसः इमानि-तामसानि, 'तस्येदम्' ६।३।१६०...सूत्रना कथनथी 'प्राग्जितादण्' ६।१।१३....अण्,

तामसानि उज्जृम्भितानि—तामसोज्जृम्भितानि, तेषां-तामसोज्जृम्भितानाम्। ( वि. पू. क. )

**हाने**—हीयते इति-हानम्, तस्मिन्-हाने। 'अनट्' ५।३।१२४...अनट्.।

**कान्तानलसम !**—कान्तश्चासौ अनलश्च-कान्तानलः, (वि.पू.क.) कान्तानलेन समः—कान्तानलसमः, तत्संबोधनम्-कान्तानलसम ! 'ऊनार्थ-पूर्वाद्यैः' ३।१।६७ ( तृ. त. पु. )।

**दयावन् !**—दया अस्ति यस्य सः—दयावान्, तत्संबोधनम्-दयावन् ! 'तदस्या०' ७।२।१...मतु।

**दितायासमान !**—आयासस्य मानः—आयासमानः, ( ष.त.पु.) दितः आयासमानः येनः सः—दितायासमानः, ( स. ब. व्री.)

अथवा – आयासश्च मानश्च — आयासमानौ, ( इ. द्व. ) दितौ आयासमानौ येन सः—दितायासमानः, तत्संबोधनम्—दितायासमान ! ( स. ब. व्री. )।

**विद्वत्पङ्क्त्या**—विदुषां पङ्क्तिः—विद्वत्पङ्क्तिः, तया—विद्वत्पङ्क्त्या। ( ष. त. पु. )

**प्रकटितपृथुस्पष्टदृष्टान्तहेतूहानेकान्त !**— दृष्टान्ताश्च हेतवश्च ऊहाश्च—दृष्टान्तहेतूहाः, ( इ. द्व. ) पृथवः स्पष्टाः दृष्टान्तहेतूहाः यस्मिन् सः—पृथुस्पष्टदृष्टान्तहेतूहः, (स. ब.ब. व्री.) नास्ति एकान्तः यस्मिन् सः—अनेकान्तः, ( न. ब. व्री. ) प्रकटितः पृथुस्पष्टदृष्टान्तहेतूहः अनेकान्तः येन सः—प्रकटितपृथुस्पष्टदृष्टान्तहेतूहानेकान्तः, तत्संबोधनम्—प्रकटितपृथुस्पष्टदृष्टान्तहेतूहानेकान्त ! ( स. ब. ब. व्री. )।

**अनलसमदया**—अलसश्च मदश्च—अलसमदौ, ( इ. द्व. ) न विद्येते अलसमदौ यस्यां सा—अनलसमदा, तया—अनलसमदया। ( न. ब. व्री. )

असमान !—न समानः– असमानः, तत्संबोधनम् – असमान ! ( न. त. पु. )

**जीयाद्राजी जनितजननज्यानिहानिर्जिनानां,**
**सत्यागारं जयदमितरुक् सारविन्दाऽवतारम् ।**
**भव्योद्धृत्या भुवि कृतवती याऽवहद् धर्मचक्रं,**
**सत्यागा रञ्जयदमितरुक् सा रविं दावतारम् ॥२॥३०॥**

अन्वय—(१) सत्यागा भव्योद्धृत्या भुवि अवतारं कृतवती या जयदं रविं रञ्जयत् अमितरुक् दावतारं धर्मचक्रम् अवहत् सा सत्यागारम् इतरुक् सारविन्दा जनितजननज्यानिहानिः जिनानां राजी जीयात्. .

**અર્થ**–ત્યાગથી યુક્ત, ભવ્ય જીવોના ઉદ્ધારને માટે પૃથ્વીને વિષે અંવતારને કરતી એવી, જેણે–જયને આપનાર, સૂર્યને રક્ત કરતાં, અસાધારણ કાન્તિવાળા, દાવાનલ જેવા ઉજ્જવલ એવા ધર્મ-ચક્રને વહન કર્યું છે તે સત્યના મંદિર સમી, દૂર થયા છે રોગો જેના એવી, સાર=તત્ત્વને પ્રાપ્ત કરનારી, (કમલોવાળી) પ્રગટ કરાયો છે જન્મ અને જરા–ઘડપણનો ત્યાગ જેનાવડે ( પ્રગટ કરાયો છે લોકોની જરા નો ત્યાગ જેના વડે ) એવી જિનેશ્વરદેવોની શ્રેણિ જય પામો...

**समास—**

**जनितजननज्यानिहानिः**— जायते इति– जननम्, 'अनट्' ५।३।१२४...अनट्, जीयते इति ज्यानिः, 'ग्लाहा–ज्यः' ५।३।११८ ...अनि, जननं च ज्यानिश्च—जननज्यानी, ( इ. द्व. ) जननज्यान्योः हानिः–जननज्यानिहानिः, 'कृति' ३।१।७७ ( ष. त. पु. ) जनिता

जननज्यानिहानिः यया सा—जनितजननज्यानिहानिः । ( स. ब. व्री. ) अथवा—जननानाम् ज्यानिः—जननज्यानिः, ( ष. त. पु. ) जननज्यान्याः हानिः—जननज्यानिहानिः, ( ष. त. पु. ) शेष पूर्ववत्....

**सत्यागारम्**—सत्यस्य अगारम्—सत्यागारम् , । ( ष. त. पु. )

**जयदम्**—जयं ददाति—जयदम् , तद्—जयदम् । ( उप. त. पु. ) 'आतो डोऽह्वा०' ५।१।७६...ड ।

**इतरुक्**—इता रुजः यस्याः सा—इतरुक् । ( स. ब. व्री. )

**सारविन्दा**— सारं विन्दते—सारविन्दा । 'लिम्प– विन्दः' ५।१।६०....श...( उप. त. पु. ) अथवा—अरविन्दैः सह वर्तते या सा—सारविन्दा । ( सहार्थ. ब. व्री. )

**भव्योद्धृत्या**—भव्यानाम् उद्धृतिः—भव्योद्धृतिः, तया—भव्योद्धृत्या । 'कृति' ३।१।७७....( ष. त. पु. )

**धर्मचक्रम्**—धर्मं प्रकाशयति इति धर्मप्रकाशकम्, 'णकतृचौ' ५।१।४८....णक, धर्मप्रकाशकम् चक्रं—धर्मचक्रम् , तद्—धर्मचक्रम् । ( म. प. लो. क. )

**सत्यागा**—त्यागेन सह वर्तते या सा—सत्यागा । (सहार्थ.ब.व्री.)

**अमितरुक्**—न मिता—अमिता, ( न. त. पु. ) अमिता रुक् यस्य तद्—अमितरुक् , तद्—अमितरुक् । ( स. ब. व्री. )

**दावतारम्**—दाव इव तारम्—दावतारम् , तद्—दावतारम् । ( उप. पू. क. )

**सिद्धान्तः स्तादहितहतयेऽख्यापयद्यं जिनेन्द्रः,**
**सद्राजीवः स कविधिषणापादनेऽकोपमानः ।**

दक्षः साक्षाच्छ्रवणचुलुकैर्यं च मोदाद् विहायः-
सद्राजीवः सकविधिषणाऽपादनेकोपमानः ॥३॥३१॥

अन्वय—सद्राजीवः कविधिषणापादने दक्षः अकोपमानः अनेकोपमानः जिनेन्द्रः यम् अख्यापयत् यं च सकविधिषणा विहायःसद्राजी श्रवणचुलुकैः मोदात् साक्षात् अपात् सः सिद्धान्तः वः अहितहतये स्तात्.....

**અર્થ**-સુંદર કમલવાળા, કવિઓની પ્રતિભાને પ્રગટ કરવામાં કુશલ, કોપ અને માન વગરનાં, અનેક ઉપમાવાળા, એવા જિનેશ્વરદેવે જે (સિદ્ધાંત)ને કહ્યો અને જેનું શુક્રદેવ બૃહસ્પતિ સહિત ગગનવાસી (દેવો)ની શ્રેણીએ કાનરૂપ અંજલિવડે હર્ષથી સાક્ષાત્ પાન કર્યું તે ( કવિઓની પ્રતિભાને પ્રગટ કરવામાં કુશલ, અનેક ઉપમાવાળો એવો ) સિદ્ધાંત તમારા અહિતના નાશને માટે થાઓ....

**समास**—

**अहितहतये**—न हितम्—अहितम्, (न. त. पु.) अहितस्य हतिः—अहितहतिः, तस्यै—अहितहतये। 'कृति' ३।१।७७ (ष.त.पु.)

**जिनेन्द्रः**—जिनानाम् इन्द्रः—जिनेन्द्रः। (ष. त. पु.)

**सद्राजीवः**—सन्ति राजीवानि यस्य सः—सद्राजीवः। (स.ब.व्री.)

**कविधिषणापादने**—कवीनां धिषणा—कविधिषणा, (ष. त. पु.) कविधिषणायां अपादनम्—कविधिषणापादनम्, तस्मिन्—कविधिषणापादने। 'कृति' ३।१।७७...(ष. त. पु.)

**अकोपमानः**—कोपश्च मानश्च—कोपमानौ, (इ. द्व.)

न विद्येते कोपमानौ यस्य सः—अकोपमानः। (न. ब. व्री.)

**श्रवणचुलुकैः**—श्रवणानि एव चुलुकाः—श्रवणचुलुकाः, तैः—श्रवणचुलुकैः। (अव. पू. क.)

**विहायः-सद्राजी**—विहायसि सीदन्ति इति—विहायःसदः, (उप.त.पु.) 'क्विप्' ५।१।१५८...क्विप्, विहायःसदाम् राजी—विहायः-सद्राजी । ( ष. त. पु. )

**सकविधिषणा**—कविश्च धिषणश्च—कविधिषणौ, ( इ. द्व. ) कविधिषणाभ्यां सह वर्तते या सा—सकविधिषणा । ( सहार्थ. ब. व्री. )

**अनेकोपमानः**—न एकानि—अनेकानि, ( न. त. पु. ) अनेकानि उपमानानि यस्य सः—अनेकोपमानः । ( स. ब. व्री. )

**वज्राङ्कुश्यङ्कुशकुलिशभृत्! त्वं विधत्स्व प्रयत्नं**
**स्वायत्यागे! तनुभदवने हेमताराऽतिमत्ते।**
**अध्यारूढे! शशधरकरश्वेतभासि द्विपेन्द्रे**
**स्वायत्याऽगेऽतनुमदवने हेऽमतारातिमत्ते! ॥४॥३२॥**

अन्वय—अङ्कुशकुलिशभृत्! स्वायत्यागे! अतिमत्ते! शशधरकरश्वेतभासि, स्वायत्या अगे, अतनुमदवने द्विपेन्द्रे अध्यारूढे! अमतारातिमत्ते! हे वज्राङ्कुशि! हेमतारा त्वं तनुमदवने प्रयत्नं विधत्स्व ।

**અર્થ**—અંકુશ અને વજ્રને ધારણ કરનારી સુંદર ( ધનનું ) આગમન અને ત્યાગ છે જેને એવી, અત્યંત મદવાળા, ચંદ્રનાં કિરણ જેવી સફેદ કાંતિવાળા, પોતાની વિશાલતા વડે પર્વત જેવા, અત્યંત મદરૂપી પાણીવાળા, ગજરાજ ઉપર બેઠેલી, નથી ઇષ્ટ શત્રુપણુ જેને એવી, હે વજ્રાંકુશીદેવી! સુવર્ણ જેવી કાન્તિવાળી તું પ્રાણીઓનાં રક્ષણને વિષે પ્રયત્ન કર....

**समास—**

**अङ्कुशकुलिशभृत्**—अङ्कुशश्च कुलिशश्च—अङ्कुशकुलिशौ, (इ.द्व.) अङ्कुशकुलिशौ बिभर्ति—अङ्कुशकुलिशभृत्, तत्संबोधनम्—अङ्कुशकुलिशभृत्! ( उप. त. पु. ) 'क्विप्' ५।३।१४८....क्विप्।

**स्वायत्यागे**—आयश्च त्यागश्च-आयत्यागौ, ( इ. द्व. ) शोभनौ आयत्यागौ यस्याःसा-स्वायत्यागा, तत्संबोधनम्-स्वायत्यागे!(अव्यय.ब.व्री.)।

**तनुमदवने**—तनुः अस्ति येषां ते—तनुमन्तः, 'तदस्या.' ७।२।१....मतु, तनुमताम् अवनम्—तनुमदवनम्, तस्मिन्—तनुमदवने। 'कृति' ३।१।७७....( ष. त. पु. )

**हेमतारा**—हेमवत् तारा-हेमतारा। ( उप. पू. क. )

**अतिमत्ते**—अतिशयः मत्तः—अतिमत्तः, तस्मिन्—अतिमत्ते। (प्रा.त.पु.)

**शशधरकरश्वेतभासि**—शशं धरतीति—शशधरः, ( उप. त. पु. ) 'आयुधादिभ्यो धृगोऽदण्डादेः' ५।१।९४....अच्, शशधरस्य करः शशधरकरः, ( ष. त. पु.) श्वेता। चासौ भाश्च—श्वे(त)भाः, (वि. पू. क.) शशधरकरवत् श्वेतभाः यस्य सः—शशधरकरश्वेतभाः, तस्मिन्—शशधरकरश्वेतभासि। ( उप. ब. व्री. )

**द्विपेन्द्रे**—द्वाभ्यां पिबति इति—द्विपः, 'स्थापा०' ५।१।१४२ ...क, द्विपानाम् इन्द्रः—द्विपेन्द्रः, तस्मिन्—द्विपेन्द्रे। ( ष. त. पु. )

**स्वायत्या**—स्वस्य आयतिः-स्वायतिः, तया—स्वायत्या।(ष.त.पु.)

**अगे**—न गच्छति—अगः, तस्मिन्—अगे। 'नाम्नो गमः.' ५।१।१३१...ड ( उप. त. पु. )

**अतनुमदवने**—न तनु—अतनु, ( न. त. पु.) मद एव वनम्—मदवनम्, ( अव. पू. क. ) अतनु मदवनं यस्य सः—अतनुमदवनः, तस्मिन्—अतनुमदवने। ( स. ब. व्री. )

**अमतारातिमत्ते!**—अरातिः अस्ति यस्य तद्—अरातिमत्, अरातिमतः भावः—अरातिमत्ता, 'भावे त्वतल्' ७।२।५०...तल्, न मता—अमता, ( न. त. पु. ) अमता अरातिमत्ता यस्याः सा—अमतारातिमत्ता, तत्संबोधनम्—अमतारातिमत्ते! ( स. ब. व्री. )

॥ श्री सुविधिजिनस्तुतिः ॥

तवाऽभिवृद्धिं सुविधिर्विधेयात्
स भासुरालीनतपा दयावन् ! ।
यो योगिपङ्क्त्या प्रणतो नभः-सत्-
सभासुरालीनतपादयाऽवन् ॥ १ ॥ ३२॥

अन्वय—दयावन् ! नभःसत्सभासुरालीनतपादया योगिपङ्क्त्या यः प्रणतः अवन् भासुरालीनतपाः सः सुविधिः तव अभिवृद्धिं विधेयात् ।

અર્થ-હે દયાવાળા (માણસ)! ગગનવાસીઓ (દેવો)ની પર્ષદા અને અસુરોની શ્રેણીવડે નમાયેલાં છે ચરણ જેમનાં એવા યોગીઓની પંક્તિવડે જે નમાયેલાં છે, રક્ષણ કરતાં, આશ્રય કરાયો છે ભીષ્મ તપ જેના વડે એવા તે સુવિધિનાથ ભગવાન તારા અભ્યુદયને કરો...

समास–

सुविधिः—शोभनः विधिः यस्य सः—सुविधिः । (अन्य.ब.व्री ।)

भासुरालीनतपाः—भासुरम् आलीनं तपः येन सः—भासुरालीनतपाः (स. ब. ब. व्री.)

दयावन्—दया अस्ति यस्य सः—दयावान् । तत्संबोधनम्—दयावन् ! 'तदस्या०' ७।२।१....मतु ।

योगिपङ्क्त्या—योगः अस्ति येषां ते—योगिनः, 'अतोऽनेक०' ७।२।६...इन्, योगिनां पङ्क्तिः—योगिपङ्क्तिः,तया—योगिपङ्क्त्या । (ष. त. पु.)

नभःसत्सभासुरालीनतपादया— नभसि सीदन्ति— नभःसदः, (उप. त. पु.) 'क्विप्' ५।१।१४८.... क्विप्, नभःसदां सभा—

नभःसत्सभा, (ष. त. पु.) असुराणाम् आली–असुराली, (ष. त. पु.) नभःसत्सभा च असुराली च–नभःसत्सभासुराल्यौ, (इत. द्व.) नभःसत्सभासुरालीभ्यां नतौ पादौ यस्याः सा–नभःसत्सभासुरालीनतपादा, तया–नभःसत्सभासुरालीनतपादया। (व्य. ब. व्री.)

**या जन्तुजाताय हितानि राजी,**
**सारा जिनानामलपद् ममालम्।**
**दिश्यान्मुदं पादयुगं दधाना**
**सा राजिनानामलपद्ममालम् ॥२॥३४॥**

**अन्वय**—या जन्तुजाताय हितानि अलपत् सा सारा राजिनानामलपद्ममालम् पादयुगं दधाना जिनानां राजी मम अलम् मुदम् दिश्यात्।

**અર્થ**–જેણે (જિનેશ્વરદેવની શ્રેણીએ) પ્રાણીઓનાં સમૂહનાં હિતને કહ્યું તે બલવાળી, શોભવાના સ્વભાવવાળી વિવિધપ્રકારનાં સુંદર કમલની શ્રેણી છે જેમે એવા ચરણ યુગલને ધારણ કરતી એવી જીનેશ્વરભગવંતોની શ્રેણી મને અત્યંત હર્ષને બતાવો (આપો)

**समास**–

**जन्तुजाताय**—जन्तूनां जातम्–जन्तुजातम्, तस्मै–जन्तुजाताय। (ष. त. पु.)

**पादयुगम्**— पादयोः युगम्– पादयुगम्, तद्– पादयुगम्। (ष. त. पु.)

**राजिनानामलपद्ममालम्**—राजते इत्येवं शीला–राजिनी, न मलानि– अमलानि, (न. त. पु.) अमलानि पद्मानि–अमलपद्मानि,

( वि. पू. क.) नाना अमलपद्मानि—नानामलपद्मानि, (वि. पू. क.) नानामलपद्मानां माला—नानामलपद्ममाला, ( ष. त. पु. ) राजिनी नानामलपद्ममाला यस्य तद्—राजिनानामलपद्ममालम् , तद्—राजिनानामलपद्ममालम् । ( स. ब. व्री. )

**जिनेन्द्र ! भङ्गैः प्रसभं गभीराऽऽ-**
**शु भारती शस्यतमस्तवेन ।**
**निर्नाशयन्ती मम शर्म दिश्यात्-**
**शुभाऽरतीशस्य तमस्तवेन ! ॥ ३ ॥ ३५ ॥**

**अन्वय—रतीशस्य ( अरतीशस्य ) इन ! जिनेन्द्र ! भङ्गैः प्रसभं गभीरा, शस्यतमस्तवेन तमः आशु निर्नाशयन्ती, शुभा तव भारती मम शर्म दिश्यात् ।**

**અર્થ**—કામદેવનાં સ્વામિ અથવા નથી કામ જેઓને વિષે એવા ( મુનિઓ )નાં સ્વામિ (તેવા )હે જિનેશ્વર ભગવંત ! વિકલ્પોવડે અત્યંત ગંભીર, પ્રશંસનીય સ્તવના વડે ( અજ્ઞાનરૂપી ) અંધકારનો જલ્દીથી નાશ કરતી સુંદર તારી વાણી મને કલ્યાણ ( સુખ ) આપો

**समास—**

**जिनेन्द्र !**—जिनानामिन्द्रः—जिनेन्द्रः, तत्संबोधनम्—जिनेन्द्र ! । ( ष. त. पु. )

**शस्यतमस्तवेन**—अतिशयेन शस्यः—शस्यतमः, 'प्रकृष्टे तमप्' ७।३।५...तमप् शस्यतमश्चासौ स्तवश्च—शस्यतमस्तवः, तेन—शस्यतमस्तवेन । ( वि. पू. क. )

**रतीशस्य**—रत्याः ईशः—रतीशः, तस्य—रतीशस्य। (ष. त. पु.)

**अथवा अरतीशस्य**—न विद्यते रतिः येषां ते—अरतयः, (मुनयः) ( न. ब. व्री. ) अरतीनाम् ईशः—अरतीशः, तस्य—अरतीशस्य । (ष.त.पु.)

दिश्यात्तवाशु ज्वलनायुधाऽल्प-
मध्या सिता कं प्रवरालकस्य ।
अस्तेन्दुरास्यस्य रुचोरु पृष्ठ-
मध्यासिताऽकम्प्रवरालकस्य ॥४॥ ३६॥

अन्वय—अल्पमध्या सिता प्रवरालकस्य आस्यस्य रुचा अस्तेन्दुः अकम्प्रवरालकस्य उरु पृष्ठम् अध्यासिता ज्वलनायुधा तव आशु कं दिश्यात् ।

અર્થ—સૂક્ષ્મ છે મધ્યભાગ જેણીનો એવી, શ્વેતવર્ણવાળી, સુંદર કેશવાળા મુખની શોભાથી પરાજીત કરાયો છે ચંદ્ર જેના-વડે તેવી, સ્થિર રહેવાના સ્વભાવવાળા વરાહની વિશાલ પીઠ પર બેઠેલી, દેદીપ્યમાન છે આયુધ જેના એવી અથવા અગ્નિ છે શસ્ત્ર જેનુ એવી જ્વલનાયુધાદેવી તને જલ્દી સુખ આપો...

समास—

ज्वलनायुधा—ज्वलनानि आयुधानि यस्याः सा—ज्वलनायुधा, (स. ब. व्री.)। अथवा—ज्वलनमेव आयुधं यस्याः सा—ज्वलनायुधा। (उप. ब. व्री.)

अल्पमध्या—अल्पं मध्यं यस्याः सा—अल्पमध्या। (स. ब. व्री.)

प्रवरालकस्य—प्रवराः अलकाः यस्य तद्—प्रवरालकम्, तस्य—प्रवरालकस्य। (स. ब. व्री.)

अस्तेन्दुः—अस्तः इन्दुः यया सा—अस्तेन्दुः (स. ब. व्री.)।

अकम्प्रवरालकस्य—कम्पते इत्येवं शीलः—कम्प्रः, 'स्म्यजस-हिंसदीपकम्प०' ५।२।७९...२। न कम्प्रः—अकम्प्रः, (न. त. पु.) अकम्प्रः वरालकः—अकम्प्रवरालकः, तस्य—अकम्प्रवरालकस्य। (वि.पू.क.)

अथ ॥ श्रीशीतलनाथजिनस्तुतिः ॥

जयति शीतलतीर्थकृतः सदा,
चलनतामरसं सदलं घनम् ।
नवकमम्बुरुहां पथि संस्पृशत्-
चलनतामरसंसदलङ्घनम् ॥१॥ ॥३७॥

अन्वय—शीतलतीर्थंकृतः सदलं, घनं अम्बुरुहां नवकं, पथि संस्पृशत्, चलनतामरसंसत्, अलङ्घनम्, चलनतामरसम् सदा जयति!

અર્થ-શ્રી શીતલનાથપ્રભુનાં પત્રવાળા, નિબિડ કમલોનાં નવકને માર્ગમાં સ્પર્શ કરતા, ચંચલ અને નમેલા દેવોની સભા છે જેને વિષે એવા, ઉલ્લંઘન ન કરી શકાય એવા ચરણકમલ હંમેશા જય પામે છે.

समास—

शीतलतीर्थंकृतः—तीर्थं करोति—तीर्थंकृत्, (उप. त. पु.) 'क्विप्' ५।१।१४८...क्विप्, शीतलः नाम यस्य सः—शीतलनामा (स. ब. व्री.) शीतलनामा चासौ तीर्थकृच्च—शीतलतीर्थकृत्, तस्य—शीतलतीर्थकृतः। (म. प. लो. क.)

चलनतामरसम्—चलनमेव तामरसं—चलनतामरसम्।(अव.पू.क.)

सदलम्—दलैःसह वर्तते यद् तद्—सदलम्, तद्—सदलम्। (सहार्थ. ब. व्री.)

अम्बुरुहाम्—अम्बुनि रोहन्ति स्म—अम्बुरुहिः, तेषाम्—अम्बुरुहाम्। (उप. त. पु.) 'क्विप्' ५।१।३४८...क्विप्।

**चलनतामरसंसद्**—नताः अमराः–नतामराः, (वि. पू. क.) चलाः नतामराः–चलनतामराः, (वि. पू. क.) चलनतामराणां संसद् यस्मिन् तद्–चलनतामरसंसद्। (व्य. ब. व्री.)

**अलङ्घनम्**—नास्ति लङ्घनम् यस्य तद्–अलङ्घनम्। (न. ब. व्री.)

**स्मर जिनान् परिनुन्नजरारजो–**
**जननतानवतोदयमानतः ।**
**परमनिर्वृतिशर्मकृतो यतः**
**जन ! नतानवतोऽदयमानतः ॥ २ ॥ ॥ ३८ ॥**

अन्वय—**परिनुन्नजरारजोजननतानवतोदयमान्, नतान् अदयमानतः अवतः अतः परमनिर्वृतिशर्मकृतः जिनान् जन ! यतः स्मर ।**

**અર્થ**–દૂર કરાયા છે વૃદ્ધત્વ–(કર્મરૂપી) રજ, જન્મ. (દેહ સંબંધી) દુર્બલતા, પીડા અને મૃત્યુ જેના વડે એવા, નમેલાં (માણસો)નું નિર્દયમાણસથી રક્ષણ કરતાં, આથી પરમ મોક્ષ સુખને કરનાર (આપનાર) એવા જિનેશ્વરદેવોનું હે માણસ ! આ કારણથી–તું સ્મરણ કર.

समास–

**परिनुन्नजरारजोजननतानवतोदयमान्**—जरा च रजश्च जननं च तानवं च तोदश्च यमश्च–जरारजोजननतानवतोदयमाः, (इ. द्व.) परिनुन्नाः जरारजोजननतानवतोदयमाः यैः ते–परिनुन्नजरारजोजननतानवतोदयमाः, तान्–परिनुन्नजरारजोजननतानवतोदयमान्। (स. ब. व्री.)

**परमनिर्वृतिशर्मकृतः**—निर्वृत्तेः शर्म–निर्वृत्तिशर्म (ष. त. पु.) परमं च तद् निर्वृतिशर्म च–परमनिर्वृतिशर्म। 'सन्महत्'० ३।१।१०७

( वि. पू. क. ) परमनिर्वृतिशर्म कुर्वन्ति–परमनिर्वृतिशर्मकृतः तान्–परमनिर्वृतिशर्मकृतः ( उप. त. पु. ) 'क्विप्' ५।१।१४८....क्विप् ।

अदयमानतः— दयते–दयमानः, न दयमानः–अदयमानः, ( न. त. पु. ) अदयमानात् – इति– अदयमानतः 'अहीयरुहो०' ७।२।८८...तस्

**जयति कल्पितकल्पतरूपमं,**
**मतमसारतरागमदारिणा ।**
**प्रथितमत्र जिनेन मनीषिणा–**
**मतमसा रतरागमदारिणा ॥ ३ ॥ ३९ ॥**

अन्वय––अत्र असारतरागमदारिणा अतमसा मनीषिणां रतरागमदारिणा जिनेन प्रथितं कल्पितकल्पतरूपमं मतं जयति ।

અર્થ–અહિં (આ લોકને વિષે) અત્યંત સાર વગરનાં આગમનું ખંડન કરનારા. (અજ્ઞાનરૂપી) અંધકાર વિનાનાં, તથા બુદ્ધિશાળીઓનાં મૈથુન સંબંધી રાગ અને મદનાં શત્રુભુત એવા જિનેશ્વરભગવંતવડે પ્રરૂપેલ, ઘટિત થઈ છે કલ્પવૃક્ષની ઉપમા જેને એવો સિધ્ધાંત જય પામે છે...

समास—

कल्पितकल्पतरूपमम्—कल्पतरोः उपमा–कल्पतरूपमा, (ष.त.पु.) कल्पिता कल्पतरूपमा यस्य तत्–कल्पितकल्पतरूपमम् । (स. ब. व्री. )

असारतरागमदारिणा—अतिशयेन असारः–असारतरः, असारतरश्चासौ आगमश्च–असारतरागमः, ( वि. पू. क. ) असारतरागमं दारयति–असारतरागमदारी, तेन–असारतरागमदारिणा । ( उप. त. पु. ) 'अजातेः' ५।१।१५४...णिन् ।

**अतमसा**—न विद्यते तमः यस्य सः—अतमाः, तेन—अतमसा। ( न. ब. व्री. )

**रतरागमदारिणा**—रते रागः रतरागः, ( स. त. पु. ) रतरागश्च मदश्च—रतरागमदौ, ( इ. द्व. ) रतरागमदयोः अरिः (इव)—रतरागमदारिः, तेन—रतरागमदारिणा। (ष. त. पु.)

**घनरुचिर्जयताद् भुवि मानवी,**
**गुरुतराविहतामरसंगता।**
**कृतकराऽस्त्रवरे फलपत्रभा-**
**गुरुतराविह तामरसं गता ॥ ४ ॥ ॥ ४० ॥**

**अन्वय**—इह भुवि घनरुचिः गुरुतराविहतामरसंगता, फलपत्रभागुरुतरौ अस्त्रवरे कृतकरा, तामरसं गता मानवी जयतात्।

**અર્થ**—આ પૃથ્વી ઉપર મેઘ જેવી કાન્તિવાળી, ઘણામોટા અને ( કોઈથી )ના હણી શકાય તેવા દેવોથી યુક્ત, ફલ અને પત્રને ભજનારા મોટા વૃક્ષરૂપી શ્રેષ્ઠ શસ્ત્રને વિષે કર્યો ( રાખ્યો ) છે હાથ જેને એવી, અથવા, ફલ અને પત્રની શોભાથી યુક્ત મોટા વૃક્ષ રૂપ શ્રેષ્ઠ શસ્ત્રને વિષે કર્યો ( રાખ્યો ) છે હાથ જેને એવી, લાલકમળ ઉપર બેઠેલી માનવી દેવી જય પામો...

**समास**–

**घनरुचिः**—घनवत् रुचिः यस्याः सा—घनरुचिः। (उप. ब. व्री.)

**गुरुतराविहतामरसंगता**—अतिशयेन गुरवः—गुरुतराः, न विहताः अविहताः, ( न. त. पु. ) अविहताश्चामी अमराश्च—अविहतामराः, ( वि. पू. क. ) गुरुतराश्चामी अविहतामराश्च—गुरुतराविहतामराः, ( वि. पू. क. ) गुरुतराविहतामरैः संगता—गुरुतराविहतामरसंगता, ( तृ. त. पु. )

कृतकरा——कृतः करः यया सा—कृतकरा। (स. ब. त्री.)

अस्त्रवरे——अस्त्रेषु वरः—अस्त्रवरः, तस्मिन्—अस्त्रवरे। (स.त.पु.)

फलपत्रभागुरुतरौ—फलानि च पत्राणि च फलपत्राणि, (इ. द्व.) फलपत्राणि भजते—फलपत्रभाग्, (उप. त. पु.) 'भजो विण्' ५।१।१४६ ...विण्, उरुश्चासौ तरुश्च—उरुतरुः, (वि. पू. क.) फलपत्रभाग् उरुतरुः फलपत्रभागुरुतरुः, तस्मिन्—फलपत्रभागुरुतरौ। (वि. पू. क.)

(२) फलपत्राणां भा—फलपत्रभा, (ष.त.पु.)फलपत्रभया युक्तः—फलपत्रभायुक्तः, (तृ.त.पु.) गुरुश्चासौ तरुश्च—गुरुतरुः, (वि.पू.क.) फलपत्रभायुक्तश्चासौ गुरुतरुश्च—फलपत्रभागुरुतरुः, तस्मिन्—फलपत्रभागुरुतरौ। (म. प. लो. क.)

## ॥ श्री श्रेयांसजिनस्तुतिः ॥

(राग उपशमरसमां...)

**कुसुमधनुषा यस्मादन्यं न मोहवशं व्यधुः ।**
**कमलसदृशां गीताराव्रा बलादयि तापितम् ।**
**प्रणमततरां द्राक् श्रेयांसं न चाहृत यन्मनः ।**
**कमलसदृशाङ्गी तारा वाऽबला दयिताऽपि तम्॥१॥४१॥**

अन्वय——अलसदृशां गीतारावाः यस्माद् अन्यं कं कुसुमधनुषा बलात् तापितं मोहवशं वा न व्यधुः ? यन्मनश्च कमलसदृशाङ्गी, तारा, अबला, दयिता अपि वा न आहृत, तम् श्रेयांसम् अयि द्राक् प्रणमततराम्।

અર્થ–મન્દ (નમણી) દષ્ટિવાળી (સ્ત્રીઓ)નાં અથવા મંદદષ્ટિવાળા (ગાંધર્વો)નાં ગીતનાં અવાજે જે (શ્રેયાંસનાથ ભગવાન)ના સિવાય કોને કામદેવ વડે બલાત્કારે પીડાયેલા એવા મોહને વશ નથી કર્યા ? અને જેનાં મનને કમલસરખા દેહવાળી, ઉજ્જવલ, અન્યસ્ત્રીએ કે (પોતાની) સ્ત્રીએ પણ હરણ નથી કર્યું એવા તે શ્રી શ્રેયાંસનાથ પ્રભુને હે (માણસો)! તમે જલ્દીથી ભાવપૂર્વક નમસ્કાર કરો.

समास—

**कुसुमधनुषा**——कुसुममेव धनुः यस्य सः—कुसुमधनुः, तेन—कुसुमधनुषा । ( उ. ब. व्री. )

**मोहवशम्**——मोहस्य वशः—मोहवशः, तम्—मोहवशम् । (ष.त.पु.)

**अलसदृशाम्**——अलसाः दृशः यासां ताः येषां ते वा—अलसदृशः, तासाम्–तेषाम्–वा–अलसदृशाम् । ( स. ब. व्री. )

**गीतारावाः**——गीतस्य आरावाः–गीतारावाः । (ष. त. पु.)

**प्रणमततराम्**—अतिशयेन प्रणमत–प्रणमततराम् । 'क्रित्याद्येऽव्ययाद०' ७।३।८...तर अने अन्त्यनो आम् ।

**यन्मनः**—यस्य मनः—यन्मनः, तद्–यन्मनः । ( ष. त. पु. )

**कमलसदृशाङ्गी**—कमलेन सदृशम् अङ्गं यस्याः सा—कमलसदृशाङ्गी । ( त्र्य. ब. व्री. )

**अबला**—अविद्यमानं बलं यस्याः सा—अबला । ( न. ब. व्री. )

**जिनवरततिर्जीवालीनामकारणवत्सलाऽ**
**समदमहिताऽमारा दिष्टासमानवरा जया ।**
**नमदमृतभुक्पङ्क्त्या नूता तनोतु मतिं ममाऽ**
**समदमहितामारादिष्टा समानवराजया ॥२॥४२॥**

**अन्वय**——जीवालीनाम् अकारणवत्सला असमदमहिता अमारा दिष्टासमानवरा जया आराद् इष्टा समानवराजया नमदमृतभुक्पङ्क्त्या नूता जिनवरततिः मम असमदमहिताम् मतिम् तनोतु ।

અર્થ–જીવોની શ્રેણી તરફ કારણ વિના જ વાત્સલ્યવાળી, અસાધારણ ઇન્દ્રિયનિગ્રહવાળાં (મુનિઓ)ને હિતકારી, નથી કામદેવ જેને વિષે એવી, અપાયું છે અસાધારણ વરદાન જેનાવડે એવી, જય પામનારી, સમીપથી જ સેવાયેલી, માનવોનાં રાજા સહિત નમતાં એવાં દેવોની શ્રેણીવડે સ્તુતિ કરાયેલી, જિનેશ્વરદેવની શ્રેણી મારી મદ વગરનાં માણસોથી પૂજાયેલી એવી મતિને વિસ્તારો...

**समास—**

**जिनवरततिः**—जिनेषु वराः—जिनवराः, ( स. त. पु. ) जिनवराणां ततिः—जिनवरततिः । ( ष. त. पु. )

**जीवालीनाम्**—जीवानाम् आल्यः—जीवाल्यः, तासाम्—जीवालीनाम् । ( ष. त. पु. )

**अकारणवत्सला**—न विद्यते कारणं यस्मिन् तत्—अकारणम्, ( न. ब. व्री. ), अकारणं वत्सलं यस्याम् सा—अकारणवत्सला । ( स. ब. व्री. )।

**असमदमहिता**—न समः—असमः, ( न. त. पु. ) असमः दमः येषां ते—असमदमाः ( मुनयः ), ( स. ब. व्री. ) असमदमेभ्यः हिता—असमदमहिता । 'हितादिभिः' ३।१।७१, (च.त.पु. )

**अमारा**—न विद्यते मारः यस्याः सा—अमारा । (न.ब.व्री. )

**दिष्टासमानवरा**—न समानाः—असमानाः, ( न. त. पु. ) दिष्टाः असमानाः वराः यया सा—दिष्टासमानवरा । (स.ब.व्री.)

**नमदमृतभुक्पङ्क्त्या**—अमृतं भुञ्जन्ति इति अमृतभुजः ( उप. त. पु. ) 'क्विप्' ५।१।१४८...क्विप्, नमन्तः अमृतभुजः—नमदमृतभुजः ( वि. पू. क. )

नमदमृतभुजां पङ्क्तिः—नमदमृतभुक्पङ्क्तिः, तया—नमदमृतभुक्पङ्क्त्या । ( ष. त. पु. )

**असमदमहिताम्**—मदेन सह वर्तन्ते ये ते—समदाः, ( सहार्थ. ब. व्री. ) न समदाः—असमदाः, ( न. त. पु. ) असमदैः महिता—असमदमहिता, ताम्—असमदमहिताम् । ( तृ. त. पु. )

**समानवराजया**—मानवानां राजानः—मानवराजाः ( ष. त. पु. ) 'राजन्-सखेः' ७।३।१०६....अट् समासान्त, मानवराजैः सह वर्तते या सा—समानवराजा, तया—समानवराजया । ( सह. ब. व्री. )

**भवजलनिधिभ्राम्यज्जन्तुव्रजायतपोत ! हे,**
**तनुमति मतां सन्नाशानां सदा नरसम्पदम् ।**
**समभिलषतामर्हन्नाथागमानतभूपतिं,**
**तनु मतिमतां सन्नाशानां सदानरसं पदम् ॥३॥४३॥**

अन्वय—भवजलनिधिभ्राम्यज्जन्तुव्रजायतपोत ! हे अर्हन्नाथागम ! सन्नाशानां सन्नाशानां तनुमति मताम्, आनतभूपतिम्, नरसम्पदम् समभिलषताम् मतिमताम् सदानरसम् पदम् सदा तनु ।

**અર્થ**—સંસાર સાગરને વિષે ભમતાં પ્રાણીઓનાં સમૂહને તારવામાં વિશાલ પ્રવહણ સમાન, હે અરિહંતપ્રભુનાં આગમ ! નાશ પામી છે આશાઓ જેની એવા, વિદ્યમાન છે નાશ—મૃત્યુ જેને એવા અને પ્રાણીઓને વિષે માન્ય થયેલી, નમ્યા છે રાજાઓ જેને એવી માનવસંપત્તિને ઇચ્છતાં એવા બુદ્ધિશાલીઓનાં દાન-( ત્યાગ )નાં રસવાળા સ્થાનનો વિસ્તાર કર...અથવા—દાનરૂપી રસવાળા સ્થાનને આપો...

**समास**—

भवजलनिधिभ्राम्यज्जन्तुव्रजायतपोत !—जलानि निधीयन्ते यत्र—जलनिधिः, ( उप. त. पु. ) 'व्याप्यादाधारे' ५।३।८८....कि, भव

एव जलनिधिः–भवजलनिधिः, ( अव. पू. क. ) भ्राम्यन्तश्चामी जन्तवश्च–भ्राम्यज्जन्तवः, ( वि पू. क. ) भवजलनिधौ भ्राम्यज्जन्तवः–भवजलनिधिभ्राम्यज्जन्तवः, ( स. त. पु. ) भवजलनिधिभ्राम्यज्जन्तूनां व्रजः–भवजलनिधिभ्राम्यज्जन्तुव्रजः, ( ष. त. पु. ) भवजलनिधिभ्राम्यज्जन्तुव्रजम् उत्तारयतीति–भवजलनिधिभ्राम्यज्जन्तुव्रजोत्तारकः, (उप.त.पु.) 'णकतृचौ' ५।१।४८...णक, आयतः पोतः–आयतपोतः, (वि.पू.क.) भवजलनिधिभ्राम्यज्जन्तुव्रजोत्तारकश्चासौ आयतपोतश्च–भवजलनिधिभ्राम्यज्जन्तु–व्रजायतपोतः, तत्संबोधनम्–भवजलनिधिभ्राम्यज्जन्तुव्रजायतपोत !। ( म. प. लो. क. )

**तनुमति**—तनुः अस्ति यस्मिन्–तनुमान्, तस्मिन्–तनुमति । 'तदस्या०' ७।२।१...मतु ।

**सन्नाशानाम्**—सन् नाशः येषां ते–सन्नाशाः, तेषाम्–सन्नाशानाम् । ( स. ब. व्री. )

**नरसम्पदम्**—नराणां सम्पद्–नरसम्पद्, ताम्–नरसम्पदम् । ( ष. त. पु. )

**अर्हन्नाथागम !**—अर्हति पूजामिति–अर्हन्, 'सुगद्विषार्हः सत्रिशत्रु–स्तुत्ये:' ५।१।१९....शतृ, अर्हश्चासौ नाथश्च–अर्हन्नाथः, ( वि. उ. क. ) अर्हन्नाथेन प्रणीतः–अर्हन्नाथप्रणीतः, ( तृ. त. पु. ) अर्हन्नाथप्रणीतश्चासौ आगमश्च–अर्हन्नाथागमः, तत्संबोधनम्–अर्हन्नाथागम ! (म.प. लो. क.)।

**आनतभूपतिम्**—भुवां पतयः–भूपतयः, ( ष. त. पु. ) आनताः भूपतयः यस्याः सा–आनतभूपतिः, ताम्–आनतभूपतिम् । (स. ब. व्री.)।

**मतिमताम्**—मतिरस्ति येषाम्–मतिमन्तः, तेषाम्––मतिमताम् ।

**सन्नाशानाम्**—सन्ना आशा येषां ते–सन्नाशाः, तेषाम्–सन्नाशानाम् । ( स. ब. व्री. )

सदानरसम्—दानमेव रसः-दानरसः, (अव. पू. क.) अथवा दानस्य रसः-दानरसः, (ष. त. पु.) दानरसेन सह वर्तते यद् तद् सदानरसम्, तद्-सदानरसम्। (सहार्थ. ब. व्री.)

**धृतपविफलाक्षालीघण्टैः करैः कृतबोधित-**
**प्रजयतिमहा कालीमर्त्याधिपङ्कजराजिभिः।**
**निजतनुलतामध्यासीनां दधत्यपरिक्षतां,**
**प्रजयति महाकाली मर्त्याधिपं कजराजिभिः ॥४॥४४॥**

**अन्वय—अर्त्याधिपङ्कजराजिभिः अपरिक्षतां, मर्त्याधिपम् अध्यासीनां, कालीं निजतनुलतां दधती, धृतपविफलाक्षालीघण्टैः कजराजिभिः करैः कृतबोधितप्रजयति-महा महाकाली प्रजयति।**

**અર્થ**-પીડા આધિ (માનસિક વ્યથા), મલ (દેહનો મલ) વૃદ્ધત્વ અને સંગ્રામવડે નહિ હણાયેલી, સુંદર માનવ ઉપર બેઠેલી. કાળી, એવી પોતાના શરીરરૂપી વેલડીને ધારણ કરતી, ધારણ કરાયા છે વજ્ર, ફલ, માળા અને ઘંટ જેઓવડે એવા, કમલ જેવા શોભવાના સ્વભાવવાળા હાથવડે કરાઈ છે બોધિત કરાયેલ પ્રજા જેના વડે એવા યતિઓની પૂજા જેના વડે એવી મહાકાલી દેવી અત્યંત જય પામે છે...

समास—

धृतपविफलाक्षालीघण्टैः—अक्षाणाम् आली—अक्षाली, (ष.त.पु.) पविश्च फलं च अक्षाली च घण्टा च—पविफलाक्षालीघण्टाः, (इ. द्व.) धृताः पविफलाक्षालीघण्टाः यैः ते—धृतपविफलाक्षालीघण्टाः, तैः—धृतपविफलाक्षालीघण्टैः। (स. ब. व्री.)

कृतबोधितप्रजयतिमहा—बोधिताः प्रजाः यैः ते—बोधितप्रजाः, (स. ब. व्री.) बोधितप्रजाः यतयः-बोधितप्रजयतयः, (वि. पू. क.)

बोधितप्रजयतीनां महः–बोधितप्रजयतिमहः, ( ष. त. पु. ) कृतः बोधित-प्रजयतिमहः यथा सा– कृतबोधितप्रजयतिमहा । ( स. ब. व्री. )

**अत्याधिपङ्कजराजिभिः**—अतिश्च आधिश्च पङ्कश्च जरा च आजिश्च–अत्याधिपङ्कजराजयः, तैः–अत्याधिपङ्कजराजिभिः । ( इ. द्व. )

**निजतनुलताम्**—निजस्य तनुः–निजतनुः, ( ष. त. पु. ) निज-तनुरेव लता–निजतनुलता, ताम्–निजतनुलताम् । ( अव. पू. क. )

**अपरिक्षताम्**—न परिक्षता–अपरिक्षता, ताम्–अपरिक्षताम् । ( न. त. पु. )

**मर्त्याधिपम्**—अधिकं पातीति–अधिपः, ( उप. त. पु. ) 'स्था–पा–स्ना–त्रः कः' ५।१।१४२....क, मर्त्येषुः अधिपः–मर्त्याधिपः, तम्–मर्त्याधिपम् । ( स. त. पु. )

**कजराजिभिः**—के जातम्–कजम्, कजवद् राजन्ते–कजरा-जिनः, तैः–कजराजिभिः । "अजातेः." ५।१।१५४....णिन्

॥ श्रीवासुपूज्यजिनस्तुतिः ॥

(स्रग्धरावृत्तम्)

पूज्य ! श्रीवासुपूज्याऽवृजिन !<br>
जिनपते ! नूतनादित्यकान्तेऽ–<br>
माया संसारवासावन ! वर !<br>
तरसाली नवालानबाहो ! ।<br>
आनम्रा त्रायतां श्रीप्रभव !<br>
भवभयाद् बिभ्रती भक्तिभाजा–<br>
मायसं सारवाऽसावनवरतंरसालीनवाला<br>
नवाऽहो ॥ १ ॥ ॥ ४५ ॥

अन्वय—अवृजिन ! नूतनादित्यकान्ते ! अमाय ! असंसार-वास ! अवन ! वर ! नवालानबाहो ! श्रीप्रभव ! अहो ! पूज्य ! श्रीवासुपूज्य ! जिनपते ! भक्तिभाजाम् आयासं बिभ्रती, नवा, सारवा, अनवरतरसालीनवाला आनम्रा असौ आली भवभयाद् तरसा त्रायताम्

**અર્થ**–નથી પાપ જેને વિષે એવા, નવા સૂર્ય જેવી કાન્તિ-વાળા, માયા વગરનાં, નથી સંસારવાસ જેને એવા, રક્ષક, શ્રેષ્ઠ, નવા આલાનસ્તંભ જેવા બાહુ વાળા, લક્ષ્મીના ઉત્પત્તિસ્થાન સમા, હે પૂજ્ય એવા શ્રી વાસુપૂજ્ય જીનેશ્વરદેવ! ભક્તિને ભજનારા (ભક્તો) ની, શ્રમને ધારણ કરતી, નવી. અવાજવાળી, સતત ભૂમિ ઉપર લીન છે વાળ જેના એવી, સારી રીતે નમેલી, આ શ્રેણી (આપનાવડે) સંસારના ભયથી જલ્દીથી રક્ષણ કરાય......

**समास**

**श्री–वासुपूज्य !**—वसुपूज्यस्यापत्यम्–वासुपूज्यः, 'ङसोऽपत्ये' ६।१।२८...अण् । **अथवा**—वसुभिः पूज्यः वसुपूज्यः, (तृ.त.पु.) अथवा—वसूनां पूज्यः वसुपूज्यः, (ष.त.पु.) वसुपूज्यरेव—वासुपूज्यः, 'प्रज्ञादिभ्योऽण्' ७।२।१६५....अण् , श्रिया युक्तः, वासुपूज्यः—श्रीवासुपूज्यः, तत्सं-बोधनम् श्रीवासुपूज्य ! ( म. प. लो. क. ) ।

**अवृजिन !**—–न विद्यते वृजिनं यस्य सः—अवृजिनः, तत्संबो-धनम्—अवृजिन ! ( न. ब. व्री. ) ।

**जिनपते !**—जिनानां पतिः—जिनपतिः, तत्संबोधनम्—जिनपते ! (ष. त. पु.) ।

**नूतनादित्यकान्ते!**—नूतनः आदित्यः—नूतनादित्यः, ( वि. पू. क.) नूतनादित्यस्य कान्तिः इव कान्तिः यस्य—सः—नूतनादित्यकान्तिः, तत्संबोधनम्–नूतनादित्यकान्ते ! ( उपमानोपमेय. ब. व्री. )

**अमाय !**—नास्ति माया यस्य सः—अमायः, तत्संबोधनम्—अमाय ! ( न. ब. व्री. )

**असंसारवास !**—संसारस्य वासः—संसारवासः, ( ष. त. पु. ) नास्ति संसारवासः यस्य सः—असंसारवासः, तत्संबोधनम्—असंसारवास ! ( न. ब. व्री. ) ।

**नवालानबाहो !**—नवः आलानः—नवालानः, ( वि. पू. क. ) नवालानवद् बाहू यस्य सः—नवालानबाहुः, तत्संबोधनम्—नवालानबाहो ! ( उ. ब. व्री. ) ।

**आनम्रा**—आ ( समन्तात् ) नमति इत्येवं शीला—आनम्रा । 'स्म्यजस०' ५।२।७६...र ।

**श्रीप्रभव !**—श्रियः प्रभवन्ति अस्मिन्—श्रीप्रभवः । तत्संबोधनम्—श्रीप्रभव ! । ( उप. त. पु. ) 'भूश्यदोऽल्' ५।३।२३....अल् ।

**भवभयाद्**—भवाद् भयम्—भवभयम्, तस्मात्—भवभयाद् । ( पं. त. पु. )

**भक्तिभाजाम्**—भक्तिं भजन्ति—भक्तिभाजः, तेषां—भक्तिभाजाम् । ( उ. त. पु. ) 'भजोविण्' ५।१।१४६....विण् ।

**सारवा**—आरवैः सह वर्तते या सा—सारवा । ( सह. ब. व्री. )

**अनवरतरसालीनवाला**—न अवरतम्–अनवरतम्, ( न. त. पु. ) रसायाम् आलीनाः रसालीनाः 'क्तेन' ३।१।९२....( स.त.पु.), अनवरतं रसालीनाः वालाः यस्याः सा अनवरतरसालीनवाला । (व्य.ब.व्री.)

अथवा—आलीनाः वालाः–आलीनवालाः, ( वि. पु. क. ) अनवरतं रसायाम् आलीनवालाः यस्याः सा—अनवरतरसालीनवाला । (व्य.ब.व्री.)

**पूतो यत्पादपांशुः शिरसि सुरततेराचरच्चूर्णशोभां,**
**या तापत्राऽसमानाऽप्रतिमदमवतीहारता राजयन्ती ।**
**कीर्त्तेः कान्त्या ततिः सा प्रविकिरतुतरां जैनराजीरजस्ते,**
**यातापत्त्रासमानाऽप्रतिमदमवती हारतारा जयन्ती**
**॥ २ ॥ ॥ ४६ ॥**

**अन्वय—सुरततेः शिरसि पूतः यत्पादपांशुः चूर्णशोभाम् आचरत् इह या अप्रतिमदम् अवति सा तापत्रा असमाना, अरता, राजयन्ती कीर्त्तेः कान्त्या हारताराः जयन्ती यातापत्त्रासमाना अप्रतिमदमवती जैनराजी ततिः ते रजः प्रविकिरतुतराम् ।**

અર્થ–દેવોની શ્રેણીનાં મસ્તક ઉપર પવિત્ર એવી જેના ચરણની રજ વાસક્ષેપની શોભા જેવું આચરણ કરતી હતી વળી આલોકને વિષે જે નથી વ્યાપ્ત મદ જેને એવા (મુનિઓ)નું રક્ષણ કરે છે તે તાપથી રક્ષણ કરનારી, અસાધારણ, અનાસક્ત, કીર્તિની કાન્તિવડે હાર અને તારા ને પરાજીત કરતી, અથવા હાર જેવી ઉજ્જવલ અને જય પામતી, ચાલ્યા ગયા છે–આપત્તિ, ત્રાસ અને માન જેમાંથી એવી, અદ્વિતીય છે ઇન્દ્રિયનિગ્રહ જેનો એવી, જિનેશ્વર ભગવંતની શ્રેણી તારી (કર્મરૂપી) રજને અતિશય રીતે દૂર કરો...

समास–

यत्पादपांशुः—पादयोःपांशुः–पादपांशुः, ( ष. त. पु. ) यस्याः पादपांशुः–यत्पादपांशुः । ( ष. त. पु. )

सुरततेः—सुराणां ततिः–सुरततिः, तस्याः–सुरततेः । (ष.त.पु.)

**चूर्णशोभाम्**—चूर्णस्य शोभा–चूर्णशोभा, ताम्–चूर्णशोभाम् । (ष. त. पु.)

**तापत्रा**—तापात् त्रायते–तापत्रा। (उ. त. पु.) 'स्था. पा. स्नात्रः कः' ५।१।१४२....क।

**असमाना**—न विद्यते समानः यस्याःसा–असमाना। (न.ब.व्री.)

**अप्रतिमदम्**—प्रतिगतः मदः–प्रतिमदः, (प्रा. त. पु.) नास्ति प्रतिमदः यस्य सः–अप्रतिमदः, तम्–अप्रतिमदम्। (न. ब. व्री.)

**अरता**—नास्ति रतं यस्याःसा–अरता। (न. ब. व्री.)

**प्रविकिरतुतराम्**— अतिशयेन प्रविकिरतु – प्रविकिरतुतराम् । 'क्लित्याद्येo' ७।३।८....तरप् अने अन्त्यनो आम्।

**जैनराजी** — जिनानां राजानः – जिनराजाः, 'राजन्सखेः' ७।३।१०६....अट् (ष. त. पु.) जिनराजानाम् इयम्–जैनराजी । 'तस्येदम्' ६।३।१६०....ना सूचनथी 'प्राग् जितादण्' ६।१।१३ ....अण्।

**यातापत्त्रासमाना**—आपद् च त्रासश्च मानश्च–आपत्त्रासमानाः, (इ. द्व.) याताः आपत्त्रासमानाः यस्याः सा–यातापत्त्रासमाना । (स. ब. व्री.)

**अप्रतिमदमवती**—अप्रतिमः दमः यस्याः सा–अप्रतिमदवती । (स. ब. व्री.)

**हारतारा:**—हाराश्च ताराश्च–हारताराः, ताः हारातारा:। (इ.द्व.)

**अथवा**—हारवत् तारा हारतारा। (उप. पू. क.)

नित्यं हेतूपपत्तिप्रतिहत-
कुमतप्रोद्धतध्वान्तबन्धा-
ऽपापायाऽऽसाद्यमानाऽमदन !
तव सुधासारहृद्या हितानि।

वाणी निर्वाणमार्गप्रणयिपरिगता
तीर्थनाथ! क्रियान्मेऽ-
पापायासाद्यमानामदनत!
वसुधासार! हृद्याहितानि ॥ ३ ॥ ४७ ॥

अन्वय—अमदन! अपापायासाद्यमानामदनत! वसुधासार! तीर्थनाथ! तव हेतूपपत्तिप्रतिहतकुमतप्रोद्धतध्वान्तबन्धा, अपापाया, आसाद्यमाना (अथवा–अपापायासाद्यमाना) सुधासारहृद्या, निर्वाण-मार्गप्रणयिपरिगता. वाणी मे हृदि आहितानि हितानि नित्यम् क्रियात् ।

અર્થ–કામ વગરના! નથી પાપ, ખેદ, આદિ જેઓમાં તથા માન વિનાના અને મદ વિનાના એવા (મુનિઓ)થી નમન કરાયેલ! પૃથ્વીને વિષે સારભૂત! એવા હે તીર્થંકરદેવ! તમારી હેતુ અને યુક્તિથી અથવા. હેતુની યુક્તિથી હણાયા છે કુવાદિઓના ગાઢ અંધકારના બંધ જેનાવડે એવી, અથવા હણાયો છે કુમતરૂપી ગાઢ અંધકારનો બંધ જેનાવડે એવી, ચાલ્યા ગયા છે અપાયો જેમાંથી એવી, અને (મુનિઓ વડે) પ્રાપ્ત કરાતી, અથવા–ચાલ્યા ગયા છે અપાયો જેના એવા મુનિઓ વડે પ્રાપ્ત કરાતી, અમૃતની વૃષ્ટિ જેવી મનોહર, મોક્ષમાર્ગને વિષે પ્રેમ વાળા (મુનિઓ) વડે સ્વીકાર કરાયેલી એવી વાણી મારા હૃદયમાં રહેલા હિત–વાંછિતને કરો...

समास–

हेतूपपत्तिप्रतिहतकुमतप्रोद्धतध्वान्तबन्धा—हेतवश्च उपपत्तयश्च हेतूपपत्तयः, (इ. द्व.) अथवा—हेतूनाम् उपपत्तयः–हेतूपपत्तयः, (ष. त. पु.) ध्वान्तस्य बन्धः—ध्वान्तबन्धः, (ष. त. पु.) प्रोद्धतः ध्वान्तबन्धः–प्रोद्धतध्वान्तबन्धः, (वि. पू. क.) कुत्सितं मतम्–कुमतम्,

( कु. पू. त. पु. ) कुमतमेव प्रोद्धतध्वान्तबन्धः—कुमतप्रोद्धतध्वान्तबन्धः, ( अव. पू. क. ) अथवा— कुत्सितम् मतम् येषां ते—कुमताः, (अव्य. ब. व्री.) कुमतानां प्रोद्धतध्वान्तबन्धः—कुमतप्रोद्धतध्वान्तबन्धः, (ष.त.पु.) हेतूपपत्तिभिः प्रतिहतः कुमतप्रोद्धतध्वान्तबन्धः यया सा—हेतूपपत्तिप्रतिहतकुमतप्रोद्धतध्वान्तबन्धा । ( व्य. ब. व्री. )

**अपापाया**—अपगताः अपायाः यस्याः सा– अपापाया । ( प्रादि. ब. व्री. )

**अपापायासाद्यमाना**—अपगताः अपायाः येषां ते—अपापायाः, (प्रादि.ब.व्री.)अपापायैः आसाद्यमाना—अपापायासाद्यमाना । (तृ. त. पु.)

**अमदन !**—नास्ति मदनः यस्य सः—अमदनः, तत्संबोधनम्—अमदन ! ( न. ब. व्री. )

**सुधासारहृद्या**—सुधायाः आसारः—सुधासारः, ( ष.त.पु. ) सुधासारः इव हृद्या—सुधासारहृद्या । ( उप. पू. क. )

**निर्वाणमार्गप्रणयिपरिगता**—निर्वाणस्य मार्गः—निर्वाणमार्गः, (ष. त. पु. ) प्रणयः अस्ति येषाम्—प्रणयिनः, 'अतोऽनेक०' ७।२।६ ....इन्, निर्वाणमार्गस्य प्रणयिनः—निर्वाणमार्गप्रणयिनः, ( ष. त. पु. ) निर्वाणमार्गप्रणयिभिः परिगता निर्वाणमार्गप्रणयिपरिगता । (तृ.त.पु.)

**तीर्थनाथ !**—तीर्थस्य नाथः—तीर्थनाथः, तत्संबोधनम्—तीर्थनाथ ! ( ष. त. पु. )

**अपापायासाद्यमानामदनत !**—पापञ्च आयासश्च—तयोः समाहारः—पापायासम्, ( समा. द्व. ) पापायासम् आदौ येषां ते—पापायासादयः, (व्य.ब.व्री.) न विद्यन्ते पापायासादयः येषां ते—अपापायासादयः, (न.ब.व्री.) न विद्यते मानः येषां ते—अमानाः, ( न. ब. व्री. ) नास्ति मदो येषां

ते–अमदाः, ( न. ब. व्री. ) अपापायासादयः अमानाः–अपापायासाद्य-मानाः, ( वि. उभ. क. ) अपापायासाद्यमानाः अमदाः–अपापायासाद्य-मानामदाः, ( वि. उभ. क. ) अपापायासाद्यमानामदैः नतः–अपापाया-साद्यमानामदनतः, तत्संबोधनम्–अपापायासाद्यमानामदनत ! ( तृ. त. पु. )

वसुधासार !—वसुधायां सारः–वसुधासारः, तत्संबोधनम्–वसु-धासार ! ( स. त. पु. )

रक्षःक्षुद्रग्रहादिप्रतिहतिशमनी
वाहितश्वेतभास्वत्-
सन्नालीका सदा प्तापरिकर-
मुदिता सा क्षमालाभवन्तम् ।
शुभ्रा श्रीशान्तिदेवी जगति
जनयतात् कुण्डिका भाति यस्याः
सन्नालीका सदाप्ता परिकरमुदिता
साक्षमाला भवन्तम् ॥ ४ ॥ ४८ ॥

अन्वय–जगति यस्याः करं परि उदिता सन्नालीका सदाप्ता कुण्डिका भाति सा रक्षःक्षुद्रग्रहादिप्रतिहतिशमनी, वाहितश्वेत-भास्वत्सन्नालीका, प्तापरिकरमुदिता ( सन्नालीका सदाप्ता ) साक्षमाला, शुभ्रा श्रीशान्तिदेवी भवन्तम् सदा क्षमालाभवन्तम् जनयतात् ।

અર્થ–જગતને વિષે જેના હાથ ઉપર–ઉદય પામેલી, સુંદર કમલવાળી સજ્જનોવડે પ્રાપ્ત કરાયેલી, કુંડી શોભે છે. તે ( દેવી ) રાક્ષસ, ક્ષુદ્રદેવો અને ગ્રહ આદિનાં ઉપદ્રવોનુ શમન કરનારી, વાહન રૂપે કરાયેલુ છે શ્વેત દેદીપ્યમાન સુંદર કમલ જેનાવડે એવી, જટાના

મંડલથી હર્ષિત થયેલી. ( સન્નાલીકા–સદ્દાન્તા શાન્તિદેવીના વિશેષણ તરીકે લઈએ ત્યારે–નાશ કર્યો છે અસત્યનો જેણે એવી–સજ્જનોને પ્રિય ) એવી જપમાલાવાળી, શ્વેતવર્ણવાળી શ્રી શાન્તિદેવી આપને હંમેશા ક્ષમા ( પૃથ્વી )નાં લાભવાળા કરો...

**समास—**

**रक्षःक्षुद्रग्रहादिप्रतिहतिशमनी**—रक्षांसि च क्षुद्राश्च ग्रहाश्च–रक्षःक्षुद्रग्रहाः, ( इ. द्व. ) रक्षःक्षुद्रग्रहाः आदौ येषां ते–क्षुद्रग्रहादयः, ( व्य. ब. व्री. ) रक्षःक्षुद्रग्रहादिभ्यः प्रतिहतिः–रक्षःक्षुद्रग्रहादिप्रतिहतिः, ( ष. त. पु. ) रक्षःक्षुद्रग्रहादिप्रतिहतिः–शम्यते अनया–रक्षःक्षुद्रग्रहादिप्रतिहतिशमनी । (उप. त. पु. ) 'करणाऽऽधारे' ५।३।१२९...अनट् ।

**वाहितश्वेतभास्वत्सन्नालीका**—सच्च तद् नालीकञ्च–सन्नालीकम् , 'सन्महत्परमो०' ३।१।१०७....( वि. पू. क. ) भाः अस्ति यस्य–भास्वत् , 'तदस्या०' ७।२।१....मतु, भास्वत् च तद् सन्नालीकम् च भास्वत्सन्नालीकम् , ( वि. पू. क. ) वाहितं श्वेतं भास्वत्सन्नालीकं यया सा–वाहितश्वेतभास्वत्सन्नालीका । ( स. ब. ब. व्री.)

**प्तापरिकरमुदिता**—प्तायाः परिकरः–प्तापरिकरः, ( ष.त.पु. ) प्तापरिकरेण मुदिता–प्तापरिकरमुदिता । ( तृ. त. पु. )

**क्षमालाभवन्तम्**—क्षमायाः लाभः–क्षमालाभः, ( ष. त. पु. ) क्षमालाभः अस्ति यस्य–क्षमालाभवान् , तम्–क्षमालाभवन्तम् ।

**श्रीशान्तिदेवी**— शान्तिः नाम यस्याः साः– शान्तिनामा, (स. ब. व्री.) शान्तिनामा चासौ देवी च–शान्तिदेवी, ( म.प.लो.क. ) श्रिया युक्ता–श्रीयुक्ता, ( तृ. त. पु. ) श्रीयुक्ता चासौ शान्तिदेवी च श्रीशान्तिदेवी । ( म. प. लो. क. )

**सन्नालीका**—सत् नालीकं यस्याः सा–सन्नालीका । (स.ब.व्री.)

**सदाशा**—सद्भिः आशा–सदाशा । ( तृ. त. पु. )

श्रीशान्तिदेवी पक्षे–**सन्नालीका**—सन्नम् अलीकं यया सा–सन्नालीका । ( स. ब. व्री. )

**सदाशा**—सताम् आशा–सदाशा । ( ष. त. पु. )

**साक्षमाला**—अक्षाणां माला—अक्षमाला, ( ष. त. पु. ) अक्षमालया सह वर्तते या सा–साक्षमाला । ( सहार्थ. ब. व्री. )

## ॥ श्री विमलजिनस्तुतिः ॥

( पृथ्वीवृत्तम् )

**अपापदमलं घनं शमितमानमामो हितं,**
**नतामरसभासुरं विमलमालयाऽऽमोदितम् ।**
**अपापदमलङ्घनं, शमितमानमामोहितं,**
**न तामरसभासुरं विमलमालयामोदितम् ॥१॥४९॥**

**अन्वय**—अपापदम् , अलम् घनम् शम् इतम् , (अपापदमलं) हितम् , नतामरसभासुरम् , विमलमालया आमोदितम् , अपापदम् , अलङ्घनम् , शमितमानम् , न आमोहितम् , तामरसभासुरम् , आलयामोदितम् , विमलम् आनमामः ।

**અર્થ**-પુન્યને આપનાર, ઘણા અને ગાઢ સુખને પ્રાપ્ત કર્યું છે જેણે એવા, (અથવા પાપ રહિત અને ઈન્દ્રિય નિગ્રહને ગ્રહણ કરનારા) હિતકારી, નમેલા છે દેવોની સભા અને અસુરો જેને એવા, નિર્મલમાલાવડે સુગંધિત કરાયેલા, ચાલી ગઈ છે આપત્તિ જેમાંથી એવા, ઉલ્લંઘન ન કરી શકાય તેવા, શમન કરાયું છે માન જેમના વડે એવા, મોહીત નહિ થયેલા, કમલ જેવા દેદીપ્યમાન, આવાસોવડે હર્ષિત નહિ થયેલા, વિમલનાથ પ્રભુને અમે નમસ્કાર કરીએ છીએ...

समास—

**अपापदम्**—न पापम्—अपापम्, ( न. त. पु. ) अपापम् ददाति—अपापदः, तम्—अपापदम्। 'आतो डो०' ५।१।७६...ड ( उप. त. पु. )

**वरदम्**—वरं ददाति—वरदम, तद्—वरदम्। ( उप. त. पु. ) 'आतोडोह्वा०' ५।१।७६...ड ।

**अपापदमलम्**—न विद्यमानं पापं यस्य सः—अपापः, (न.ब.व्री.) दमं लाति—दमलः ( उप. त. पु. ) पूर्ववत् ड, अपापश्चासौ दमलश्च—अपापदमलः, । तम्—अपापदमलम्। ( वि. उभ. क. )

**नतामरसभासुरम्**—अमराणां सभा—अमरसभा, ( ष. त. पु. ) नताः अमरसभा असुराः यस्य सः—नतामरसभासुरः, तम्—नतामरसभासुरम्। ( स. ब. ब. व्री. )

**विमलमालया**—विगतो मलो यस्याः सा—विमला, ( प्रादि. ब. व्री. ) विमला माला—विमलमाला, तया—विमलमालया। (वि.पू.क.)

**अपापदम्**—अपगताः आपदः यस्मात् सः—अपापद्, तम्—अपापदम्। ( प्रादि. ब. व्री. )

**अलङ्घनम्**—न विद्यते लङ्घनम् येन सः—अलङ्घनः। तम्—अलङ्घनम्। ( न. ब. व्री. )

**शमितमानम्**—शमितः मानः येन सः—शमितमानः, तम्—शमितमानम् ( स. ब. व्री. )

**तामरसभासुरम्**—तामरसः इव भासुरः—तामरसभासुरः, तम्—तामरसभासुरम्, ( उप. पू. क.)

**विमलम्**—विगतो मलो यस्मात्सः—विमलः, तम्—विमलम् ( स. ब. व्री. )

आलयामोदितम्—न मोदितः–अमोदितः, (न. त. पु.) आलयैः अमोदितः–आलयामोदितः, तम्–आलयामोदितम्। ( तृ. त. पु. )

**सदानवसुराजिता–असमरा जिना भीरदाः,**
**क्रियासु रुचितासु ते सकलभारतीरा यताः ।**
**सदानवसुराजिता–असमराजिनाभीरदाः,**
**क्रियासुरुच्चितासु ते, सकलभा रतीरायताः ॥२॥५०॥**

**अन्वय—सदानवसुराजिताः, असमराः, भीरदाः, असकलभारतीराः, यताः, सदानवसुराजिताः, (सदा नवसु राजिताः) असमराजिनाभीरदाः, सकलभाः, ते जिनाः ते रुचितासु उच्चितासु क्रियासु आयताः रतीः क्रियासुः ।**

**અર્થ**–અસુરો સહિત દેવોવડે નહિ જિતાયેલા, અથવા દાનવ સહિત દેવોવડે સારી રીતે શોભાયલા, યુદ્ધવગરના, ભયને ચોળી નાંખનાર, દોષ રહિત વાણીને આપનારા, યત્ન કરતા, ત્યાગ યુક્ત ધનવડે શોભાયેલા, અથવા–હંમેશા નવ (કમલ)ને વિષે શોભનારા, અસાધારણ શોભવાના સ્વભાવવાળા છે નાભિ અને દાંત જેઓને એવા, સંપૂર્ણ કાન્તિવાળા, તે જિનેશ્વર ભગવંતો તારી ગમતી અને યોગ્ય ક્રિયાઓને વિષે ઘણો આનંદ કરો...(આપો)

समास—

**सदानवसुराजिताः**—दानवैः सह वर्तन्ते ये ते–सदानवाः, ( सहार्थ. ब. व्री. ) सदानवाश्चामी सुराश्च–सदानवसुराः, (वि. पू. क.) सदानवसुरैः अजिताः सदानवसुराजिताः, ( तृ. त. पु. ) न जिताः–अजिताः, ( न. त. पु. ) सदानवाः पूर्ववत् , सदानवैः सुराजिताः–सदानवसुराजिताः ( तृ. त. पु. )

**असमराः**—नास्ति समरः येषां ते–असमराः ( न. ब. व्री. )

**भीरदाः**—रदन्तीति–रदाः 'पचादिभ्यः' ५।१।५०...अच् । भीयः रदाः–भीरदाः ( ष. त. पु. )

**असकलभारतीराः**—कलाभिः सहवर्तन्ते या सा–सकलाः, (सहार्थ.ब. व्री.) असकला भारती–असकलभारती, ( वि. पू. क. ) असकल भारतीम् रान्ति–असकलभारतीशः । 'आतो डोह्वा' ५।१।७६,...ड ( उप. त. पु. )

**सदानवसुराजिताः**—दानेन सह वर्तन्ते यानि तानि–सदानानि, ( स. ब. व्री. ) सदानानि वसूनि–सदानवसूनि, ( वि. पू. क. ) सदानवसुभिः राजिताः–सदानवसुराजिताः । ( तृ. त. पु. )

**असमराजिनाभीरदाः**—न समाः–असमाः, ( न.त.पु. ) राजन्ते इत्येवं शीलाः राजिनः, नाभी च रदाश्च–नाभीरदाः, ( इ. द्व. ) असमाः राजिनः नाभीरदाः येषां ते–असमराजिनाभीरदाः ( स. ब. ब. व्री. )

**सकलभाः**—सकला भा येषां ते–सकलभाः ( स. ब. व्री. )

**सदा यतिगुरोरहो नमत मानवैरञ्चितं,**
**मतं वरदमेनसा रहितमायता भावतः ।**
**सदायति गुरो रहो न मतमानवैरं चितं,**
**मतं वरदमेन सारहितमायताभावतः ॥ ३ ॥ ५१ ॥**

**अन्वय**—मानवैः अञ्चितम् , एनसा रहितं, वरदम् , सदायति, गुरोः रहः, न मतमानवैरम् आयता वरदमेन चितं; मतं, सारहितम् आयताभावतः यतिगुरोः मतम् अहो भावतः सदा नमत ।

**અર્થ**–માનવોવડે પૂજાયેલા, પાપથી રહિત, વરદાન આપનારા, સુંદર છે ભાવિકાલ જેનો એવા, અથવા સુંદર પ્રભાવવાળા, ગુરૂના રહસ્યભુત, ઇષ્ટ નથી માન અને વૈર જેને એવા, પ્રાપ્ત થતા શ્રેષ્ઠ ઉપશમવડે પુષ્ટ, શ્રેષ્ઠ હિતવાળા એવા છે, વિશાલ કાંતિવાળા ગુરૂ, ( અરિહંત પ્રભુ )ના આગમને હે ( માણસો ) તમે હંમેશા ભાવથી નમસ્કાર કરો...

**समास—**

**वरदम्**—वरं ददाति–वरदम्, तद् वरदम्। (उप. त. पु.) "आतो डोह्वा०" ५।१।७६...ड ।

**यतिगुरो**—यतीनाम् गुरुः–यतिगुरुः, तस्य–यतिगुरोः। (ष.त.पु.)

**सदायति**—सती आयतिः यस्य तत्–सदायति, तद्–सदायति ( स. ब. व्री. )

**मतमानवैरम्**—मानश्च वैरश्च–मानवैरे, ( इ. द्व. ) मते मानवैरे यस्य तद्–मतमानवैरम्, तद्–मतमामवैरम् ( स. ब. व्री. )

**वरदमेन**—वरश्चासौ दमश्च–वरदमः, तेन–वरदमेन। (वि.पू.क.)

**सारहितम्**—सारं हितं यस्मिन् तद्–सारहितम्, तद्–सारहितम्। ( वि. पू. क. )

**आयताभावतः**—आयता आभा यस्य सः–आयताभावान्। तस्य–आयताभावतः। 'तदस्या०' ७।२।१...मतु ( स. ब. व्री. )

**प्रभाजि तनुतामलं, परमचापला रोहिणी,**
**सुधावसुरभीमना मयि सभाक्षमालेहितम् ।**
**प्रभाजितनुताऽमलं, परमचापलाऽऽरोहिणी,**
**सुधावसुरभीमनामयिसभा क्षमाले हितम् ॥४॥५२॥**

अन्वय—अचापला, सुधावसुः, अभीमनाः, सभाक्षमाला, प्रभाजितनुता, परमचापला, सुधावसुरभीम् आरोहिणी, अनामयि-

सभा, रोहिणी, प्रभाजि क्षमाले मयि परम्, अमलम्, ईहितं, हितम्, अलं तनुताम् ।

અર્થ–ચપલતા વગરની, સુધા–ચુના જેવી કાન્તિવાળી, ભયમાં નથી મન જેનુ એવી, કાન્તિથી યુક્ત જપમાલાવાળી કાન્તિવડે જીતાયેલી, અને સ્તુતિ કરાયેલી, શ્રેષ્ઠ ધનુષ્યને ગ્રહણ કરનારી, સારી રીતે દોડનારી એવી સુરભિ–કામધેનુ ઉપર બેઠેલી, રોગી નથી સભા જેની એવી, રોહિણીદેવી પ્રકૃષ્ટ ભક્તિ કરનાર, ક્ષમાને ધારણ કરનાર એવા મારા વિષે શ્રેષ્ઠ તથા નિર્મલ એવા વાંછિતને અને હિતને સારી રીતે ખૂબ જ વિસ્તારો...

**समास–**

**अचापला**—नास्ति चापलं यस्याः सा–अचापला । (न.ब.व्री.)

**सुधावसुः**—सुधावत् वसुः यस्याः सा–सुधावसुः । (उप.ब.व्री.)

**अभीमनाः**—भीषु मनः यस्याः सा–भीमनाः, (व्य. ब. व्री.) न भीमनाः–अभीमनाः । (न. त. पु.)

**सभाक्षमाला**—अक्षाणां माला–अक्षमाला, (ष. त. पु.) भया सह वर्तते या सा सभा, (सहार्थ. ब. व्री.) सभा अक्षमाला यस्याः सा–सभाक्षमाला । (स. ब. व्री.)

**प्रभाजितनुता**—प्रभया जिता–प्रभाजिता, (तृ. त. पु.) प्रभाजिता नुता–प्रभाजितनुता । (वि. उभ. क.)

**अमलम्**—नास्ति मलम् यस्मिन् तद्–अमलम्, तद्–अमलम् । (न. ब. व्री.)

**परमचापला**—परमं च तद् चापं च–परमचापम्, 'सन्महत्०' ३।१।१०७....(वि. पू. क.) परमचापं लाति–परमचापला । (उप. त. पु.) 'आतोडोऽह्वा' ५।१।७६...ड ।

**सुधावसुरभीम्**—सुष्ठु धावति–सुधावा, 'अच्' ५।१।४९... अच्, सुधावा सुरभी–सुधावसुरभी, ताम् सुधावसुरभीम् । (वि.पू.क.)

अनामयिसभा—न विद्यन्ते आमयाः यस्याः सा–अनामयिनी (न. ब. व्री.) अनामयिनी सभा यस्याः सा–अनामयिसभा। (स.ब.व्री.)

क्षमाले—क्षमां लाति–क्षमालः। तस्मिन्–क्षमाले (उप.त.पु.) ड।

॥ अनन्तजिनस्तुतिः ॥

( द्रुतविलम्बितवृत्तम् )

**सकलधौतसहासनमेरव–**
**स्तवदिशन्त्वभिषेकजलप्लवाः।**
**मतमनन्तजितः स्नपितोल्लसत्–**
**सकलधौतसहासनमेरवः ॥ १ ॥ ५३ ॥**

**अन्वय–**अनन्तजितः सकलधौतसहासनमेरवः स्नपितोल्लसत्–सकलधौतसहासनमेरवः अभिषेकजलप्लवाः तव मतं दिशन्तु।

**અર્થ**–શ્રી અનંતનાથ ભગવાનના પ્રક્ષાલિત કર્યા છે સમસ્ત વિકસિત થયેલા એવા નમેરૂ વૃક્ષો જેમણે એવા, સ્નાન કરાવ્યુ છે દેદીપ્યમાન સુવર્ણમય સિંહાસન સહિત મેરૂનું જેમણે એવા. (અથવા સ્નાન કરવાયું છે દેદીપ્યમાન સુવર્ણમય અને દૃઢ આસનવાળા મેરૂ પર્વતનુ જેના વડે એવા) અભિષેકનાં જલપ્રવાહો તારા ઈચ્છિતને પૂર્ણ કરો...

समास—

सकलधौतसहासनमेरवः—हासेन सह वर्तन्ते ये ते–सहासाः, (सहार्थ. ब. व्री.) सकलाः धौताः सहासाः नमेरवः यैः ते सकलधौतसहासनमेरवः (स. बहु. ब. व्री.)

अभिषेकजलप्लवाः—जलानाम्–प्लवाः–जलप्लवाः, (ष.त.पु.) अभिषेकस्य जलप्लवाः–अभिषेकजलप्लवाः। (ष. त. पु.)

**अनन्तजितः**—अनन्तान् ( कर्मांशान् ) जयति–अनन्तजित्, तस्य–अनन्तजितः । ( उप. त. पु. )

**स्नपितोल्लसत्सकलधौतसहासनमेरवः**—आसनेन सह वर्तते यः सः–सहासनः, ( सह. ब. व्री. ) कलधौतेन सह वर्तते यः सः–सकलधौतः, ( सह. ब. व्री. ) सहासनः मेरुः–सहासनमेरुः, ( वि. पू. क. ) स्नपितः उल्लसन् सकलधौतः सहासनमेरुः यैः ते–स्नपितोल्लसत्सकलधौत सहासनमेरवः । ( स. बहु. ब. व्री. )

**मम रतामरसेवित ! ते क्षण–**
**प्रद ! निहन्तु जिनेन्द्रकदम्बक ! ।**
**वरद ! पादयुगं गतमज्ञता–**
**ममरतामरसे विततेक्षण ! ॥ २ ॥ ५४ ॥**

**अन्वय**–रतामरसेवित ! क्षणप्रद ! वरद ! विततेक्षण ! जिनेन्द्र कदम्बक ! वरद ! अमरतामरसे गतं ते पादयुगं मम अज्ञतां निहन्तु ! ॥ २ ॥ ॥ ५४ ॥

**અર્થ**–આસક્ત થયેલા દેવોવડે સેવાયેલા, ઉત્સવને આપનારા, વરદાનને આપનારા, દીર્ઘ નેત્રવાળા, હે જિનેશ્વરના સમૂહ ! દેવ કૃત કમલને વિષે સ્થાપેલા તમારા ચરણ યુગલ મારી અજ્ઞાનતાને હણો...

**समास**—

**रतामरसेवित !**—रताश्चामी अमराश्च–रतामराः, (वि. पू. क.) रतामरैः सेवितः–रतामरसेवितः, तत्संबोधनम्–रतामरसेवित ! । (तृ.त.पु.)

**क्षणप्रद !**— क्षणं प्रददाति–क्षणप्रदः, तत्संबोधनम्–क्षणप्रद ! ( उप. त. पु. ) 'उपसर्गादातो०' ५।१।...ड ।

**जिनेन्द्रकदम्बक** !—जिनानाम् इन्द्राः–जिनेन्द्राः, ( ष. त. पु. ) जिनेन्द्राणां कदम्बकम्–जिनेन्द्रकदम्बकम्, तत्संबोधनम्–जिनेन्द्रकदम्बक ! ( ष. त. पु. )

**वरद** !—वरं ददाति–वरदः, तत्संबोधनम्–वरद ! । 'आतोडो०' ५।१।७६...ड ।

**पादयुगम्**—पादयोः युगम्–पादयुगम् । ( ष. त. पु. )

**अमरतामरसे**—अमरैः (कृतं) तामरसम्–अमरतामरसम्, तस्मिन्–अमरतामरसे । 'तृतीया०' ३।१।६५...( तृ. त. पु. )

**विततेक्षण** !—वितते ईक्षणे यस्य सः–विततेक्षणः, तत्संबोधनम्–विततेक्षण ! । ( स. ब. व्री. )

**परमतापदमानसजन्मनः**

**प्रियपदं भवतो भवतोऽवतात् ।**
**जिनपतेर्मतमस्तजगत्त्रयी-**
**परमतापदमानसजन्मनः ॥ ३ ॥ ५५ ॥**

**अन्वय**—अस्तजगत्त्रयीपरमतापदमानसजन्मनः जिनपतेः परमतापद् अमानसजन्मनःप्रियपदं मतं भवतः भवतः अवतात् ।

**અર્થ**–દૂર કરાયો છે ત્રણ જગતને ઉત્કૃષ્ટ સંતાપ આપનાર કામદેવ જેનાવડે એવા જિનેશ્વરદેવને બીજાઓના મતને આપત્તિરૂપ, પ્રમાણ વિનાના ( એકબીજાથી ) સંબંધવાળા, મનને પ્રિય લાગે તેવા પદોવાળો સિદ્ધાંત આપનું સંસારથી રક્ષણ કરો...

समास—

**परमतापद्**—परेषां मतम्—परमतम्, ( ष. त. पु. ) परमतानाम् आपद्—परमतापद् । ( ष. त. पु. )

**अमानसजन्मनःप्रियपदम्**—नास्ति मानं येषां तानि—अमानानि, ( न. ब. व्री. ) मनसः प्रियाणि—मनःप्रियाणि, ( ष. त. पु. ) अमानानि सजन्ति मनःप्रियाणि पदानि यस्मिन् तद्—अमानसजन्मनःप्रियपदम् । ( स.ब. ब. व्री. )

**जिनपतेः**—जिनानां पतिः—जिनपतिः, तस्य—जिनपतेः (ष.त.पु.)

**अस्तजगत्त्रयीपरमतापदमानसजन्मनः**—त्रयः प्रकाशः यस्याः—त्रयी, 'द्वित्रिभ्यामयड्०' ७।१।१५२...अयट्, जगतां त्रयी—जगत्त्रयी, ( ष. त. पु. ) परमश्चासौ तापश्च—परमतापः, 'सन्महत्०' ३।१।१०७... ( वि. पू. क. ) परमतापं ददाति—परमतापदः, 'आतोडो०' ५।१।७६.... ड, ( उप. त. पु. ) जगत्त्रय्याः परमतापदः — जगत्त्रयीपरमतापदः, ( ष. त. पु. ) मानसात् जन्म यस्य सः—मानसजन्मा, ( व्य. ब. व्री. ) अस्तः जगत्त्रयीपरमतापदः मानसजन्मा येन सः — अस्तजगत्त्रयी परमतापद — मानसजन्मा, तस्य — अस्तजगत्त्रयीपरमतापदमानसजन्मनः । ( स. बहु. ब. व्री. ) ।

रसितमुच्चतुरं गमनाय कं,
दिशतु काञ्चनकान्तिरिताऽच्युता ।
धृतधनुःफलकासिशरा करै—
रसितमुच्चतुरङ्गमनायकम् ॥ ४ ॥ ५६ ॥

अन्वय—रसितम् गमनाय उच्चतुरम् अथवा—गमनाय रसितमुच्चतुरम् असितम् उच्चतुरङ्गमनायकम्, इता, काञ्चनकान्तिः, करैः धृतधनुःफलकासिशरा अच्युता कं दिशतु ।

અર્થ—મધુર અવાજને કરતા ચાલવા માટે ઘણો ચતુર અથવા ચાલવા માટે અવાજ કરવામાં હર્ષવાળા અને ચતુર, કાળા, સુંદર ઘોડાના નાયક ઉપર બેઠેલી, સુવર્ણ જેવી કાન્તિવાળી, હાથવડે ધારણ કરાયા છે ધનુષ્ય ફલક, તલવાર અને બાણ જેણીવડે એવી, અચ્યુતાદેવી સુખને બતાવો (આપો)

समास—

उच्चतुरम्—उत्कृष्टः चतुरः—उच्चतुरः, तम्—उच्चतुरम। (प्रादि.त.पु.)

रसितमुच्चतम्—रसिते मुद् यस्य सः—रसितमुद्, (व्य. ब. व्री.) रसितमुच्चासौ चतुरश्च—रसितमुच्चतुरः, तम्—रसितमुच्चतुरम्। (वि. ऊभ. क.)

काञ्चनकान्तिः—काञ्चनस्य कान्तिः इव कान्तिः यस्याः सा—काञ्चनकान्तिः। (उपमानोपमेय. ब. व्री.)।

धृतधनुःफलकासिशरा—धनुश्च फलकं च असिश्च शरश्च—धनुःफलकासिशराः, (इ. द्व.) धृताः धनुःफलकासिशराः यया सा धृतधनुःफलकासिशरा। (स. ब. व्री.)

असितम्—न सितः—असितः, तम्—असितम्। (न. त. पु.)

उच्चतुरङ्गमनायकम्—तुरं गच्छति—तुरङ्गमः, 'नाम्नो गमः' ५।१।१३१....ख, (उप. त. पु.) तुरङ्गमानां नायकः—तुरङ्गमनायकः, (ष. त. पु.) उच्चश्च सः तुरङ्गमनायकश्च—उच्चतुरङ्गमनायकः। तम्—उच्चतुरङ्गमनायकम्। (वि. पू. क.)

## ॥ श्री धर्मजिनस्तुतिः ॥

( अनुष्टुप्वृत्तम् )

**नमः श्रीधर्म ! निष्कर्मो-**
**दयाय महितायते !**
**मर्त्याऽमरेन्द्रनागेन्द्रै-**
**र्दयायमहिताय ते ॥ १ ॥ ५७ ॥**

**अन्वय—**मर्त्यामरेन्द्रनागेन्द्रैः महितायते ! श्रीधर्म ! निष्कर्मोदयाय दयायमहिताय ते नमः ।

**અર્થ**-મનુષ્યો-દેવોના ઈન્દ્રો અને નાગેન્દ્રોવડે પૂજાયો છે પ્રભાવ ( ઉત્તરકાલ ) જેમનો એવા હે ધર્મનાથ ભગવાન ! નીકળી ગયો છે કર્મોદય જેનો એવા, કરૂણા અને વ્રતોથી યુક્ત, અથવા-કરૂણા અને મહાવ્રતવાળા ( મુનિઓ ) ને હિતકારી એવા તમને નમસ્કાર થાઓ.

**समास—**

**श्रीधर्म !**—श्रिया युक्तः-श्रीयुक्तः, ( तृ. त. पु. ) श्रीयुक्तः धर्मः —श्रीधर्मः, तत्संबोधनम्—श्रीधर्म ! ( म. प. लो. क. )

**निष्कर्मोदयाय**—कर्मणाम् उदयः-कर्मोदयः, ( ष. त. पु. ) निर्गतः कर्मोदयः यस्मात् सः-निष्कर्मोदयः, तस्मै—निष्कर्मोदयाय । ( प्रादि. ब. व्री. )

**महितायते !**—महिता आयतिः यस्य सः-महितायतिः, तत्संबोधनम्—महितायते ! ( स. ब. व्री. )

**मर्त्यामरेन्द्रनागेन्द्रैः**—मर्त्याश्च अमराश्च-मर्त्यामराः, ( इ. द्व. ) मर्त्यामराणाम् इन्द्राः मर्त्यामरेन्द्राः, ( ष. त. पु. ) मर्त्यामरेन्द्राश्च नागेन्द्राश्च मर्त्यामरेन्द्रनागेन्द्राः, तैः—मर्त्यामरेन्द्रनागेन्द्रैः । ( इ. द्व. )

**दयायमहिताय**—दया च यमाश्च–दयायमाः, (इ. द्व.) दयायमैः हितः (धा+क्त)–दयायमहितः, तस्मै–दयायमहिताय। (तृ.त.पु.)

**अथवा**—दयायमाः–पूर्ववत्, दयायमाः सन्ति येषाम्–दयायमाः, 'अभ्रादिभ्यः०' ७।२।४६...अ, दयायमेभ्यः हितः–दयायमहितः, तस्मै–दयायमहिताय। 'हितादिभिः०' ३।१।७१...(च.त.पु.)

**जीयाज्जिनौघो ध्वान्तान्तं,**
**ततान लसमानया।**
**भामण्डलत्विषा यः स–**
**ततानलसमानया ॥ २ ॥ ५८ ॥**

**अन्वय**—**यः लसमानया ततानलसमानया भामण्डलत्विषा ध्वान्तान्तं ततान स जिनौघः जीयात्।**

**અર્થ**–જેણે વિલાસ કરતી, વિસ્તૃત અગ્નિ સમાન ભામંડલની કાન્તિવડે (અજ્ઞાનરૂપી) અંધકારનો નાશ કર્યો હતો તે જિનેશ્વરદેવોનો સમૂહ જય પામો...

**समास**—

**जिनौघः**—जिनानां ओघः–जिनौघः। (ष. त. पु.)

**ध्वान्तन्तम्**—ध्वान्तस्य अन्तम्–ध्वान्तान्तम्, तद्–ध्वान्तान्तम्। (ष. त. पु.)

**भामण्डलत्विषा**—भानां मण्डलम्–भामण्डलम्, (ष. त. पु.) भामण्डलस्य त्विट्–भामण्डलत्विट्, तया–भामण्डलत्विषा। (ष. त. पु.)

**ततानलसमानया**—ततश्चासौ अनलश्च–ततानलः, (वि.पू.क.) ततानलेन समाना–ततानलसमाना, तया–ततानलसमानया। 'ऊनार्थपूर्वाद्यैः०' ३।१।६७....(तृ. त. पु.)

भारति ! द्राग् जिनेन्द्राणां,
नवनौरक्षतारिके ।
संसाराम्भोनिधावस्मा–
नवनौ रक्ष तारिके ! ॥ ३ ॥ ५९॥

अन्वय—अक्षतारिके संसाराम्भोनिधौ तारिके नवनौः जिनेन्द्राणां भारति ! अवनौ अस्मान् द्राक् रक्ष ।

અર્થ–નાશ ન થાય તેવા શત્રુઓરૂપી પાણીવાળાં સંસાર-રૂપી સમુદ્રને વિષે તારનારી નવી નૌકા સમાન જિનેશ્વરદેવની હે વાણી પૃથ્વીને વિષે અમારૂં જલ્દી રક્ષણ કર...

समास–

**जिनेन्द्राणाम्**—जिनानाम् इन्द्राः–जिनेन्द्राः, तेषाम्–जिनेन्द्राणाम् । ( ष. त. पु. )

**नवनौः**—नवा नौः–नवनौः, तत्संबोधनम्–नवनौः । 'पूर्वकालैक०' ३।१।१००....( वि. पू. क. )

**अक्षतारिके**—न क्षतम्–अक्षतम्, ( न. त. पु. ) अरयः एव कं —अरिकं, ( अव. पू. क. ) अक्षतम् अरिकम् यस्मिन् सः–अक्षतारिकम्, तस्मिन्–अक्षतारिके । ( स. ब. व्री. )

**संसाराम्भोनिधौ**—संसरन्ति जीवा यस्मिन्–संसारः, 'भावाकर्त्रोः०' ५।३।१८...घञ्, अम्भांसि निधीयन्ते यत्र–अम्भोनिधिः, 'व्याप्यादाधारे०' ५।३।८८....कि, ( उप. त. पु. ) संसारः एव अम्भोनिधिः–संसाराम्भोनिधिः, तस्मिन्–संसाराम्भोनिधौ । ( अव. पू. क. )

**तारिके**—तारयति इति– तारिका, तत्संबोधनम्– तारिके ! । 'णकतृचौ०' ५।१।४८...णक ।

केकिस्थाः वः क्रियाच्छक्ति-
करा लाभानयाचिता ।
प्रज्ञप्तिर्नूतनाम्भोज-
करालाभा नयाचिता ॥ ४ ॥ ६० ॥

अन्वय—केकिस्था शक्तिकरा अयाचिता नूतनाम्भोजकरालाभा ( नूतनाम्भोजकरा अलाभा ) नयाचिता प्रज्ञप्तिः वः लाभान् क्रियात् ।

અર્થ—મયૂર ઉપર બેઠેલી, શક્તિ-( આયુધ વિશેષ ) છે હાથમાં જેણે એવી ( ભક્તોવડે ) યાચના નહિ કરાયેલી, નવા કમલ જેવી ઉત્કૃષ્ટ કાન્તિવાળી, ( નવું કમલ છે હાથમાં જેને એવી નથી લાભ ( પ્રાપ્ત કરવા યોગ્ય વસ્તુ ) જેને એવી, ) નીતિ વડે ચારે તરફથી વ્યાપ્ત, એવી પ્રજ્ઞપ્તિદેવી તમારા લાભોને કરો...

समास—

केकिस्था—केकाः सन्ति यस्य – केकी, 'शिखादिभ्यः०' ७।२।४....इन्, केकिनि तिष्ठति—केकिस्था । 'स्था-पा-स्ना०' ५।१।१४२ ....क । ( उप. त. पु. )

शक्तिकरा—शक्तिः करे यस्याः सा—शक्तिकरा । ( व्य.ब.व्री. )

अयाचिता—न याचिता—अयाचिता । ( न. त. पु. )

नूतनाम्भोजकरालाभा—अम्भसि जायते स्म—अम्भोजम् , 'सप्तम्याः०' ५।१।१६७...ड, (उप. त. पु.) नूतनं च तद् अम्भोजं च—नूतनाम्भोजम् , ( वि. पू. क. ) कराला आभा – करालाभा, ( वि. पू. क. ) नूतनाम्भोजस्य इव करालाभा यस्याः सा—नूतनाम्भोजकरालाभा । (उप.ब.व्री.)

अथवा–नूतनाम्भोजकरा—नूतनाम्भोजम् पूर्ववत्। नूतनाम्भोजं करे यस्याः सा–नूतनाम्भोजकरा। (व्य. ब. व्री.)

अलाभा—न विद्यन्ते लाभाः यस्याः सा–अलाभा। (न.ब.व्री.)

नयाचिता—नयैः आचिता–नयाचिता। (तृ. त पु.)

॥ श्री शान्तिजिनस्तुतिः ॥

(शार्दूलविक्रीडितम्)

राजन्त्या नवपद्मरागरुचिरैः पादैः जिताष्टापदा–
द्रेऽकोप! द्रुतजातरूपविभया तन्वाऽऽर्य! धीर! क्षमाम्।
बिभ्रत्याऽमरसेव्यया जिनपते! श्रीशान्तिनाथास्मरो–
द्रेकोपद्रुत! जातरूप! विभयातन्वार्यधी! रक्ष माम्
॥ १ ॥ ॥ ६१ ॥

अन्वय—नवपद्मरागरुचिरैः पादैः राजन्त्या, द्रुतजातरूपविभया क्षमां बिभ्रत्या, अमरसेव्यया, तन्वा, जिताष्टापदाद्रे! अकोप! आर्य! (अर्य!) धीर! अस्मरोद्रेकोपद्रुत! जातरूप! विभय! अतन्वार्यधीः! जिनपते! श्रीशान्तिनाथ! मां रक्ष।

અર્થ–નૂતન કમલ જેવા વર્ણથી મનોહર એવા ચરણો વડે શોભતા, તપેલા સુવર્ણ જેવી કાન્તિવાળા, ક્ષમાને ધારણ કરતા, દેવો-વડે સેવવા યોગ્ય એવા શરીરવડે જીતાયો છે અષ્ટાપદ પર્વત જેનાવડે એવા, કોપરહિત, પ્રશસ્ય, (સ્વામિન્) ધીર, કામદેવના આવેગથી ક્ષુબ્ધ નહિ થયેલા, પ્રગટ થયું છે સૌન્દર્ય જેમનું એવા, ભય વગરનાં, પ્રબલ અને પ્રશસ્ય બુદ્ધિવાળા, જિનેશ્વરદેવ એવા હે શ્રી શાન્તિનાથ ભગવાન! મારું રક્ષણ કરો...

समास—

**नवपद्मरागरुचिरैः**—नवं च तद् पद्मं च-नवपद्मम्, "पूर्वकालैक०" ३।१।१००....( वि. पू. क. ) नवपद्मवत् रागः—नवपद्मरागः, ( उप. पू. क. ) नवपद्मरागेण ( कृताः ) रुचिराः-नवपद्मरागरुचिराः, तैः—नवपद्मरागरुचिरैः। 'तृतीया०' ३।१।६५....( तृ. त. पु. )

**जिताष्टापदाद्रे!**—अष्टापदस्य अद्रिः—अष्टापदाद्रिः, (ष.त.पु.) जितः अष्टापदाद्रिः येन सः—जिताष्टापदाद्रिः, तत्संबोधनम्—जिताष्टापदाद्रे!। ( स. ब. व्री. )

**अकोप!**—नास्ति कोपः यस्य सः—अकोपः, तत्संबोधनम्—अकोप! ( न. ब. व्री. )

**द्रुतजातरूपविभया**—द्रुतं जातरूपं—द्रुतजातरूपम्, ( वि.पू.क. ) द्रुतजातरूपवत् विभा यस्याः सा—द्रुतजातरूपविभा, तया—द्रुतजातरूपविभया। ( उप. ब. व्री. )

**अमरसेव्यया**—अमरैः सेव्या—अमरसेव्या, तया—अमरसेव्यया। ( तृ. त. पु. ).

**जिनपते!**—जिनानां पतिः—जिनपतिः, तत्संबोधनम्—जिनपते! ( ष. त. पु. )

**श्री शान्तिनाथ!**—शान्तिः नाम यस्य सः—शान्तिनामा, ( स. ब. व्री. ) शान्तिनामा नाथः—शान्तिनाथः, ( म. प. लो. क. ) श्रिया युक्तः—श्रीयुक्तः, श्रीयुक्तः शान्तिनाथः—श्रीशान्तिनाथः, तत्संबोधनम्—श्रीशान्तिनाथ! ( म. प. लो. क. )

**अस्मरोद्रेकोपद्रुत!**—स्मरस्य उद्रेकः—स्मरोद्रेकः, ( ष. त. पु. ) स्मरोद्रेकेण उपद्रुतः—स्मरोद्रेकोपद्रुतः, ( तृ. त. पु. ) न स्मरोद्रेकोपद्रुतः—अस्मरोद्रेकोपद्रुतः, तत्संबोधनम्—अस्मरोद्रेकोपद्रुत! ( न. त. पु. )

**जातरूप !**—जातं रूपं यस्य सः—जातरूपः, तत्संबोधनम्—जातरूप ! ( स. ब. व्री. )

**विभय !**—विगतानि भयानि यस्मात्सः—विभयः, तत्संबोधनम्—विभय ! ( प्रादि. ब. व्री. )

**अतन्वार्यधीः !**—न तनुः—अतनुः, ( न. त. पु.) अतनुः आर्या धीः यस्य सः—अतन्वार्यधीः, तत्संबोधनम्—अतन्वार्यधीः ! । (स.बहु.ब.व्री.)

**ते जीयासुरविद्विषो जिनवृषा मालां दधाना रजो–**
**राज्या मेदुरपारिजातसुमनःसन्तानकान्तां चिताः ।**
**कीर्त्या कुन्दसमत्विषेषदपि ये न प्राप्तलोकत्रयी–**
**राज्या मेदुरपारिजातसुमनःसन्तानकान्ताश्रिताः**
**॥ २ ॥ ॥ ६२ ॥**

**अन्वय—अविद्विषः, रजोराज्या मेदुरपारिजातसुमनः–सन्तानकान्तां मालां दधानाः, कुन्दसमत्विषा कीर्त्या चिताः, प्राप्तलोकत्रयीराज्याः, अपारिजातसुमनःसन्तानकान्ताश्रिताः ये ईषद् अपि न मेदुः ते जिनवृषाः जीयासुः ।**

**અર્થ**–નથી વિદ્યમાન વિશેષે કરીને શત્રુઓ જેમના એવા, પરાગની શ્રેણિવડે સ્નિગ્ધ થયેલ કલ્પવૃક્ષનાં પુષ્પોનાં સમૂહવડે કરીને મનોહર એવી માલાને ધારણ કરતા, ( અથવા–અતિશય સ્નિગ્ધ એવા કલ્પવૃક્ષના પુષ્પોનાં તથા સન્તાનક પુષ્પોનાં અંતભાગવાળી માલાને ધારણ કરનાર ) મચકુંદના પુષ્પ સમાન કાંતિવાળી કીર્ત્તિવડે વ્યાપ્ત, પ્રાપ્ત કર્યું છે ત્રણલોકનું રાજ્ય જેમણે એવા, દૂર થયો છે શત્રુઓનો સમૂહ જેઓને એવા તથા દેવોનાં સમૂહની સ્ત્રીઓવડે પૂજાયેલા, ( અથવા–દેવવર્ગનાં મસ્તકનાં અંતભાગથી પૂજાયેલાં ) એવા જેઓ ( જિનેશ્વરદેવો ) એ જરા પણ ગર્વ નથી કર્યો તે જિનોમાં શ્રેષ્ઠ–જિનેશ્વર ભગવંતો જય પામો...

समास—

**अविद्विषः**—द्विषन्ति इति–द्विषः, 'क्विप्' ५।१।१४७.... क्विप्, विशिष्टाः द्विषः–विद्विषः, ( प्रादि. त. पु. ) अविद्यमाना विद्विषः येषां ते–अविद्विषः। ( न. ब. व्री. )

**जिनवृषाः**—जिनेषु वृषाः–जिनवृषाः। ( स. त. पु. )

**रजोराज्या**—रजसां राजी–रजोराजी, तया–रजोराज्या। (ष.त.पु.)

**मेदुरपारिजातसुमनःसन्तानकान्तां** — मेदन्ति इत्येवंशीलाः – मेदुराः, 'भञ्जिभासि०' ५।२।७४....घुर, पारिजातानां सुमनसः–पारिजातसुमनसः, ( ष. त. पु. ) मेदुराः पारिजातसुमनसः–मेदुरपारिजातसुमनसः, ( वि. पू. क. ) मेदुरपारिजातसुमनसां सन्तानाः–मेदुरपारिजातसुमनःसन्तानाः, ( ष. त. पु. ) मेदुरपारिजातसुमनःसन्तानैः कान्ता–मेदुरपारिजातसुमनःसन्तानकान्ता, ताम् – मेदुरपारिजातसुमनःसन्तानकान्ताम्। ( तृ. त. पु. )

**कुन्दसमत्विषा**—कुन्देन समा– कुन्दसमा, "ऊनार्थपूर्वाद्यैः" ३।१।६७....( तृ. त. पु. ) कुन्दसमा त्विट् यस्याः सा–कुन्दसमत्विट्, तया–कुन्दसमत्विषा। ( स. ब. व्री. )

**प्राप्तलोकत्रयीराज्याः**—त्रयः प्रकाराः यस्याः सा – त्रयी, 'द्वित्रिभ्याम्०' ७।१।१५२....अयट्, लोकानां त्रयी–लोकत्रयी, (ष.त.पु.) लोकत्रय्याः राज्यम् लोकत्रयीराज्यम्, ( ष. त. पु. ) प्राप्तं लोकत्रयीराज्यं यैः ते–प्राप्तलोकत्रयीराज्याः। ( स. ब. व्री. )

**अपारिजातसुमनःसन्तानकान्ताश्रिताः**—अरीणां जातम्–अरिजातम्, ( ष. त. पु. ) अपगतम् अरिजातं येभ्यस्ते–अपारिजाताः, ( प्रादि. ब. व्री. ) सुमनसां सन्तानाः–सुमनःसन्तानाः, ( ष. त. पु. )

सुमनःसन्तानानां कान्ताः—सुमनःसन्तानकान्ताः, ( ष. त. पु. ) सुमनः-सन्तानकान्ताभिः अञ्चिताः—सुमनःसन्तानकान्ताञ्चिताः, ( तृ. त. पु. ) अपारिजाताः सुमनःसन्तानकान्ताञ्चिताः—अपारिजातसुमनःसन्तानकान्ताञ्चिताः। ( वि. उभ. क. )

अथवा—अपारिजाताः पूर्ववत्। सुमनसां सन्तानाः—सुमनःसन्तानाः, ( ष. त. पु. ) सुमनःसन्तानानां कानि—सुमनःसन्तानकानि, (ष.त.पु.) सुमनःसन्तानकानाम् अन्ताः—सुमनःसन्तानकान्ताः, (ष.त.पु.) सुमनःसन्तानकान्तैः अञ्चिताः—सुमनःसन्तानकान्ताञ्चिताः। ( तृ. त. पु. ) शेष पूर्ववत्।

**जैनेन्द्रं मतमातनोतु सततं सम्यग्दृशां सद्गुणा-**
**लीलाभं गमहारि भिन्नमदनं तापापहृद् यामरम्।**
**दुर्निर्भेदनिरन्तरान्तरतमोनिर्नाशि पर्युल्लस-**
**ल्लीलाभङ्गमहारिभिन्नमदनन्तापापहृद्यामरम्॥३॥६३॥**

**अन्वय**—गमहारि, भिन्नमदनं, तापापहृद्, यामरम्, दुर्निर्भेदनिरन्तरान्तरतमोनिर्नाशि, पर्युल्लसल्लीलाभङ्गमहारिभिद्, नमदनन्तापापहृद्याभरम्, जैनेन्द्रं मतं सम्यग्दृशां सद्गुणालीलाभं सततम् आतनोतु।

**અર્થ**—આલાપકોવડે કરીને સુંદર, ભેદન કરાયો છે કામદેવ જેના વડે એવો, સંતાપને દૂર કરનાર, મહાવ્રતોને આપનાર, દુઃખે કરીને ભેદી શકાય તેવા ગાઢ અંતરંગ અંધકારનો સંપૂર્ણપણે નાશ કરવાના સ્વભાવવાળો, અત્યંત વધતી છે લીલા જેની અને નથી પરાજય જેનો એવા મહાન્ શત્રુઓને ભેદનારો, નમતા છે અનંતા પુણ્યશાલી એવા મનોહર દેવો જેને એવો જિનેશ્વરદેવનો સિદ્ધાંત-સમ્યગ્દૃષ્ટિઓને સુંદર ગુણોની શ્રેણિનાં (સજ્જનોની ગુણોની શ્રેણિના) લાભનો સતત વિસ્તાર કરો...

**समास–**

**जैनेन्द्रम्**—जिनानाम् इन्द्राः–जिनेन्द्राः, ( ष. त. पु. ) जिनेन्द्राणामिदम्–जैनेन्द्रम् । "तस्येदम्०" ६।३।१६० सूत्रस्य सूचनात् 'प्राग् जितादण्०' ६।१।१३...अण् ।

**सम्यग्दृशाम्**—सम्यग् दृक् येषां ते–सम्यग्दृशः, तेषां–सम्यग्दृशाम् । ( स. ब. व्री. )

**सद्गुणालीलाभम्**—सताम् गुणाः–सद्गुणाः, (ष. त. पु.) सद्गुणानाम् आवली–सद्गुणाली, ( ष. त. पु. ) सद्गुणाल्याः लाभः–सद्गुणालीलाभः, तम्–सद्गुणालीलाभम् । ( ष. त. पु. )

**अथवा**—सन्तः गुणाः–सद्गुणाः । 'सन्महत्०' ३।१।१०७... ( वि. पू. क. ) शेष–पूर्ववत् ।

**गमहारि**—गमैः हरति–गमहारि । 'अजातेः शीले' ५।१।१५४ ....णिन् । ( उप. त. पु. )

**भिन्नमदनम्**—भिन्नो मदनो येन तद्–भिन्नमदनम् । (स.ब.व्री.)

**तापापहृद्**—तापम् अपहरति–तापापहृद्, 'क्विप्' ५।१।१४८ क्विप् । ( उप. त. पु. )

**यामरम्**—यामान् राति–यामरम् । 'आतोडो०' ५।१।७६.... ड । ( उप. त. पु. )

**दुर्निर्भेदनिरन्तरान्तरतमोनिर्नाशि**–दुःखेन निर्भिद्यते–दुर्निर्भेदम्, 'दुःस्वीषतः०' ५।३।१३९....खल्, निर्गतम् अन्तरम् यस्मात् तद्–निरन्तरम्, (प्रादि. ब. व्री.) अन्तरे भवम्–आन्तरम्, 'भवे' ६।३।१२३ ....ना सूचनथी 'प्राग् जितादण्' ६।१।१३....अण् । आन्तरं च तद् तमश्च–आन्तरतमः, ( वि. पू. क. ) निरन्तरं च तद् आन्तरतमश्च–

निरन्तरान्तरतमः, ( वि. पू. क. ) दुर्निर्भेदं निरन्तरान्तरतमः–दुर्निर्भेद-निरन्तरान्तरतमः, ( वि. पू. क. ) दुर्निर्भेदनिरन्तरान्तरतमः निर्नाशयति–दुर्निर्भेदनिरन्तरान्तरतमोनिर्नाशि । 'अजातेः शीले' ५।१।१५४.... णिन् । ( उप. त. पु. )

पर्युल्लसल्लीलाभङ्गमहारिभिद्—पर्युल्लसन्ती लीला येषां ते–पर्युल्लसल्लीलाः, ( स. ब. व्री. ) नास्ति भङ्गो येषां ते–अभङ्गाः, ( न. ब. व्री. ) महान्तश्चामी अरयश्च–महारयः, 'सन्महत्०' ३।१।१०७ ....( वि. पू. क. ) अभङ्गाः महारयः–अभङ्गमहारयः, ( वि. पू. क. ) पर्युल्लसल्लीलाः अभङ्गमहारयः–पर्युल्लसल्लीलाभङ्गामहारयः, ( वि. पू. क. ) पर्युल्लसल्लीलाभङ्गमहारीन् भिनत्ति–पर्युलसल्लीलाभङ्गामहारिभिद् । 'क्विप्' ५।१।१४८.....क्विप् ।

नमदनन्तापापहृद्यामरम्—नास्ति अन्तः येषां ते–अनन्ताः, ( न. ब. व्री. ) अविद्यमानं पापं येषां ते–अपापाः, ( न. ब. व्री. ) हृदयस्य हृदिवा प्रियाः–हृद्याः, हृद्य–पद्य–तुल्य० ७।१।११...निपातन, न म्रियन्ते–अमराः, 'अच्' ५।१।४९....अच् नमन्त अनन्ताः अपापाः हृद्याः अमराः यस्य तद्–नमदनन्तापापहृद्यामरम् । (स.बहु.व्री.)

दण्डच्छत्रकमण्डलूनि कलयन् स ब्रह्मशान्तिः क्रियात्
सन्त्यज्यानि शमी क्षणेन शमिनो मुक्ताक्षमाली हितम् ।
तप्ताष्टापदपिण्डपिङ्गलरुचिर्योऽधारयन्मूढतां
सन्त्यज्यानिशमीक्षणेन शमिनो मुक्ताक्षमालीहितम्
॥ ४ ॥ ॥ ६४ ॥

अन्वय—यः शमिनः अनिशम् ईक्षणेन मूढतां सन्त्यज्य मुक्ताक्षमालीहितं हितम् अधारयत् , सः सन्ति अज्यानि दण्डच्छत्रकमण्डलूनि कलयन् , शमी, इनः, मुक्ताक्षमाली, तप्ताष्टापदपिण्डपिङ्गलरुचिः, ब्रह्मशान्तिः क्षणेन शं क्रियात् ।

**અર્થ**-જે ઉપશમવાળા ( મુનિઓ )નાં સતત દર્શનથી મૂઢતા (અજ્ઞતા)ને ત્યજીને, ત્યાગ કરાયો છે અક્ષમા ( અશાંતિ ) નો જેના વડે એવા ( મુમુક્ષુ )ઓની શ્રેણિઓને ઈચ્છિત એવા હિતને ધારણ કરવા લાગ્યો તે સુંદર અને નથી નાશ જેનો (શાશ્વત) એવા દંડ, છત્ર અને કમંડલને ધારણ કરતો, ઉપશમવાળો, સ્વામિ, મુક્તાફલની માળાવાળો, તપેલા સુવર્ણનાં પિંડ જેવી પીળી કાંતિવાળો, બ્રહ્મશાંતિયક્ષ ક્ષણમાં જ સુખને કરો...

**समास—**

**दण्डच्छत्रकमण्डलूनि्**—दण्डञ्च छत्रं च कमण्डलु च—दण्डच्छत्रकमण्डलूनि, तानि—दण्डच्छत्रकमण्डलूनि । (इ. द्व. )

**अज्यानि**—न विद्यते ज्या येषां तानि—अज्यानि, तानि—अज्यानि । ( न. ब. व्री. )

**शमी**—शमः अस्ति यस्य—शमी । 'अतोऽनेक०' ७।२।६...इन् ।

**मुक्ताक्षमाली**—मुक्तानाम् अक्षाणि—मुक्ताक्षाणि, (ष. त. पु. ) मुक्ताक्षाणां माला—मुक्ताक्षमाला, (ष. त. पु. ) मुक्ताक्षमाला विद्यते यस्य—मुक्ताक्षमाली । "शिखादिभ्य इन्०" ७।२।४....इन् ।

**तप्ताष्टापदपिण्डपिङ्गलरुचिः**—तप्तं च तद् अष्टापदं च—तप्ताष्टापदम् , (वि. पू. क. ) तप्ताष्टापदस्य पिण्डम्—तप्ताष्टापदपिण्डम् , ( ष. त. पु. ) पिङ्गला रुचिः—पिङ्गलरुचिः, ( वि. पू. क. ) तप्तष्टापदपिण्डवत् पिङ्गलरुचिः यस्य सः—तप्ताष्टापदपिण्डपिङ्गलरुचिः । (उप.ब.व्री.)

**मूढतां**—मूढस्य भावः—मूढता, ताम्—मूढताम्। 'भावे त्वतल्०' ७।१।५५....तल्।

**शमिनः**—शमः अस्ति यस्य—शमी, तस्य—शमिनः।

**मुक्ताक्षमालीहितम्**—न क्षमा—अक्षमा, (न. त. पु.) मुक्ता अक्षमा यैः ते मुक्ताक्षमाः, (स. ब. व्री.) मुक्ताक्षमाणामाली—मुक्ताक्षमाली, (ष. त. पु.) मुक्ताक्षमाल्या ईहितम्—मुक्ताक्षमालीहितम्, तद्—मुक्ताक्षमालीहितम्। (तृ. त. पु.)

**अथवा**—ईहित—कर्तरि. भू. कृ. लइए त्यारे—मुक्ताक्षमाल्याः ईहितम्—मुक्ताक्षमालीहितम्, तद्—मुक्ताक्षमालीहितम्। (ष.त.पु.)

## ॥ श्रीकुन्थुजिनस्तुतिः ॥

( मालिनीवृत्तम् )

**भवतु मम नमः श्रीकुन्थुनाथाय तस्मा-**
**यमितशमितमोहायामितापाय हृद्यः।**
**सकलभरतभर्ताऽभूज्जिनोऽप्यक्षपाशा-**
**यमितशमितमोहायामितापायहृद्यः ॥१॥६५॥**

**अन्वय—हृद्यः यः सकलभरतभर्ता अपि अमितापायहृत् जिनः अभूत्, तस्मै अमितशमितमोहायामितापाय, अक्षपाशायमितशमितमोहाय श्रीकुन्थुनाथाय मम नमः भवतु।**

**અર્થ**—મનોહર એવા જે સમસ્ત ભરતક્ષેત્રનાં સ્વામી (હોવા છતાં) પણ અનંત પાપને હરણ કરવાવાળા જિનેશ્વરદેવ થયા. તે શમન કરાયા છે અસંખ્ય મોહના દીર્ઘ તાપ ને જેનાવડે એવા, ઇન્દ્રિયરૂપી દોરડાવડે નહી બંધાયેલા અને ઉપશમવાળા મુનિઓના અજ્ઞાનનો નાશ કરનાર એવા શ્રી કુંથુનાથ ભગવાનને મારા નમસ્કાર થાઓ......

**समास—**

**श्रीकुन्थुनाथाय—**श्रिया युक्तः—श्रीयुक्तः, (तृ. त. पु. ) श्रीयुक्तः कुन्थुनाथः श्रीकुन्थुनाथः, तस्मै—श्रीकुन्थुनाथाय। ( म. प. लो. क. )

**अमितशमितमोहायामितापाय—**न मितः—अमितः, (न.त.पु.) आयामः अस्ति यस्य—आयामी, 'अतोऽनेक०' ७।२।६....इन्, आयामी तापः—आयामितापः, ( वि. पू. क. ) मोहस्य आयामितापः—मोहायामितापः, ( ष. त. पु. ) अमितः शमितः मोहायामितापः येन सः—अमितशमितमोहायामितापः, तस्मै—अमितशमितमोहायामितापाय। (स. बहु. ब्री. )

**हृद्यः—**हृदि प्रियः—हृद्यः, 'हृद्यपद्यतुल्य०' ७।१।११.... निपातनम्।

**सकलभरतभर्ता—**सकलः भरतः—सकलभरतः, ( वि. पू. क. ) सकलभरतस्य भर्ता—सकलभरतभर्ता, 'याजकादिभिः०' ३।१।७८.... ( ष. त. पु. )।

**अक्षपाशायमितशमितमोहाय—**अक्षाणि एव पाशाः—अक्षपाशाः, ( अव. पू. क. ) न यमिताः—अयमिताः, ( न. त. पु. ) अक्षपाशैः अयमिताः—अक्षपाशायमिताः, ( तृ. त. पु. ) शमोऽस्ति येषां—शमिनः, 'अतोऽनेक०' ७।२।६....इन्, अक्षपाशायमिताः शमिनः—अक्षपाशायमितशमिनः, ( वि. उभ. क. ) अक्षपाशायमितशमिनां तमः—अक्षपाशायमितशमितमः, ( ष. त. पु. ) अक्षपाशायमितशमितमः हन्ति इति—अक्षपाशायमितशमितमोहः, तस्मै—अक्षपाशायमितशमितमोहाय। 'आशिषि हनः' ५।१।८०....ड (उप.त.पु.)।

**अमितापायहृद्**—न मिताः—अमिताः, ( न. त. पु. ) अमिताः अपायाः—अमितापायाः, ( वि. पू. क. ) अमितापायान् हरति—अमितापायहृद्, 'क्विप्' ५।१।१४८....क्विप् ( उप. त. पु. )।

**सकलजिनपतिभ्यः पावनेभ्यो नमः सन्–**
**नयनरवरदेभ्यः सारवादस्तुतेभ्यः**
**समधिगतनुतिभ्यो देववृन्दाद् गरीयो–**
**नयनरवरदेभ्यः सारवादस्तु तेभ्यः ॥ २ ॥ ६६ ॥**

**अन्वय**—पावनेभ्यः, सन्नयनरवरदेभ्यः, सारवादस्तुतेभ्यः, सारवात् देववृन्दात् समधिगतनुतिभ्यः, गरीयोनयनरवरदेभ्यः, तेभ्यः सकलजिनपतिभ्यः नमः अस्तु ।

**અર્થ**-પવિત્ર, સુંદર નયન, અવાજ અને દાંતવાળા, અર્થ પ્રધાન વચનવાળા ( વિદ્વાનો ) વડે સ્તુતિ કરાયેલા, અથવા અર્થ પ્રધાન વચનોવડે સ્તુતિ કરાયેલા, અવાજવાળા દેવોના સમૂહ દ્વારા પ્રાપ્ત કરાઈ છે સ્તુતિ જેનાવડે એવા, સુંદર નીતિવાળા મનુષ્યોને ઇચ્છિત આપનારા એવા તે સમસ્ત જિનેશ્વર ભગવંતોને નમસ્કાર થાઓ...

**समास**—

**सकलजिनपतिभ्यः**—जिनानां पतयः—जिनपतयः, ( ष. त. पु. ) सकलाः जिनपतयः—सकलजिनपतयः, तेभ्यः—सकलजिनपतिभ्यः । (वि.पू.क.)

**सन्नयनरवरदेभ्यः**—नयनानि च रवश्च रदाश्च—एतेषां समाहारः—नयनरवरदम्, ( समा. द्व. ) 'प्राणि—तुर्याङ्गाणाम्०' ३।१।१३७ ....एकत्वम्, सत् नयनरवरदं येषां ते—सन्नयनरवरदाः, तेभ्यः—सन्नयनरवरदेभ्यः । (स. ब. व्री. )

**सारवादस्तुतेभ्यः**—सारः वादः येषां ते—सारवादाः, (स.ब.व्री.) सारवादैः स्तुताः सारवादस्तुताः, तेभ्यः—सारवादस्तुतेभ्यः (तृ.त.पु.)।

**अथवा**—सारः प्रधानः येषां ते—सारप्रधानाः, ( स. ब. व्री. ) सारप्रधानाः वादाः—सारवादाः, ( म.प.लो.क. ) शेषं पूर्ववत्।

**समधिगतनुतिभ्यः**—समधिगता नुतिः यैः ते—समधिगतनुतयः, तेभ्यः—समधिगतनुतिभ्यः । ( स. ब. व्री. )।

**देववृन्दात्**—देवानां वृन्दम्—देववृन्दम्, तस्मात्—देववृन्दात् । ( ष. त. पु. )

**गरीयोनयनरवरदेभ्यः**—अतिशयेन गुरवः—गरीयांसः, 'गुणाङ्गाद् वेष्ठेयसू०' ७।३।९...ईयसु, 'प्रियस्थिर०' ७।४।३८...गुरुनो गर आदेशः, गरीयांसः नयाः येषां ते—गरीयोनयाः, ( स. ब. व्री.) गरीयोनयाः नराः—गरीयोनयनराः, ( वि. पू. क. ) गरीयोनयनराणाम् वराः—गरीयोनयनरवराः, ( ष. त. पु. ) गरीयोनयनरवरान् ददतीति—गरीयोनयनरवरदाः, तेभ्यः—गरीयोनयनरवरदेभ्यः, ( उप. त. पु. ) 'आतोडोऽह्वा०' ५।१।७६....ड।

सारवाद्—आरवैः सह वर्तते यत् तद्—सारवम्, तस्मात्—सारवात्। ( सहार्थ. ब. व्री. )

**स्मरत विगतमुद्रं जैनचन्द्रं चकासत्–**
**कविपदगमभङ्गं हेतुदन्तं कृतान्तम् ।**
**द्विरदमिव समुद्यद्दानमार्गं धुताघे–**
**कविपदगमभङ्गं हे तुदन्तं कृतान्तम् ॥ ३ ॥ ६७॥**

अन्वय—त्रिगतमुद्रम्, चकासत्कविपदगमभङ्गम्, हेतुदन्तम्, समुद्यद्दानमार्गम्, धुताघैकविपदगम्, अभङ्गम्, तुदन्तम्, कृतान्तम्, द्विरदम् इव हे–विगतमुद्रम्, चकासत्कविपदगमभङ्गम्, हेतुदन्तम्, समुद्यद्दानमार्गम्, धुताघैकविपदगम्, अभङ्गम्, कृतान्तम् तुदन्तम् जैनचन्द्रम् कृतान्तम् स्मरत ।

**અર્થ**—દૂર થયું છે પ્રમાણ જેમાંથી એવા, (વિશાલ) શોભતી અને કવિવડે વર્ણવવાને યોગ્ય છે ચરણના ચાલની રચના જેની એવા, ચિહ્નરૂપ છે દાંત જેના, શોભી રહ્યો છે મદ–જલવડે માર્ગ જેનાથી એવા, નષ્ટ થયું છે પાપ જેનું એવા (મનુષ્યોને) અસાધારણ વિશિષ્ટ સ્થાન તરફ ગમન કરાવનારા, નથી નાશ જેનો એવા, પીડા કરતાનો કરાયો છે નાશ જેના વડે એવા... હાથીની જેવા, હે (મનુષ્યો)! ચાલ્યું ગયું છે પ્રમાણ જેમાંથી એવા, શોભતા, અને કવિઓને આનંદ આપનાર પદો અને સરખા પાઠોની રચના છે જેને વિષે એવા, હેતુ (કારણ) રૂપી દાંતવાળા, શોભી રહ્યો છે દાનનો માર્ગ–જેને વિષે એવા, નાશ કરાય છે પાપ જેને વિષે એવા અદ્વિતીય સ્થાનની પ્રાપ્તિ કરાવનાર, અથવા નાશ કરાયો છે પાપરૂપી અસાધારણ વિપત્તિરૂપ વૃક્ષનો જેના વડે એવા, યમ–મૃત્યુને પીડા આપનાર, એવા જિનેશ્વરદેવનાં સિદ્ધાંતનું સ્મરણ કરો......

**समास**—( द्विरदपक्षे )

**विगतमुद्रम्**—विगता मुद्रा यस्मात्सः—विगतमुद्रः, तम्–विगतमुद्रम् । ( स. ब. व्री )

**चकासत्कविपदगमभङ्गम्**—पदयोः गमः—पदगमः, ( ष. त. पु. ) 'कृतिः' ३।१।७७.... ( ष. त. पु. ) पदगमस्य भङ्गः—पदगमभङ्गः, ( ष. त. पु. ) कविना वर्णनीयः—कविवर्णनीयः, ( तृ. त. पु. ) कविवर्णनीयः पदगमभङ्गः—कविपदगमभङ्गः, ( म. म. लो. क. ) चकासत्

कविपदगमभङ्गः यस्य सः–चकासत्कविपदगमभङ्गः, तम्–चकासत्कविपद-गमभङ्गम् । ( स. ब. व्री. )

**हेतुदन्तम्**—हेतू दन्तौ यस्य सः–हेतुदन्तः, तम्–हेतुदन्तम् । ( स. ब. व्री. )

**कृतान्तम्**—कृतम् अन्तम् येन सः–कृतान्तः, तम्–कृतान्तम् । ( स. ब. व्री. )

**समुद्यद्दानमार्गम्**—दानेन ( कृतः ) मार्गः–दानमार्गः, ( तृ. त. पु. ) समुद्यन् दानमार्गो यस्मात्सः–समुद्यद्दानमार्गः, तम्–समुद्यद्-दानमार्गम् । (स. ब. व्री. ) .

**धुताघैकविपदगम्**—धुताः अघाः यैः ते–धुताघाः, ( स. ब. व्री. ) विशिष्टम् पदम्–विपदम्, ( प्रादि. त. पु. ) एकं च तद् विपदं च–एकविपदम्, 'पूर्वकालैक'० ३।१।९७... ( वि. पू. क. ) एक-विपदं, गच्छति इति–एकविपदगः, ( उप. त. पु. ) नाम्नो गमः० ५।१। १३१...ड, धुताघानाम् एकविपदगः–धुताघैकविपदगः, तम्–धुताघै-कविपदगम् ।

**अभङ्गः**—नास्ति भङ्गो यस्य सः–अभङ्गः, तम्–अभङ्गम् । ( न. ब. व्री. )

**कृतान्तपक्षे—विगतमुद्रम्**—पूर्ववत् ।

**जैनचन्द्रम्**—जिनेषु चन्द्रः इव–जिनचन्द्रः, 'सिंहाद्यैः०' ३।१। ८९.... ( स. त. पु. ) जिनचन्द्रेण प्रोक्तम्–जैनचन्द्रः, तम्–जैनचन्द्रम् । तेन प्रोक्ते ६।३।१८१ नां सूत्रथी 'प्राग् जितादण् ६।१।१३... अण् ।

**चकासत्कविपदगमभङ्गम्**—आनन्दं प्रददतीति– आनन्दप्रदाः, ( उप. त. पु. ) कविनाम् आनन्दप्रदाः–कव्यानन्दप्रदाः, ( ष. त. पु. )

पदानि च गमाश्च—पदगमाः, (इ. द्वं.) काव्यानन्दप्रदाः पदगमाः—कविपदगमाः, (म. प लो. क.) कविपदगमानां भङ्गः—कविपदगमभङ्गः, (ष. त. पु.) चकासत् कविपदगमभङ्गः यस्मिन् सः—चकासत्कविपदगमभङ्गः, तम्—चकासत्कविपदगमभङ्गम्। (स. ब. व्री.)

**हेतुदन्तम्**—हेतवः एव दन्ताः यस्य सः—हेतुदन्तः, तम्—हेतुदन्तम्। (उप. ब. व्री.)

**कृतान्तम्**—कृतः अन्तः येन सः—कृतान्तः, तम्—कृतान्तम्। (स. ब. व्री.)

**द्विरदम्**—द्वौ रदौ यस्य सः—द्विरदः, तम्—द्विरदम्। (स. ब. व्री.)

**समुद्यद्दानमार्गम्**—दानस्य मार्गः—दानमार्गः, (ष. त. पु.) समुद्यन् दानमार्गः यस्मिन् सः—समुद्यद्दानमार्गः, तम्—समुद्यद्दानमार्गम्। (स. ब. व्री.)

**धुताघैकविपदगम्**—धुताः अघाः यस्मिन् तद्—धुताघम्, (स. ब. व्री.) विशिष्टं पदम्—विपदम्, (प्रादि. त. पु.) एकं विपदं—एकविपदम्, 'पूर्वकालैक' ३।१।९७... (वि. पू. क.) धुताघम् एकविपदम्—धुताघैकविपदम् (वि. पू. क.) शेषं पूर्ववत्—

**बीजी रीते**—एकाः विपदः एकविपदः, (वि. पू. क.) अघाः एव एकविपदः—अघैकविपदः, (अव. पू. क.) अघैकविपदः एव अगाः—अघैकविपदगाः, (अव. पू. क.) न गच्छन्तीति—अगाः, (उप. त. पु.) धुताः अघैकविपदगाः येन सः—धुताघैकविपदगः, तम्—धुताघैकविपदगम् (स. ब. व्री.)।

प्रचलदचिररोचिश्चारुगात्रे ! समुद्यत्-
सदसिफलकरामेऽभीमहासेऽरिभीते ! ।
सपदि पुरुषदत्ते ! ते भवन्तु प्रसादाः
सदसि फलकरा मेऽभीमहासेरिभीते ॥४॥६८॥

अन्वय—प्रचलदचिररोचिश्चारुगात्रे ! समुद्यत्सदसिफलकरामे ! अभीमहासे ! अरिभीते ! अभीमहासेरिभीते ! पुरुषदत्ते ! ते प्रसादाः मे सदसि सपदि फलकराः भवन्तु ।

અર્થ—પ્રકર્ષે કરીને ચળકતી ( ચંચલ ) અને ક્ષણમાત્ર છે પ્રકાશ જેનો એવી વીજળી જેવી મનોહર શરીરવાળી, દેદીપ્યમાન અને સુંદર એવી તલવાર અને ફલક વડે મનોહર, સૌમ્યહાસ્યવાળી, શત્રુનાં ભયને માટે ઉપદ્રવભૂત, ભય વિનાની મોટી મહિષી ઉપર બેઠેલી હે પુરુષદત્તા ! તારી કૃપા મને સભાને વિષે જલ્દીથી ફલ આપનારી થાઓ.

समास—

प्रचलदचिररोचिश्चारुगात्रे— न चिरा—अचिरा, ( न. त. पु. ) अचिरा रोचिः यस्याः सा—अचिररोचिः, ( स. ब. व्री. ) प्रचलन्ती अचिररोचिः— प्रचलदचिररोचिः, ( वि. पू. क. ) चारु च तद् गात्रं च—चारुगात्रं, ( वि. पू. क. ) प्रचलदचिररोचिरिव चारुगात्रं यस्याः सा— प्रचलदचिररोचिश्चारुगात्रा, तत्संबोधनम्—प्रचलदचिररोचिश्चारुगात्रे ! ( उप. ब. व्री. )

समुद्यत्सदसिफलकरामे—असिश्च फलकं च—असिफलके, ( इत. द्व. ) सती असिफलके—सदसिफलके, ( वि. पू. क. ) समुद्यती सदसिफलके समुद्यत्सदसिफलके, ( वि.पू.क. ) समुद्यत्सदसिफलकाभ्यां (कृता) रामा—

–समुद्यत्सदसिफलकरामा, तत्संबोधनम्–समुद्यत्सदसिफलकरामे ! तृतीया तत्कृतैः ३।१।६५... (तृ. त. पु.)।

**अभीमहासे !**—न भीमः–अभीमः, (न. त. पु.) अभीमः हासः यस्याः सा–अभीमहासा, तत्संबोधनम्–अभीमहासे ! (स. ब. व्री.)।

**अरिभीते**—अरिभ्यः भियः–अरिभियः, (पं. त. पु.) अरिभियाम् ईतिरिव–अरिभीतिः, तत्संबोधनम्–अरिभीते ! (स. त. पु.)।

**फलकरा**·फलं कुर्वन्तीति–फलकराः, 'हेतुतच्छीला०' ५।१।१०३-...ट (उप. त. पु.)।

**अभीमहासेरिभीते**—न विद्यते भीः यस्याः सा–अभीः, (न. ब. व्री.) महती सेरिभी–महासेरिभी, 'सन्महत्' ३।१।१०७... (वि. पू. क.) अभीः महासेरिभी–अभीमहासेरिभी, (वि. पू. क.) अभीमहासेरिभीम् इता–अभीमहासेरिभीता, तत्संबोधनम्–अभीमहासेरिभीते ! (द्वि.त.पु.)

## ॥ श्रीअरजिनस्तुतिः ॥

रागः–(सुरअसुरवन्दित...) (द्विपदीच्छन्दः)

**व्यमुचच्चक्रवर्तिलक्ष्मीमिह तृणमिव यः क्षणेन तं,**
**सन्नमदमरमानसंसारमनेकपराजितामरम् ।**
**द्रुतकलधौतकान्तमानमतानन्दितभूरिभक्तिभाक्–**
**संनमदमरमानसं सारमनेकपराजितामरम् ॥१॥६९॥**

अन्वय—यः अनेकपराजितां चक्रवर्तिलक्ष्मीम् इह तृणमिव क्षणेन व्यमुचत्, तं सन्नमदमरमानसंसारं, द्रुतकलधौतकान्तम्, आनन्दितभूरिभक्तिभाक्सन्नमदमरमानसं, सारम्, अनेकपराजितामरम्, अरम् आनमत।

અર્થ-જેણે અનેક હાથીઓથી શોભતી અથવા-અનેક શત્રુઓ-વડે પરાજીત ન કરી શકાય તેવી ચક્રવર્તીની લક્ષ્મીનો આ લોકમાં તૃણની જેમ ક્ષણવારમાં જ ત્યાગ કર્યો તે. ( અરનાથ ) નાશ પામ્યો છે મદ, મરણ, માન અને સંસાર જેનો એવા, તપેલા સુવર્ણ જેવા મનોહર, આનંદિત કરાયું છે અત્યંત ભક્તિને ભજનારા અને સારી રીતે પ્રણામ કરતા દેવોનું ચિત્ત જેનાવડે એવા, શ્રેષ્ઠ, તથા અનેક પરાજીત કરાયા છે દેવો જેના વડે એવા, અરનાથ ભગવાનને તમે નમસ્કાર કરો...

**समास–**

**चक्रवर्तिलक्ष्मीम्**—चक्रेण सह वर्तते इति–चक्रवर्ती, 'ग्रहादिभ्यः०' ५।१।५३...णिन्, चक्रवर्तिनः लक्ष्मीः–चक्रवर्तिलक्ष्मीः, तां–चक्रवर्तिलक्ष्मीम्। ( ष. त. पु. )

**सन्नमदमरमानसंसारम्**—मदश्च मरश्च मानश्च संसारश्च–मदमरमानसंसाराः, ( इ. द्व. ) सन्नाः मदमरमानसंसाराः यस्य सः–सन्नमदमरमानसंसारः, तम्–सन्नमदमरमानसंसारम्। ( स. ब. व्री. )

**अनेकपराजिताम्**—अनेकाभ्यां पिबन्तीति–अनेकपाः, 'स्था. पा०' ५।१।१४२....क, ( उप. त. पु. ) अथवा 'क्विप्.' ५।१।१४८....क्विप्, अनेकपैः ( अनेकपाभिः ) राजिता–अनेकपराजिता, ताम् –अनेकपराजिताम्। ( तृ. त. पु. )

**द्रुतकलधौतकान्तम्**—द्रुतं कलधौतं–द्रुतकलधौतम्, (वि. पू. क.) द्रुतकलधौतवत् कान्तः–द्रुतकलधौतकान्तः, तम्–द्रुतकलधौतकान्तम्। ( उप. पू. क. )

**आनन्दितभूरिभक्तिभाक्सन्नमदमरमानसम्**–भूरिश्चासौ भक्तिश्च भूरिभक्तिः, ( वि. पू. क. ) भूरिभक्तिं भजन्ति इति–भूरिभक्तिभाजः,

'भजोविण्' ५।१।१४६....विण्, (उप. त. पु.) सन्नमन्तः अमराः—सन्नमदमराः, (वि. पू. क.) भूरिभक्तिभाजः सन्नमदमराः—भूरिभक्तिभाक्-सन्नमदमराः, (वि. पू. क.) भूरिभक्तिभाक्सन्नमदमराणां मानसम्—भूरिभक्तिभाक्सन्नमदमरमानसम्, (ष. त. पु.) आनन्दितं भूरिभक्तिभाक्-सन्नमदमरमानसं येन सः—आनन्दितभूरिभक्तिभाक्सन्नमदमरमानसः, तम्—आनन्दितभूरिभक्तिभाक्सन्नमदमरमानसम्। (स. ब. व्री.)

अनेकपराजितामरम्—अनेके पराजिताः अमराः येन सः—अनेकपराजितामरः, तम्—अनेकपराजितामरम्। (स. ब. व्री.)

**स्तौति समन्ततः स्म समवसरणभूमौ यं सुरावलिः,**
**सकलकलाकलापकलिताऽपमदाऽरुणकरमपापदम्।**
**तं जिनराजविसरमुज्जासितजन्मजरं नमाम्यहं,**
**सकलकलाकलाऽपकलितापमदारुणकरमपापदम्**
**॥ २ ॥ ॥ ७० ॥**

अन्वय—सकलकलाकलापकलिता अपमदा सकलकला कला सुरावलिः यं समवसरणभूमौ समन्ततः स्तौति स्म तम् अरुणकरम् अपापदम् उज्जासितजन्मजरम् अपकलितापम् अदारुणकरम् अपापदम् जिनराजविसरम् अहं नमामि।

અર્થ—સમસ્ત કલાના સમૂહથી યુક્ત, ચાલ્યો ગયો છે મદ જેનો એવી, કોલાહલ વડે યુક્ત, સુંદર એવી દેવોની શ્રેણિએ જે (જિનસમૂહ)ની સમવસરણ ભૂમિમાં ચારે તરફ સ્તુતિ કરી હતી તે લાલહાથવાળા, ચાલી ગઈ છે આપત્તિ જેની એવા, નાશ કરાયો છે જન્મ અને વૃદ્ધત્વનો જેના વડે એવા, દૂર કર્યો છે કલહ અને

સંતાપ જેણે એવા, અથવા દૂર કર્યો છે કલિયુગનો સંતાપ જેણે એવા, ભયંકર (કાર્ય) ને નહિ કરનારા, પુણ્યને આપનારા એવા જિનેશ્વર ભગવંતનાં સમૂહને હું નમસ્કાર કરૂં છું.

**समास—**

**समवसरणभूमौ**—समवसरणस्य भूमिः—समवसरणभूमिः,—तस्याम् —समवसरणभूमौ। ( ष. त. पु. )

**सुरावलिः**—सुराणाम् आवलिः—सुरावलिः । ( ष. त. पु. )

**सकलकलाकलापकलिता**—सकलाः कलाः—सकलकलाः, ( वि. पू. क. ) सकलकलानां कलापः—सकलकलाकलापः, ( ष त. पु. ) सकलकलाकलापेन कलिता—सकलकलाकलापकलिता। ( तृ. त. पु. )

**अपमदा**—अपगतः मदः यस्याः सा—अपमदा। ( प्रादि. ब. व्री. )

**अरुणकरम्**—अरुणौ करौ यस्य सः—अरुणकरः,.... तम्—अरुणकरम्। ( स. ब. व्री. )

**अपापदम्**—अपगता आपदः यस्मात् सः—अपापत्. तम्—अपापदम्। ( प्रादि. ब. व्री. )

**जिनराजविसरम्**—जिनानां राजानः—जिनराजाः, ( ष. त. पु. ) 'राजन्सखे०' ७।३।१०६....अट्, जिनराजानां विसरः—जिनराजविसरः, तम्—जिनराजमिसरम्। ( ष. त. पु. )

**उज्जासितजन्मजरम्**—जन्म च जरा च—जन्मजरे, ( इ. द्व. ) उज्जासिते जन्मजरे येन सः—उज्जासितजन्मजरः, तम्—उज्जासितजन्मजरम्। ( स. ब. व्री. )

**सकलकला**—कलकलेन सह वर्तते या सा—सकलकला। ( सहार्थ. ब. व्री. )

**अपकलितापम्**—कलिश्च तापश्च-कलितापौ, (इ. द्व.) अपगतौ कलितापौ यस्मात् सः—अपकलितापः, तम्—अपकलितापम्। (प्रादि.ब.व्री.)

**अथवा**—कलेः तापः—कलितापः, (ष. त. पु.) अपगतः कलितापः यस्मात् सः अपकलितापः, तम्—अपकलितापम्। (प्रादि. ब. व्री.)

**अदारुणकरम्**—न दारुणम्-अदारुणम्, (न. त. पु.) अदारुणं करोति इति—अदारुणकरः, तम्—अदारुणकरम्। (उप. त. पु.) 'हेतु—तच्छीला०.' ५।१।१०३....ट,

**अपापदम्**—न पापम्—अपापम्, (न. त. पु.) अपापं ददाति—अपापदः; तम्—अपापदम्। (उप. त. पु.) 'आतो डो०' ५।१।७६..ड।

**भीममहाभवाब्धिभवभीतिविभेदि परास्तविस्फुरत्—**
**परमतमोहमानमतनूनमलं घनमघवते हितम्।**
**जिनपतिमतमपारमर्त्यामरनिर्वृतिशर्मकारणं,**
**परमतमोहमानमत नूनमलङ्घनमघवतेहितम्**
**॥ ३ ॥ ॥ ७१ ॥**

**अन्वय—भीममहाभवाब्धिभवभीतिविभेदि, परास्तविस्फुरत्-परमतमोहमानम्, अतनूनम्, अलं, घनम् अघवते हितम्, अपारमर्त्यामरनिर्वृतिशर्मकारणं, परमतमोहम्, अलङ्घनमघवता इहितम्, जिनपतिमतं नूनम् आनमत।**

**અર્થ**—ભયંકર અને મોટા સંસાર સમુદ્રમાં ઉત્પન્ન થનારાં ભયને ભેદનારા, દૂર કરાયા છે સ્ફુરાયમાન એવા અન્યમત, મોહ અને માન જેના વડે એવા, વિશાળ અને સંપૂર્ણ અત્યંત ગહન, પાપીઓને હિતકારી, અનેક મનુષ્યો અને દેવોના મોક્ષસુખનાં કારણ-ભૂત, અત્યંત (અજ્ઞાનરૂપી) અંધકારનો નાશ કરનાર,... નથી પરાજય જેનો એવા ઇન્દ્રવડે અભીષ્ટ, એવા જિનેશ્વર ભગવંતનાં સિદ્ધાંતને તમે નિશ્ચયથી નમસ્કાર કરો...

**समास–**

**भीममहाभवाब्धिभवभीतिविभेदि**—आपः धीयन्ते यत्र–अब्धिः, (उप. त. पु.) 'व्याप्यादाधारे०' ५।३।८८.... कि, भव एव अब्धिः–भवाब्धिः, (अव.पू.क.) महांश्चासौ भवाब्धिश्च–महाभवाब्धिः, 'सन्महत्०' ३।१।१०७... (वि. पू. क. ) भीमः महाभवाब्धिः–भीममहाभवाब्धिः, (वि. पू. क. ) भीममहाभवाब्धौ भवाः–भीममहाभवाब्धिभवाः, (स. त. पु. ) भीममहाभवाब्धिभवाः भीतयः–भीममहाभवाब्धिभवभीतयः, (वि. पू. क. ) भीममहाभवाब्धिभवभीतीः विभिनत्ति इत्येवंशीलम्–भीममहाभवाब्धिभवभीतिविभेदि, तत्–भीममहाभवाब्धिभवभीतिविभेदि । 'अजातेः शीले' ५।१।१५४...णिन्, (उप. त. पु. ) ।

**परास्तविस्फुरत्परमतमोहमानम्**—परेषां मतानि–परमतानि, (ष. त. पु. ) परमतानि च मोहश्च मानश्च–परमतमोहमानाः, (इ. द्व.) परास्ताः विस्फुरन्तः परमतमोहमानाः येन तत्–परास्तविस्फुरत्परमतमोहमानम्, तद्–परास्तविस्फुरत्परमतमोहमानम् । (स. बहु. ब. व्री. )

**अतनूनम्**—तनु च तद् ऊनञ्च–तनूनम्, (वि. उभ. प. क. ) न तनूनम्–अतनूनम्,... तद्–अतनूनम् । (न. त. पु. )

**अघवते**—अघः अस्ति यस्य यस्मिन् वा–अघवान्,... तस्मै–अघवते । 'तदस्या०' ७।२।१... मतु ।

**जिनपतिमतम्**—जिनानां पतयः–जिनपतयः, (ष. त. पु. ) जिनपतीनां मतम्–जिनपतिमतम्, तद्–जिनपतिमतम् । (ष. त. पु. )

**अपारमर्त्यामरनिर्वृतिशर्मकारणम्**—मर्त्याश्च अमराश्च–मर्त्यामराः (इ. द्व. ) निर्वृतेः शर्माणि–निर्वृतिशर्माणि, (ष. त. पु. ) मर्त्यामराणां निर्वृतिशर्माणि–मर्त्यामरनिर्वृतिशर्माणि, (ष. त. पु. ) न विद्यते पारः येषां

तानि–अपाराणि, ( न. ब. व्री.) अपाराणि मर्त्यामरनिर्वृतिशर्माणि–अपारमर्त्यामरनिर्वृतिशर्माणि, ( वि. पू. क. ) अपारमर्त्यामरनिर्वृतिशर्मणां कारणम् –अपारमर्त्यामरनिर्वृतिशर्मकारणम्, तत् – अपारमर्त्यामरनिर्वृतिशर्मकारणम्। ( ष. त. पु. )

**परमतमोहम्**—परमं तमः–परमतमः, ( वि. पू. क. ) परमतमः हन्तीति–परमतमोहम्, तद्–परमतमोहम्। ( उप. त. पु. )

**अलङ्घनमघवता**—न विद्यते लङ्घनम् यस्य सः–अलङ्घनः, ( न. ब.व्री.) अलङ्घनः मघवा–अलङ्घनमघवा, तेन–अलङ्घनमघवता। (वि.पू.क.)

**याऽत्र विचित्रवर्णविनतात्मजपृष्ठमधिष्ठिता हुतात्–**
**समतनुभागविकृतधीरसमदवैरिव धामहारिभिः।**
**तडिदिव भाति सान्ध्यघनमूर्धनि चक्रधराऽस्तु मुदे–**
**ऽसमतनुभा गवि कृतधीरसमदवैरिवधा महारिभिः**
**॥ ४ ॥ ॥ ७२ ॥**

**अन्वय**—अत्र या विचित्रवर्णविनतात्मजपृष्ठम् अधिष्ठिता, **हुतात्समतनुभाग्, अविकृतधीः, असमदवैः इव धामहारिभिः महारिभिः सान्ध्यघनमूर्धनि तडित् इव भाति सा असमतनुभा, गवि कृतधीरसमदवैरिवधा, चक्रधरा मुदे अस्तु।**

**અર્થ**–આ લોકને વિષે. જેણી વિચિત્રવર્ણવાળા ગરૂડની પીઠ ઉપર બેઠેલી, અગ્નિ સમાન (કાન્તિવાળા) શરીરને ભજનારી, (ધારણ કરનારી) વિકાર રહિત બુદ્ધિવાળી, અસાધારણ દાવાનળ જેવા તેજ વડે મનોહર મહાન્ ચક્રોવડે સંધ્યાકાલનાં મેઘનાં મસ્તકને વિષે વીજળીની જેમ શોભે છે તે અનુપમ શરીરની કાન્તિવાળી, પૃથ્વીને વિષે અથવા સ્વર્ગને વિષે કરાયો છે પરાક્રમી મદોન્મત્ત વૈરિનો વધ જેણે એવી અપ્રતિચક્રા દેવી હર્ષને માટે થાઓ...

समास—

**विचित्रवर्णविनतात्मजपृष्ठम्**—विचित्रा वर्णा यस्मिन् सः—विचित्रवर्णः, ( स. ब. व्री. ) आत्मनः जातः—आत्मजः, ( उप. त. पु. ) 'अजातेः पञ्चम्याः '... ड, विनतायाः आत्मजः—विनतात्मजः, ( ष. त. पु. ) विचित्रवर्णः विनतात्मजः—विचित्रवर्णविनतात्मजः, ( वि. पू. क. ) विचित्रवर्णविनतात्मजस्य पृष्ठम्—विचित्रवर्णविनतात्मजपृष्ठम्, तद्—विचित्रवर्णविनतात्मजपृष्ठम् । ( ष. त. पु. )

**हुतात्समतनुभाग्**—हुतम् अत्तीति – हुतात्, ( उप. त. पु. ) 'अदोनन्नात्' ५।१।१५०.... क्विप्, हुतादा समा—हुतात्समा, 'ऊनार्थ०' ३।१।६७ ( तृ. त. पु. ) हुतात्समा तनुः—हुतात्समतनुः, ( वि. पू. क. ) हुतात्समतनुं भजते इति—हुतात्समतनुभाग् । 'भजो–विण्' ५।१।१४६... विण् ।

**अविकृतधीः**—न विकृता—अविकृता, ( न. त. पु. ) अविकृता धीः यस्याः सा—अविकृतधीः । ( स. ब. व्री. )

**असमदवैः**—असमाश्च ते दवाश्च—असमदवाः,... तैः—असमदवैः । (वि. पू. क. )

**धामहारिभिः**—धाम्ना हरन्तीत्येवंशीलानि – धामहारीणि, तैः धामहारिभिः । (उप. त. पु.) 'अजातेः शीले' ५।१।१५४...णिन् ।

**सान्ध्यघनमूर्धनि**—सन्ध्यायां भवः—सान्ध्यः, 'भवे' ६।३।१२३ ...अण्, सान्ध्यः घनः—सान्ध्यघनः, ( वि. पू. क. ) सान्ध्यघनस्य मूर्धा —सान्ध्यघनमूर्धा,...तस्मिन्—सान्ध्यघनमूर्धनि । ( ष. त. पु.)

**चक्रधरा**—चक्रं धरतीति चक्रधरा 'आयुधादिभ्यो०' ५।१।९४ ...अच्, । ( उप. त. पु. )

**असमतनुभा**—तनोः भा–तनुभा, ( ष. त. पु. ) असमा तनुभा यस्याः सा–असमतनुभा । ( स.ब.व्री.)

**कृतधीरसमदवैरिवधा**—मदेन सहिताः–समदाः, ( तृ.त.पु. ) धीराश्च ते समदाश्च–धीरसमदाः, ( वि. उभ. प. क.) धीरसमदाः वैरिणः धीरसमदवैरिणः, ( वि. पू. क. ) धीरसमदवैरिणां वधः–धीरसमदवैरिवधः, (ष.त.पु.) कृतः धीरसमदवैरिवधः यया सा–कृतधीरसमदवैरिवधा । (स.ब.व्री.)

**महारिभिः**—अराः सन्ति येषाम् तानि–अरीणि, 'अतोऽनेक०' ७।२।६....इन्, महान्ति च तानि अरीणि च–महारीणि,...तैः–महारिभिः । 'सन्महत्' ३।१।१०७...( वि.पू.क.)

## ॥ श्रीमल्लिनाथजिनस्तुतिः ॥

( रुचिरा-छन्दः )

**नुदंस्तनुं प्रवितर मल्लिनाथ ! मे**
**प्रियङ्गुरोचिररुचिरोचितां वरम् ।**
**विडम्बयन् वररुचिमण्डलोज्ज्वलः**
**प्रियं गुरोऽचिररुचिरोचिताम्बरम् ॥१॥७३॥**

**अन्वय—**मल्लिनाथ ! गुरो ! अरुचिरोचितां तनुं नुदन्, प्रियङ्गुरोचिः, वररुचिमण्डलोज्ज्वलः, अचिररुचिरोचिताम्बरं विडम्बयन्, मे प्रियं वरं प्रवितर ।

**અર્થ**–હે મલ્લિનાથ સ્વામિન્ ! ખરાબ અને અયોગ્ય એવા શરીરને દૂર ફેંકતો, પ્રિયંગુ વૃક્ષનાં જેવી કાન્તિવાળા, ઉત્તમ ભામંડલવડે મનોહર, વીજળીવડે પ્રકાશિત એવા આકાશને વિડંબના કરતો એવો તું મને પ્રિય–એવું વરદાન આપ....

समास–

**मल्लिनाथ !**—मल्लिः नाम यस्य सः—मल्लिनामा, (स. ब. व्री.) मल्लिनामा नाथः—मल्लिनाथः, तत्संबोधनम्—मल्लिनाथ ! (म.प.लो.क.)

**प्रियङ्गुरोचिः**—प्रियङ्गुवत् रोचिः यस्य सः—प्रियङ्गुरोचिः। (उप. ब. व्री.)

**अरुचिरोचिताम्**—रुचिरा चासौ उचिताश्च – रुचिरोचिता, (वि. उभ. प. क.) न रुचिरोचिता—अरुचिरोचिता, ताम्—अरुचिरोचिताम्। (न. त. पु.)

**वररुचिमण्डलोज्ज्वलः**— रुचीनां मण्डलम् – रुचिमण्डलम्, (ष. त. पु.) वरं च तद् रुचिमण्डलं च—वररुचिमण्डलम्, (वि.पू.क.) वररुचिमण्डलेन (कृतः) उज्ज्वलः—वररुचिमण्डलोज्ज्वलः, 'तृतीया०' ३।१।६५...(तृ. त. पु.)।

**अचिररुचिरोचिताम्बरम्**—न चिरा–अचिरा, (न. त. पु.) अचिरा रुचिः यस्याः सा– अचिररुचिः, (स. ब. व्री.) अचिररुच्या रोचितम्—अचिररुचिरोचितम्, (तृ. त. पु.) अचिररुचिरोचितं च तद् अम्बरं च– अचिररुचिरोचिताम्बरम्, तद् – अचिररुचिरोचिताम्बरम्। (वि. पू. क.)

जवाद्गतं जगदवतो वपुर्व्यथा–
कदम्बकैरवशतपत्त्रसं पदम् ।
जिनोत्तमान् स्तुत दधतः स्रजं स्फुरत्–
कदम्बकैरवशतपत्रसम्पदम् ॥ २ ॥ ७४ ॥

अन्वय—वपुर्व्यथाकदम्बकैः अवशतपत्त्रसं पदं गतं जगत् जवात् अवतः स्फुरत्कदम्बकैरवशतपत्रसम्पदम् स्रजं दधतः जिनोत्तमान् स्तुत ।

**અર્થ**-શરીરની પીડાનાં સમૂહવડે પરાધીન તાપને અનુભવતાં એવા પ્રાણીઓ છે જેને વિષે તેવા સ્થાનને પામીને રહેલા વિશ્વનું વેગથી રક્ષણ કરતાં, વિકસ્વર એવી કદંબ-કુમુદ અને કમલની સંપત્તિવાળી માલાને ધારણ કરતાં, એવા જિનેશ્વરદેવોની તમે સ્તુતિ કરો......

**समास—**

**वपुर्व्यथाकदम्बकैः**—वपुषः व्यथाः—वपुर्व्यथाः, (ष. त. पु.) वपुर्व्यथानां कदम्बकानि—वपुर्व्यथाकदम्बकानि, तैः वपुर्व्यथाकदम्बकैः । (ष. त. पु.)

**अवशतपत्त्रसम्**—अवशाः तपन्तः त्रसाः यस्मिन् तद्—अवशतपत्त्रसम्, तद्—अवशतपत्त्रसम् । (स. बहु. ब्री.)

**जिनोत्तमान्**—जिनेषु उत्तमाः—जिनोत्तमाः, तान्—जिनोत्तमान् । (स. त. पु.)

**स्फुरत्कदम्बकैरवशतपत्रसम्पदम्**—कदम्बाश्च कैरवाणि च शतपत्राणि च—कदम्बकैरवशतपत्राणि, (इ. द्व.) कदम्बकैरवशतपत्राणाम् सम्पद्—कदम्बकैरवशतपत्रसम्पद्, (ष. त. पु.) स्फुरन्ती कदम्बकैरवशतपत्रसम्पद् यस्यां सा—स्फुरत्कदम्बकैरवशतपत्रसम्पद, ताम्—स्फुरत्कदम्बकैरवशतपत्रसम्पदम् । (स. ब. ब्री.)

स सम्पदं दिशतु जिनोत्तमागमः
शमावहन्नतनुतमोहरोऽदिते ।
स चित्तभूः क्षत इह येन यस्तपः–
शमावहन्नतनुत मोहरोदिते ॥ ३ ॥ ७५ ॥

अन्वय—यः तपःशमौ अहन् अदिते मोहरोदिते अतनुत, सः चित्तभूः येन इह क्षतः सः शम् आवहन् अतनुतमोहरः जिनोत्तमागमः सम्पदं दिशतु ।

અર્થ—જેણે (કામે) તપ અને ઉપશમનો નાશ કર્યો છે અને અખંડિત મોહ અને રૂદનનો વિસ્તાર કર્યો છે એવો તે કામદેવ જેના (આગમ) વડે આ જગતમાં નાશ કરાયો તે સુખને કરનાર, ગાઢ (અજ્ઞાનરૂપી) અંધકારને હરનાર, અથવા–અતિશય તર્કોને આપનાર, એવો જિનેશ્વરદેવનો સિદ્ધાંત (તમને) સંપત્તિ આપો....

समास—

**जिनोत्तमागमः**—जिनेषु उत्तमाः–जिनोत्तमाः, ( स. त. पु. ) जिनोत्तमानाम् आगमः–जिनोत्तमागमः । ( ष. त. पु. )

**अतनुतमोहरः**—न तनु–अतनु, ( न. त. पु. ) अतनु च तद् तमश्च–अतनुतमः, ( वि. पू. कर्म. ) अतनुतमः हरतीति–अतनुतमोहरः । 'हगो वयोऽनुद्यमे०' ५।१।९६....अच् । ( उप. त. पु. )

**अथवा**—अतिशयेन तनवः–तनुतमाः, 'प्रकृष्टे तमप्' ७।३।५ ....तमप्....न तनुतमाः–अतनुतमाः, ( न. त. पु. ) अतनुतमाश्च ते ऊहाश्च–अतनुतमोहाः, अतनुतमोहान् रातीति–अतनुतमोहरः । (उप.त.पु.) 'आतोडो०' ५।१।७६....ड ।

**अदिते**—न दिते–अदिते, ते–अदिते । ( न. त. पु. )

**चित्तभूः**—चित्ते भवतीति–चित्तभूः । **अथवा**–चित्ताद् भवतीति –चित्तभूः । 'दिद्युद्–ददृद्०' ५।२।८३....क्विप् । ( उप. त. पु. )

**तपःशमौ**—तपश्च शमश्च–तपःशमौ, तौ....तपःशमौ । ( इ. द्व. )

**मोहरोदिते**—मोहश्च रोदितं च–मोहरोदिते, ते–मोहरोदिते । ( इ. द्व. )

द्विपं गतो हृदि रमतां दमश्रिया
प्रभाति मे चकितहरिद्विपं नगे ।
वटाह्वये कृतवसतिश्च यक्षराट्
प्रभातिमेचकितहरिद् विपन्नगे ॥ ४ ॥ ७६ ॥

अन्वय—चकितहरिद्विपं द्विपं गतः, विपन्नगे वटाह्वये नगे कृतवसतिः, प्रभातिमेचकितहरिद् च यक्षराट् मे दमश्रिया प्रभाति हृदि रमताम् ।

અર્થ—ભયભીત થયો છે ઇન્દ્રનો હાથી જેનાથી તેવા હાથી ઉપર બેઠેલો, ચાલી ગયા છે સર્પો જેમાંથી તેવા વડ નામનાં વૃક્ષ ઉપર કરાઈ છે વસતિ જેના વડે તેવા, અને કાન્તિથી અતિશય શ્યામ કરાઇ છે દિશાઓ જેના વડે તેવા, યક્ષરાજ (કપર્દી) મારા ઉપશમરૂપી લક્ષ્મીવડે શોભતા હૃદયને વિષે રમો......

समास—

दमश्रिया—दम एव श्रीः—दमश्रीः, ( अव. पू. क. ) अथवा—दमस्य श्रीः—दमश्रीः, तया....दमश्रिया । ( ष. त. पु. )

चकितहरिद्विपम्—हरेः द्विपः—हरिद्विपः, ( ष.त.पु. ) चकितः हरिद्विपः येन सः—चकितहरिद्विपः, तम्—चकितहरिद्विपम् । ( स.ब.व्री )

वटाह्वये—वटः आह्वयः यस्य सः—वटाह्वयः, तस्मिन्—वटाह्वये । ( स. ब. व्री. ) (आहूयते अनेन—आह्वयः ); 'ह्वः समाह्वया०' । ५।३।४१ अल् अन्त....निपातन...।

कृतवसतिः—कृता वसतिः येन सः—कृतवसतिः । (स.ब.व्री.)

यक्षराट्—राजते इति—राट्, 'दिद्युद्दद्द०' ५।२।८३....क्विप्, यक्षाणां राट्—यक्षराट् । ( ष. त. पु. )

**प्रभातिमेचकितहरिद्**—अतिशयेन मेचकिता— अतिमेचकिता, 'अतिरतिक्रमे च' ३।१।४५....( गति. त. पु.) प्रभया अतिमेचकिता हरितः येन सः—प्रभातिमेचकितहरित् । ( व्य. बहु. ब. व्री. )

**विपन्नगे**—विगताः पन्नगाः यस्मात् सः—विपन्नगः, तस्मिन् — विपन्नगे । ( स. ब. व्री. )

## ॥ श्रीमुनिसुव्रतजिनस्तुतिः ॥

( तत्कुटकम् )

**जिनमुनिसुव्रतः समवताज्जनताऽवनतः**
**स मुदितमानवा धनमलोभवतो भवतः ।**
**अवनिविकीर्णमादिषत यस्य निरस्तमनः–**
**समुदितमानबाधनमलो भवतो भवतः ॥१॥७७॥**

**अन्वय—मुदितमानवाः अलोभवतः भवतः यस्य अवनिविकीर्णं धनम् आदिषत स जनताऽवनतः निरस्तमनःसमुदितमानबाधनमलः जिनमुनिसुव्रतः भवतः भवतः समवतात् ।**

**અર્થ**—હર્ષિત થયેલા એવા માનવો લોભરહિત થતા એવા જે ( પ્રભુ )નાં પૃથ્વીને વિષે ઢગલારૂપે (એકઠા) થયેલાં ધનને ગ્રહણ કરતાં હતાં તે ( પ્રભુ ) માનવોનાં સમૂહવડે પ્રણામ કરાયેલાં, દૂર કરાયા છે મનને વિષે એકઠા થયેલા માન, પીડા અને ( કર્મરૂપી ) મલ જેના વડે એવા જિનેશ્વર શ્રીમુનિસુવ્રતસ્વામિ આપનું સંસારથી સારી રીતે રક્ષણ કરો......

**समास—**

**जिनमुनिसुव्रतः**— जिनश्चासौ मुनिसुव्रतश्च — जिनमुनिसुव्रतः । ( वि. पू. क. )

**जनताऽवनतः**—जनानां समूहः--जनता, 'ग्रामजनबन्धुगजसहाया-त्तल्०' ६।२।२८...तल्, जनतया अवनतः—जनताऽवनतः । (तृ.त.पु.)

**मुदितमानवाः**— मुदिताश्च ते मानवाश्च — मुदितमानवाः । ( वि. पू. क. )

**अलोभवतः**—लोभः अस्ति यस्य—लोभवान् 'तदस्या०' ७।२।१ ...मतु., न लोभवान्—अलोभवान्, तस्य—अलोभवतः । ( न.त.पु. )

**अवनिविकीर्णम्**—अवन्यां विकीर्णम्—अवनिविकीर्णम्, तद्—अवनिविकीर्णम् । 'क्तेन०' ३।१।९२...( स. त. पु. ).

**निरस्तमनःसमुदितमानबाधनमलः**—मानश्च बाधनंच मलश्च—मानबाधनमलाः, ( इ. द्व. ) मनसि समुदिताः—मनःसमुदिताः, 'क्तेन' ३।१।९२...( स. त. पु. ) निरस्ताः मनःसमुदिताः मानबाधनमलाः येन सः—निरस्तमनःसमुदितमानबाधनमलः । ( स. ब. ब. व्री. )

**प्रणमत तं जिनव्रजमपारविसारिरजो-**
**दलकमलानना महिमधाम भयासमरुक् ।**
**यमतितरां सुरेन्द्रवरयोषिदिलामिलनो-**
**दलकमला ननाम हिमधामभया समरुक् ॥२॥७८॥**

अन्वय—अपारविसारिरजोदलकमलानना, अरुक्, इलामिल-नोदलकमला, हिमधामभया समरुक्, सुरेन्द्रवरयोषिद्, यम् अतितरां ननाम तं महिमधाम भयासं जिनव्रजं प्रणमत ।

અર્થ—અપાર વિસ્તાર પામવાનાં સ્વભાવવાળા એવા પરાગનાં કણો ( પરાગ અને પત્રો ) છે જેમાં એવા કમલ જેવા મુખવાળી, નીરોગી, પૃથ્વીના સ્પર્શથી ઉત્પન્ન થયો છે કેશોમાં મલ જેને એવી,

ચંદ્રની કાન્તિ સમાન કાન્તિ છે જેની એવી, સુંદર ઈન્દ્રાણી જે (જિનસમૂહ)ને અતિશય પ્રણામ કરતી હતી તે મહિમાના સ્થાનરૂપ ભયનો નાશ કરનાર એવા જિનેશ્વરભગવંતનાં સમૂહને તમે પ્રણામ કરો......

**समास—**

**जिनव्रजम्**—जिनानां व्रजः—जिनव्रजः... तं—जिनव्रजम्। (ष.त.पु.)

**अपारविसारिरजोदलकमलानना**—न विद्यते पारः येषां तानि—अपाराणि, (न. ब. व्री.) विसरन्ति इत्येवंशीलानि—विसारीणि, 'विप-रिमात्' 'सर्त्तेः' ५।२।५४...घिनण्, रजसां दलानि—रजोदलानि, (ष.त.पु.) अपाराणि विसारीणि रजोदलानि यस्मिन् तत्—अपारविसारि-रजोदलम्, (स.ब. ब. व्री.) **अथवा**—रजांसि च दलानि च-रजोदलानि, (इ. द्व.) अपाराणि विसारीणि रजोदलानि यस्य तद्—अपारविसारिरजो-दलम्, (स. ब. ब. व्री.) अपारविसारिरजोदलं च तद् कमलं च—अपारविसारिरजोदलकमलम्, (वि. पू. क.) अपारविसारिरजोदलकमलवत् आननं यस्याः सा—अपारविसारिरजोदलकमलानना। (उप. ब. व्री.)

**महिमधाम**—महिम्नः धाम—महिमधाम, तद्—महिमधाम।(ष.त.पु.)

**भयासम्**—भयम् अस्यतीति—भयासः, तम्—भयासम्। (उप. त. पु.) 'कर्मणोऽण्' ५।१।७२....अण्...

**अरुक्**—न विद्यते रुक् यस्याः सा—अरुक्। (न. ब. व्री.)

**सुरेन्द्रवरयोषित्**—सुराणाम् इन्द्रः—सुरेन्द्रः, (ष. त. पु.) वरा-चासौ योषित् च—वरयोषित्, (वि. पू. क.) सुरेन्द्रस्य वरयोषित्—सुरेन्द्रवरयोषित्। (ष. त. पु.)

**इलामिलनोद्दलकमला**—इलायाः मिलनम्—इलामिलनम्, 'क्तिः' ३।१।७७ (ष.त.पु.) इलामिलनेन उद्गतः—इलामिलनोद्गतः, (तृ.त.पु.)

अलकेषु मलः—अलकमलः, ( स. त. पु. ) इलामिलनोद्गतः अलकमलः यस्याः सा—इलामिलनोदलकमला । ( प्रादि. ब. व्री. )

हिमधामभया—हिमं धाम यस्य सः—हिमधामा, ( स. ब. व्री. ) हिमधाम्नः भा—हिमधामभा, तया—हिमधामभया । ( ष. त. पु. )

समरुक्—समा रुक् यस्याः सा—समरुक् । ( स. ब. व्री. )

**त्वमवनताञ्जिनोत्तमकृतान्त ! भवाद्विदुषो-**
**ऽव सदनुमानसङ्गमन ! यातमोदयितः ।**
**शिवसुखसाधकं स्वभिदधत्सुधियां चरणं,**
**वसदनुमानसं गमनयातत ! मोदयितः ! ॥३॥७१॥**

अन्वय—सदनुमानसङ्गमन ! गमनयातत ! मोदयितः ! जिनोत्तमकृतान्त ! यातमोदयितः, सुधियाम् अनुमानसं वसत्, शिवसुखसाधकं चरणं स्वभिदधत्, त्वम् अवनतान् विदुषः भवात् अव ।

અર્થ—વિદ્યમાન અથવા ઉત્તમ અનુમાનની સંગતિવાળા, સરખાપાઠો અને નયોવડે વિસ્તીર્ણ, આનંદ કરાવનાર એવા હે તીર્થંકરદેવનાં સિદ્ધાંત ! ગયો છે (અજ્ઞાનરૂપી) અંધકાર જેનો એવા (મુનિઓ)ને ઇષ્ટ, બુદ્ધિશાળીઓના મનને અનુલક્ષીને રહેતો, તેમજ મોક્ષસુખને સાધનાર એવા ચારિત્રને સારી રીતે કહેતો એવો તું પ્રણામ કરેલાં વિદ્વાનોનું સંસારથી રક્ષણ કર......

समास—

जिनोत्तमकृतान्त !—जिनानाम् उत्तमाः—जिनोत्तमाः, ( ष. त. पु. ) जिनोत्तमानां कृतान्तः—जिनोत्तमकृतान्तः, तत्संबोधनम्—जिनोत्तमकृतान्त ! ( ष. त. पु. )

**सदनुमानसङ्क्रमन !**—अनुमानस्य सङ्क्रमनम् – अनुमानसङ्क्रमनम्, 'कृतिः' ३।१।७७ (ष. त. पु.) सद् अनुमानसङ्क्रमनं यस्मिन् सः– सदनुमानसङ्क्रमनः,...तत्संबोधनम्–सदनुमानसङ्क्रमन ! (स. ब. व्री.)।

**याततमोदयितः !**—यातं तमः येषां ते–याततमसः, (स.ब.व्री.) याततमसां दयितः–याततमोदयितः। 'कृतिः' ३।१।७७ (ष.त.पु.)

**शिवसुखसाधकम्**—शिवस्य सुखम्–शिवसुखम्, शिवसुखं साधयति–शिवसुखसाधकम्, तद्–शिवसुखसाधकम्। (उप. त. पु.) 'णकतृचौ' ५।१।४८...णक।

**अनुमानसम्**—मानसम् अनु–इति अनुमानसम्। 'समीपे' ३।१।३५.... (अव्ययीभाव समास.)

**गमनयातत !**—गमाश्च नयाश्च–गमनयाः, (इ. द्व.) गमनयैः आततः–गमनयाततः, तत्संबोधनम्–गमनयातत ! (तृ. त. पु.)

**सुधियाम्**—शोभना धीः येषां ते–सुधियः,....तेषाम् सुधियाम्। (अ. ब. व्री.)

**अधिगतगोधिका कनकरुक् तव गौर्युचिता–**
**ङ्कमलकराजि तामरसभास्यतुलोपकृतम्।**
**मृगमदपत्रभङ्गतिलकैर्वदनं दधती,**
**कमलकरा जितामरसभाऽस्यतु लोपकृतम् ॥४॥८०॥**

अन्वय—अधिगतगोधिका, कनकरुक्, मृगमदपत्रभङ्गतिलकैः उचिताङ्कम् अलकराजि, तामरसभासि अतुलोपकृतं वदनं दधती, कमलकरा, जितामरसभा, गौरी तव लोपकृतम् अस्यतु।

**અર્થ**—પ્રાપ્ત કરાઇ છે ઘો જેના વડે એવી, સુવર્ણ જેવી કાન્તિવાળી, કસ્તુરીના પત્રની રચનાવડે ઉપલક્ષિત એવા તિલકવડે ઉચિત છે ચિહ્ન જેનું એવા, વાળવડે શોભવાના સ્વભાવવાળા, કમલના જેવી કાન્તિવાળા, અસાધારણ છે ઉપકાર જેનો એવા, મુખને ધારણ કરતી...કમલ છે હાથમાં જેને એવી, ( અથવા-કમલ જેવા હાથવાળી ) જીતાઇ છે દેવોની સભા જેના વડે એવી, ગૌરી-દેવી...મ્હારા વિનાશ કરનારાનો નાશ કરો......

**समास–**

**अधिगतगोधिका**—अधिगता गोधा यया सा—अधिगतगोधिका। 'शेषाद्वा' ७।३।१७५ कच्...। ( समा. ब. व्री. )

**कनकरुक्**—कनकवत् रुक्,यस्याः सा—कनकरुक्। (उप. ब.व्री.)

**उचिताङ्कम्**—उचिता अङ्का ( उचितानि अङ्कानि ) यस्मिन् तद्—उचिताङ्कम्, तद्—उचिताङ्कम्। ( स. ब. व्री. )

**अलकराजि**—अलकैः राजते इत्येवंशीलम्—अलकराजि, तद्—अलकराजि 'अजातेः शीले' ५।१।१५४ णिन्। ( उप. त. पु. )

**तामरसभासि**—तामरसवत् भासते इत्येवंशीलम्-तामरसभासि, तद्—तामरसभासि 'अजातेःशीले' ५।१।१५४...णिन्। ( उप. त. पु.)

**अतुलोपकृतम्**—अतुलम् उपकृतम् यस्य तत्—अतुलोपकृतम्, तद्—अतुलोपकृतम्। ( स. ब. व्री. )

**मृगमदपत्रभङ्गतिलकैः**—पत्राणां भङ्गाः—पत्रभङ्गाः, (ष. त. पु.) मृगमदस्य पत्रभङ्गाः-मृगमदपत्रभङ्गाः, (ष. त. पु. ) मृगमदपत्रभङ्गैः उपलक्षिताः—मृगमदपत्रभङ्गोपलक्षिताः, (तृ. त. पु. ) मृगमदपत्रभङ्गोपलक्षिताश्चामी तिलकाश्च मृगमदपत्रभङ्गतिलकाः,—तैः—मृगमदपत्रभङ्गतिलकैः। ( म. प. लो. क. )

**कमलकरा**—कमलं करे यस्याः सा–कमलकरा। (व्य. ब. व्री.)

**अथवा**—कमलवत् करौ यस्याः सा–कमलकरा। (उप. ब. व्री.)

**जितामरसभा**—अमराणां सभा–अमरसभा, (ष. त. पु.) जिता अमरसभा यया सा–जितामरसभा। (स. ब. व्री.)

**लोपकृतम्**—लोपं करोतीति–लोपकृत्, तम्–लोपकृतम्। 'क्विप्' ५।१।१४८।....क्विप्।

## ॥ श्रीनमिजिनस्तुतिः ॥

(शिखरिणीवृत्तम्)

**स्फुरद्विद्युत्कान्ते! प्रविकिर वितन्वन्ति सततं,**
**ममायासं चारो! दितमद! नमेऽघानि लपितः!।**
**नमद्भव्यश्रेणी–भवभयभिदां हृद्यवचसा–**
**ममायासञ्चारो–दितमदनमेघानिल! पितः ॥१॥८१॥**

अन्वय—स्फुरद्विद्युत्कान्ते! चारो! दितमद! नमद्भव्यश्रेणीभवभयभिदां हृद्यवचसाम् लपितः! अमायासञ्चार! उदितमदनमेघानिल! पितः! नमे! मम आयासं वितन्वन्ति अघानि सततं प्रविकिर।

**અર્થ**—સ્ફુરાયમાન વીજળી જેવી કાન્તિવાળા, મનોહર, ખંડિત કર્યો છે મદ જેના વડે એવા, નમતી એવી ભવ્યજીવોની પંક્તિનાં સંસારનાં ભયનો નાશ કરનાર એવાં મનોહર વચનોને બોલનાર, નથી વિદ્યમાન માયાનો સંચાર જેમનામાં એવા, ઉદય પામેલા કામદેવરૂપી મેઘનો નાશ કરવામાં પવન સરખા, પિતા એવા હે નમિનાથ ભગવાન! મારા ખેદનો વિસ્તાર કરનારાં એવાં પાપોને હંમેશાં દૂર કરો......

**समास—**

**स्फुरद्विद्युत्कान्ते !**—स्फुरन्ती चासौ विद्युच्च—स्फुरद्विद्युत्, ( वि. पू. क. ) स्फुरद्विद्युद्वत् कान्तिः यस्य सः—स्फुरद्विद्युत्कान्तिः, तत्संबोधनम्—स्फुरद्विद्युत्कान्ते ! ( उपमान. ब. व्री. )

**दितमद !**—दितः मदः येन सः—दितमदः, तत्संबोधनम्—दितमद ! ( स. ब. व्री. )

**नमद्भव्यश्रेणीभवभयभिदाम्**—भव्यानां श्रेणी—भव्यश्रेणी, ( ष. त. पु. ) नमन्ती भव्यश्रेणी—नमद्भव्यश्रेणी, ( वि. पू. क. ) भवाद् भयम्—भवभयम्, ( पं. त. पु. ) नमद्भव्यश्रेण्याः भवभयम्—नमद्भव्यश्रेणीभवभयम्, ( ष. त. पु. ) नमद्भव्यश्रेणीभवभयम् भिन्दन्ति इति—नमद्भव्यश्रेणीभवभयभिन्दि, तेषाम्—नमद्भव्यश्रेणीभवभयभिदाम् । 'क्विप्' ५।१।१४८... क्विप् ( उप. त. पु. )

**हृद्यवचसाम्**—हृद्यानि च तानि वचांसि च—हृद्यवचांसि, तेषाम्—हृद्यवचसाम् । ( वि. पू. क. )

**अमायासञ्चार !**—मायायाः सञ्चारः—मायासञ्चारः, (ष. त. पु.) न विद्यते मायासञ्चारः यस्मिन् सः—अमायासञ्चारः, तत्संबोधनम्—अमायासञ्चार ! । ( न. ब. व्री. )

**उदितमदनमेघानिल !**—मदन एव मेघः—मदनमेघः, ( अ. पू. क. ) उदितः मदनमेघः—उदितमदनमेघः, ( वि. पू. क. ) उदितमदनमेघं विनाशयति इत्येवंशील उदितमदनमेघविनाशी, (उप.त.पु.) उदितमदनमेघविनाशी चासौ अनिलश्च—उदितमदनमेघानिलः, तत्संबोधनम्—उदितमदनमेघानिल ! ( म. प. लो. क. )

**नखांशुश्रेणीभिः कपिशितनमन्नाकिमुकुटः,**
**सदा नोदी नानामयमलमदारेरिततमः ।**
**प्रचक्रे विश्वं यः स जयति जिनाधीशनिवहः,**
**सदानो दीनानामयमलमदारेरिततमः ॥ २ ॥८२ ॥**

अन्वय—यः विश्वम् इततमः प्रचक्रे सः नखांशुश्रेणीभिः कपिशितनमन्नाकिमुकुटः, नानामयमलमदारेः (सदा) नोदी, दीनानां सदानः, अदारेरिततमः, अयं जिनाधीशनिवहः सदा अलं जयति ।

**અર્થ**—જેણે ( જિનવરસમૂહે ) વિશ્વને નાશ પામ્યો છે ( અજ્ઞાનરૂપી ) અંધકાર જેનો એવું કર્યું, તે નખનાં કિરણોની પંક્તિઓવડે પીળા કરાયા છે નમન કરતા દેવોના મુકુટો જેનાવડે એવો, તથા અનેક પ્રકારના રોગો ( કર્મ ) મલ અને અહંકારરૂપી શત્રુઓને ( હંમેશા ) દૂર કરવાના સ્વભાવવાળો, દુઃખી મનુષ્યોને વિષે દાનવાળો, અતિશયપણે સ્રીઓવડે ચલાયમાન નહિ થએલો, એવો આ જિનેશ્વર ભગવંતનો સમૂહ નિરંતર અત્યંત જય પામે છે.

समास—

**नखांशुश्रेणीभिः**— नखानाम् अंशवः—नखांशवः, (ष. त. पु.) नखांशूनाम् श्रेण्यः—नखांशुश्रेण्यः, ताभिः—नखांशुश्रेणीभिः) । ष. त. पु. )

**कपिशितनमन्नाकिमुकुटः**—नमन्तः नाकिनः—नमन्नाकिनः, ( वि. पू. क. ) नमन्नाकिनां मुकुटाः—नमन्नाकिमुकुटाः, ( ष. त. पु. ) कपिशिताः नमन्नाकिमुकुटाः येन सः—कपिशितनमन्नाकिमुकुटः । (स.ब.व्री.)

**नानामयमलमदारेः**—आमयाश्च मलाश्च मदाश्च—आमयमलमदाः, ( इ. द्व. ) नाना च ते आमयमलमदाश्च—नानामयमलमदाः, (वि.पू.क.)

नानामयमलमदाः एव अरिः–नानामयमलमदारिः, तस्य–नानामयमल-मदारेः। (अ. पू. क.)

**इततमः**—इतं तमः यस्य यस्मात् वा तत्–इततमः, तद्–इततमः। (स. ब.व्री.)

**जिनाधीशनिवहः**—जिनानाम् अधीशाः–जिनाधीशाः, (ष.त.पु.)

**अथवा**–जिनेषु अधीशाः–जिनाधीशाः, (स. त. पु.) जिनाधीशानां निवहः–जिनाधीशनिवहः। (ष. त. पु.)

**सदानः**—दानेन सह वर्तते यः सः–सदानः। (सहार्थ. ब.व्री.)

**अदारेरिततम**—दारैः ईरितः–दारेरितः, (तृ. त. पु.) अतिशयेन दारेरितः–दारेरिततमः, 'प्रकृष्टे तमप्०' ७।३।५....तमप्, न दारेरिततमः–अदारेरिततमः। (न. त. पु.)

**जलव्यालव्याघ्र–ज्वलनगजरुग्बन्धनयुधः,**
**गुरुर्वाहोऽपाता–पदघनगरीयानसुमतः।**
**कृतान्तस्त्रासीष्ट, स्फुटविकटहेतुप्रमितिभा–**
**गुरुर्वोऽहो! पाता, पदघनगरीयानसुमतः॥३॥८३॥**

**अन्वय**—अहो! (भव्याः!) अपातापदघनगरीयानसुमतः. गुरुः. ग्राहः, स्फुटविकटहेतुप्रमितिभाक्, ऊरुः, पाता, पदघनगरीयान्, वा कृतान्तः, असुमतः जलव्यालव्याघ्रज्वलनगजरुग्-बन्धनयुधः त्रासीष्ट।....

**અર્થ**—હે (ભવ્યજીવો)! નથી વિદ્યમાન–ચ્યવન–આપત્તિને પાપ જેમાં એવી નગરીમાં પ્રયાણ કરવામાં સારી રીતે ઇચ્છાયેલ મહાન્ અશ્વ સમાન, સ્પષ્ટ વિકટ હેતુ અને પ્રમાણોને ભજનાર, વિશાળ, પાલન કરનાર, પદોને વિષે ગહન અને મહાન્ એવો સિદ્ધાંત પ્રાણીઓનું જલ, સર્પ, વાઘ, અગ્નિ, હાથી, રોગ, બંધન, અને યુદ્ધથી રક્ષણ કરો......

**समास**—

**जलव्यालव्याघ्रज्वलनगजरुग्बन्धनयुधः**—जलं च व्यालश्च व्याघ्रश्च ज्वलनश्च गजश्च रुक् च बन्धनं च युच्च एतेषां समाहारः—जलव्याल-व्याघ्रज्वलनगजरुग्बन्धनयुत्, तस्मात्—जलव्यालव्याघ्रज्वलनगजरुग्बन्धन-युधः। (स. द्व.)

**अपातापद्घनगरीयानसुमतः**—पातश्च आपच्च अघं च—पाता-पदघानि, (इ. द्व.) न विद्यन्ते पातापदघानि यस्याम्—सा—अपातापदघा, (न. ब. व्री.) अपातापदघाचासौ नगरी च—अपातापदघनगरी, (वि.पू.क.) अपातापदघनगर्या यानम्—अपातापदघनगरीयानम्, (ष. त. पु.) अपात-पदघनगरीयाने सुमतः—अपातपदघनगरीयानसुमतः। (स. त. पु.)

**स्फुटविकटहेतुप्रमितिभाक्**—हेतवश्च प्रमितयश्च—हेतुप्रमितयः, (इ. द्व.) विकटाश्च ताः हेतुप्रमितयश्च—विकटहेतुप्रमितयः, (वि.पू.क.) स्फुटाश्च ताः विकटहेतुप्रमितयश्च—स्फुटविकटहेतुप्रमितयः, (वि. पू. क.) स्फुटविकटहेतुप्रमितीः भजतीति—स्फुटविकटहेतुप्रमितिभाग्। 'भजोविण्०' ५।१।१४३....(उप. त. पु.)

**पदघनगरीयान्**—घनश्चासौ गरीयांश्च—घनगरीयान्, (वि.उभ.क.) पदेषु घनगरीयान्—पदघनगरीयान्। (स. त. पु.)

**असुमतः**—असवः सन्ति येषाम्—असुमन्तः, तान्—असुमतः। 'तदस्या०' ७।२।१....मतु।

**विपक्षव्यूहं वो–दलयतु गदाक्षावलिधरा,–**
**ऽसमा नालीकाली–विशदचलना नालिकवरम् ।**
**समध्यासीनाऽम्भो–भृतघननिभाऽम्भोधितनया–**
**समानाली काली, विशदचलनानालिकवरम् ॥४॥८४॥**

**अन्वय**—गदाक्षावलिधरा, असमा, नालीकालीविशदचलना, विशदचलनानालिकवरं नालिकवरं समध्यासीना, अम्भोभृतघननिभा, अम्भोधितनयासमानाली काली वः विपक्षव्यूहं दलयतु ।

**અર્થ**—ગદા તથા અક્ષમાલાને ધારણ કરનારી, અસાધારણ, કમલોની શ્રેણિ સમાન નિર્મલ છે ચરણ જેનાં, લીન થતા સ્થિર એવા અનેક ભ્રમરોથી યુક્ત એવા મુખ્ય કમલને વિષે બેઠેલી, પાણીથી પૂર્ણ મેઘ સરખી, લક્ષ્મીની અસાધારણ સખી, અથવા–લક્ષ્મી સમાન છે સખીઓ જેની એવી કાલીદેવી તમારા શત્રુસમૂહનો નાશ કરો......

**समास—**

**विपक्षव्यूहम्**—विपक्षाणां व्यूहः–विपक्षव्यूहः, तम्–विपक्षव्यूहम् । ( ष. त. पु. )

**गदाक्षावलिधरा**—अक्षाणाम् आवलिः–अक्षावलिः, (ष.त.पु.) गदा च अक्षावलिश्च–गदाक्षावली, ( इ. द्व. ) गदाक्षावली धरति इति–गदाक्षावलिधरा । 'आयुधादिभ्यो धृगोऽदण्डादेः' ५।१।९४,..अच् ( उप. त. पु. )

**असमा**—न समा–असमा । ( न. त. पु. )

**नालीकालीविशदचलना**—नालीकानाम् आली–नालीकाली, ( ष. त. पु. ) विशदौ चलनौ–विशदचलनौ, (वि. पू. क.) नालीकालीवत् विशदचलनौ यस्याः सा–नालीकालीविशदचलना ।

**नालिकवरम्**—नालिकेषु वरम्–नालिकवरम्, ( स. त. पु. ) नालिकं च तद् वरम् च–नालिकवरम्, तद्–नालिकवरम् । (वि. पू. क.)

**अम्भोभृतघननिभा**—अम्भोभिः भृतः –अम्भोभृतः, ( तृ. त. पु. ) अम्भोभृतश्चासौ घनश्च–अम्भोभृतघनः, ( वि. पू. क. ) अम्भोभृत-घनेन निभा–अम्भोभृतघननिभा । 'ऊनार्थपूर्वाद्यैः' ३।१।६७ ( तृ. त. पु. )

**अम्भोधितनयासमानाली**—अम्भांसि धीयन्ते अस्मिन्निति – अम्भोधिः, 'व्याप्यादाधारे' ५।३।८८....कि, ( उप. त. पु. ) । अम्भोधेः तनया–अम्भोधितनया, ( ष. त. पु. ) अम्भोधितनयया समानाः–अम्भो-धितनयासमानाः, 'ऊनार्थपूर्वाद्यैः' ३।१।६७ ( तृ. त. पु.), अम्भोधि-तनयासमानाः आलयः यस्याः सा–अम्भोधितनयासमानाली । (स. ब.व्री.)

**विशदचलनानालिकवरम्**—नाना च ते अलयश्च – नानालयः, ( वि. पू. क. ) न चलाः–अचलाः, ( न. त. पु.) अचलाश्च ते नानालयश्च –अचलनानालयः, ( वि. पू. क.) विशन्तश्चामी अचलनानालयश्च–विशद-चलनानालयः, ( वि. पू. क. ) विशदचलनानालिभिः ( कृतम् ) कबरम्–विशदचलनानालिकबरम्, तद् – विशदचलनानालिकबरम् । 'तृतीया' ३।१।६५ ( तृ. त. पु. )

## श्रीनेमिजिनस्तुतिः

( शार्दूलविक्रीडितम् )

**चिक्षेपोर्जितराजकं रणमुखे योऽलक्ष्य(क्ष)संख्यं क्षणा-,**
**दक्षामं जन ! भासमानमहसं राजीमतीतापदम् ।**
**तं नेमिं नम नम्रनिर्वृतिकरं चक्रे यदूनां च यो,**
**दक्षामञ्जनभासमानमहसं राजीमतीतापदम् ॥१॥८५॥**

अन्वय—यः अक्षामम्, अलक्ष्यसंख्यम्, (लक्षसंख्यम्) ऊर्जितराजकं रणमुखे क्षणात् चिक्षेप, यः च यदूनां दक्षां राजीम् अतीतापदं चक्रे तं भासमानम्, अहसं, (जनभासमानमहसम्) राजीमतीतापदं, नम्रनिर्वृतिकरम्, अञ्जनभासमानमहसं नेमिं, जन! नम।

અર્થ—જેણે સમર્થ એવા અગણિત સંખ્યાવાળા પરાક્રમી એવા રાજાનાં સમૂહને સંગ્રામની શરૂઆતમાં ક્ષણમાત્રમાં પરાસ્ત કર્યાં અને જેણે યાદવોની ચતુર શ્રેણિને ચાલી ગઈ છે આપત્તિ જેની એવી કરી, તે શોભતા, હાસ્યરહિત, (માણુસોને વિષે શોભતા તેજવાળા) રાજીમતીને સંતાપ આપનાર, નમન કરવાના સ્વભાવ-વાળાને મોક્ષસુખને કરનાર, અંજનની કાંતિ સરખા તેજવાળા એવા નેમિનાથ ભગવાનને હે માણુસ! તું નમસ્કાર કર...

समास—

ऊर्जितराजकम्—राज्ञां समूहः—राजकम्, 'गोत्रोक्ष—वत्सोष्ट्र—वृद्ध०' ६।२।१२.... अकञ्, ऊर्जितं च तद् राजकं च—ऊर्जित-राजकम्, तद्—ऊर्जितराजकम्। (वि. पू. क.)

रणमुखे—रणस्य मुखम्—रणमुखम्, तस्मिन्—रणमुखे। (ष.त.पु.)

अलक्ष्यसंख्यम्—अलक्ष्या संख्या यस्य तत्—अलक्ष्यसंख्यम्, तत्—अलक्ष्यसंख्यम्। (स. ब. व्री.)

अक्षामम्—न क्षामम्—अक्षामम्, तद्—अक्षामम्। (न. त. पु.)

अहसम्—न विद्यते हसः यस्य सः—अहसः, तम्—अहसम्। (न. ब. व्री.)

जनभासमानमहसम्—जनेषु भासमानम्—जनभासमानम्, (स. त. पु.) जनभासमानम् महः यस्य सः—जनभासमानमहाः, तम्—जन-भासमानमहसम्। (स. ब. व्री.)

**अतीतापदम्**—अतीता आपदः यस्याः सा—अतीतापद्, ताम्—अतीतापदम् । ( स. ब. व्री. )

**नम्रनिर्वृतिकरम्**–निर्वृतिं करोतीति निर्वृतिकरः, 'हेतुतच्छीलाऽनुकूले' ५।१।१०३....ट, (उप. त. पु.) नमन्ति इत्येवं शीलाः—नम्राः, 'स्म्य-जस-हिंस०' ५।२।७९...र, नम्राणां निर्वृतिकरः—नम्रनिर्वृतिकरः, तम्—नम्रनिर्वृतिकरम् । 'कृति' ३।१।७७....( ष. त. पु. )

**अञ्जनभासमानमहसम्**—अञ्जनस्य भा—अञ्जनभा, ( ष.त. पु. ) अञ्जनभया समानम्—अञ्जनभासमानम्, 'ऊनार्थपूर्वाद्यैः' ३।१।६७... ( तृ. त. पु. ) अञ्जनभासमानं महः यस्य सः—अञ्जनभासमानमहाः, तम्—अञ्जनभासमानमहसम् । ( स. ब. व्री. )

**राजीमतीतापदम्**—तापं ददातीति—तापदः, 'आतोडोऽह्वा०' ५।१।७६....ड, ( उप. त. पु. ) राजीमत्याः तापदः—राजीमतीतापदः, तम्—राजीमतीतापदम् । 'कृति' ३।१।७७ ( ष. त. पु. )

**प्राव्राजीज्जितराजका रज इव ज्यायोऽपि राज्यं जवाद्,**
**या संसारमहोदधावपि हिता शास्त्री विहायोदितम् ।**
**यस्याः सर्वत एव सा हरतु नो राजी जिनानां भवा,–**
**यासं सारमहो दधात्र पिहिताशास्त्रीविहायोऽदितम्**
**॥ २ ॥ ८६ ॥**

अन्वय—जितराजका, संसारमहोदधौ अपि हिता, शास्त्री, या उदितं ज्यायः अपि राज्यं रज इव जवात् विहाय प्राव्राजीत् यस्याः पिहिताशास्त्रीविहायः अदितं सारमहः सर्वत एव (जवात्) दधाव सा जिनानां राजी नः भवायासं हरतु ।

અર્થ—જીતાયો છે રાજાનો સમૂહ જેના વડે એવી, તથા સંસારરૂપી મોટા સમુદ્રને વિષે પણ હિતકારી, શિક્ષા આપનારી, એવી જેણે ( જિનેશ્વરોની પંક્તિએ ) પ્રાપ્ત થયેલા મોટા પણ રાજ્યને રજની જેમ જલ્દીથી ત્યાગીને દીક્ષાને ગ્રહણ કરી હતી, ( અને ) જેનું આચ્છાદિત કરાયા છે દિશારૂપી સ્ત્રીઓ અને આકાશ જેના વડે એવું. અખંડિત શ્રેષ્ઠ તેજ ચારે તરફ ( જલ્દીથી ) પ્રસરતું હતું તે જિનેશ્વર ભગવંતોની શ્રેણિ અમારા સંસારનાં ખેદ ( વિષાદ ) ને દૂર કરો...

समास—

**जितराजका**—राज्ञां समूहः – राजकम्, 'गोत्रोक्ष–वत्सोष्ट्र०' ६।२।१२ अकञ्, जितं राजकं यया सा–जितराजका। (स. ब. व्री.)

**ज्यायः**—अतिशयेन वृद्धम्–ज्यायः, तत्–ज्यायः। 'गुणाङ्गाद् वेष्ठेयसू' ७।३।९.... ईयसू, 'वृद्धस्य०' ७।४।३५ '.... ज्य, 'ज्यायान्' ७।४।३६....ज्या....

**संसारमहोदधौ**—संसरन्ति जीवा अस्मिन्–संसारः, 'भावाऽकर्त्रोः' ५।३।१८....घञ्, उदकानि धीयन्ते अस्मिन्–उदधिः, 'व्याप्यादाधारे' ५।३।८८.... कि, महांश्चासौ उदधिश्च–महोदधिः, 'सन्महत्' ३।१।१०७ (वि. पू. क.) संसारः एव महोदधिः–संसारमहोदधिः, तस्मिन्–संसारमहोदधौ। (अव. पू. क.)

**भवायासम्**—भवस्य आयासः–भवायासः, तम्–भवायासम्। (ष. त. पु.)

**सारमहः**—सारं च तद् महश्च–सारमहः। (वि. पू. क.)

**पिहिताशास्त्रीविहायः**—आशा एव स्त्रियः – आशास्त्रियः, (अव. पू. क.) आशास्त्रियश्च विहायश्च–आशास्त्रीविहायांसि, (इ. द्व.) पिहितानि आशास्त्रीविहायांसि येन तत्–पिहिताशास्त्रीविहायः। (स.ब.व्री.)

**अदितम्**—न दितम्–अदितम्। (न. त. पु.)

कुर्वाणाऽणुपदार्थदर्शनवशाद् भास्वत्प्रभायास्त्रपा,-
मानत्या जनकृत्तमोहरत ! मे शस्ताऽदरिद्रोहिका ।
अक्षोभ्या तव भारती जिनपते ! प्रोन्मादिनां वादिनां,
मानत्याजनकृत् तमोहरतमेश ! स्तादरिद्रोहिका
॥ ३ ॥ ८७ ॥

अन्वय—आनत्या जनकृत्तमोहरत ! ईश ! हे जिनपते ! अणुपदार्थदर्शनवशात् भास्वत्प्रभायाः त्रपां कुर्वाणा, शस्ता, अदरिद्रोहिका, प्रोन्मादिनां वादिनां अक्षोभ्या, मानत्याजनकृत्, तमोहरतमा तव भारती मे अरिद्रोहिका स्तात् ।

અર્થ—પ્રણામથી માણુસોનો છેદાયો છે મોહ અને કામ જેના વડે એવા, તથા સ્વામિ એવા હે જિનપતિ ! સૂક્ષ્મ પદાર્થનાં દર્શનનાં વશથી સૂર્યની કાન્તિને લજ્જા કરાવનારી, વખાણુવા યોગ્ય, ઉત્તમ તર્કો છે જેના એવી, ઉન્માદી વાદીઓથી ક્ષોભ નહિ પામવા યોગ્ય, અને (તેમના) અહંકારનો ત્યાગ કરાવનારી, અતિશય રીતે (અજ્ઞાનરૂપી) અંધકારનો નાશ કરનારી તારી વાણી મારા (અભ્યંતર) શત્રુઓનો દ્રોહ કરનારી થાઓ...

समास—

अणुपदार्थदर्शनवशाद्—अणवः पदार्थाः — अणुपदार्थाः, (वि. पू. क.) अणुपदार्थानां दर्शनम्—अणुपदार्थदर्शनम्, 'कृति' ३।१।७७ (ष. त. पु.) अणुपदार्थदर्शनस्य वशः—अणुपदार्थदर्शनवशः, तस्मात्—अणुपदार्थदर्शनवशात् । (ष. त. पु.)

भास्वत्प्रभायाः —भास्वतः प्रभा—भास्वत्प्रभा, तस्याः—भास्वत्प्रभायाः । (ष. त. पु.)

**जनकृत्तमोहरत !**—मोहश्च रतं च—मोहरते, ( इ. द्व. ) कृत्ते-मोहरते येन सः—कृत्तमोहरतः, ( स. ब. व्री. ) जनानां कृत्तमोहरतः—जनकृत्तमोहरतः, तत्संबोधनम्—जनकृत्तमोहरत ! ( ष. त. पु. )

**अदरिद्रोहिका**—न दरिद्रा—अदरिद्रा, ( न. त. पु. ) अदरिद्रा ऊहा यस्यां सा—अदरिद्रोहिका । ( स. ब. व्री. )

**अक्षोभ्या**—न क्षोभ्या—अक्षोभ्या । ( न. त. पु. )

**जिनपते !**—जिनानां पतिः—जिनपतिः, तत्संबोधनम्—जिनपते ! ( ष. त. पु. )

**प्रोन्मादिनाम्**—प्रकर्षेण उन्माद्यन्ते इत्येवंशीलाः—प्रोन्मादिनः, 'शमष्टकाद् घिनण्' ५।२।४९...घिनण्, ( इन् ) प्रकृष्टः उन्मादः येषां ते—प्रोन्मादिनः, तेषाम्—प्रोन्मादिनाम् । 'अतोऽनेक०' ७।२।६...इन् ।

**मानत्याजनकृत्**—मानस्य त्याजनम्—मानत्याजनम्, 'कृति०' ३।१।७७....( ष. त. पु. ), मानत्याजनं करोतीति—मानत्याजनकृत् । 'क्विप्' ५।१।१४८...क्विप्, ( उप. त. पु. )

**तमोहरतमा**—तमांसि हरतीति—तमोहरा, 'हगो वयोऽनुद्यमे०' ५।१।९५...अच्, ( उप. त. पु. ) अतिशयेन तमोहरा—तमोहरतमा । 'प्रकृष्टे तमप्०' ७।३।५....तमप् ।

**अरिद्रोहिका**—अरिभ्यो द्रुह्यते—अरिद्रोहिका । ( उप. त. पु. ) 'णकतृचौ०' ५।१।४८....णक, आप्...

**हस्तालम्बितचूतलुम्बिलतिका यस्या जनोऽभ्यागमद्,**
**विश्वासेवितताम्रपादपरतां वाचा रिपुत्रासकृत् ।**
**सा भूतिं वितनोतु नोऽर्जुनरुचिः सिंहेऽधिरूढोल्लसद्-**
**विश्वासे वितताम्रपादपरताम्बा चारिपुत्राऽसकृत्**
**॥ ४ ॥ ८८ ॥**

अन्वय—जनः यस्याः विश्वासेवितताम्रपादपरताम् अभ्यागमत् सा हस्तालम्बितचूतलुम्बिलतिका, वाचा रिपुत्रासकृत्, अर्जुनरुचिः, उल्लसद्विश्वासे सिंहे अधिरूढा, वितताम्रपादपरता, चारिपुत्रा, अम्बा नः भूतिम् असकृत् वितनोतु ।

અર્થ—લોકોએ જેણી ( અંબાદેવી )નાં જગતવડે સેવાયેલા લાલ ચરણની શરણતાને સ્વીકારી હતી તે હાથમાં ગ્રહણ કરાઈ છે આંબાનાં વૃક્ષની લુંબવાળી વેલડી એવી, વાણીવડે શત્રુઓને ત્રાસ કરનારી, સુવર્ણ જેવી કાન્તિવાળી, ઉલ્લાસ પામતા વિશ્વાસવાળા સિંહ ઉપર બેઠેલી, વિસ્તાર પામેલા આમ્રવૃક્ષને વિષે આસક્ત, ચાલવાના સ્વભાવવાળા પુત્રોવાળી, અંબાદેવી અમારી સંપત્તિનો નિરંતર વિસ્તાર કરો.

समास—

**हस्तालम्बितचूतलुम्बिलतिका**—हस्ते आलम्बिता—हस्तालम्बिता, 'क्तेन' ३।१।९२....( स. त. पु. ) लुम्बो अस्ति यस्याः—लुम्बिनी, 'अतोऽनेक०' ७।२।६.... इन्,....ङी, लुम्बिनी लता—लुम्बिलता, ( वि. पू. क. ) 'पुंवत्कर्मधारये०' ३।२।५७...पुंवद्भावः, चूतस्य लुम्बिलता—चूतलुम्बिलता, ( ष. त. पु. ) हस्तालम्बिता चूतलुम्बिलता यस्याः सा—हस्तालम्बितचूतलुम्बिलतिका। 'शेषाद्वा०' ७।३।१७५....कच्,

**विश्वासेवितताम्रपादपरताम्**—विश्वेन आसेवितौ—विश्वासेवितौ, ( तृ. त. पु. ) ताम्रौ च तौ पादौ च—ताम्रपादौ, ( वि. पू. क. ) विश्वासेवितौ ताम्रपादौ – विश्वासेवितताम्रपादौ, ( वि. पू. क. ) परस्य भावः—परता, 'भावेत्वतल्०' ७।१।५५....तल्, विश्वासेवितताम्रपादयोः परता- विश्वासेवितताम्रपादपरता, ताम् – विश्वासेवितताम्रपादपरताम् । ( ष. त. पु. )

**रिपुत्रासकृत्**—त्रासं करोतीति–त्रासकृत्, 'क्विप्' ५।१।१४८ ...क्विप्, ( उप. त. पु. ) रिपूणां त्रासकृत्–रिपुत्रासकृत्। 'कृति०' ३।१।७७...( ष. त. पु. )

**अर्जुनरुचिः**—अर्जुनवत् रुचिः यस्याः सा–अर्जुनरुचिः। ( उप. ब. व्री. )

**उल्लसद्विश्वासे**—उल्लसन् विश्वासः यस्य सः–उल्लसद्विश्वासः, तस्मिन्–उल्लसद्विश्वासे। ( स. ब. व्री. )

**विततात्रपादपरता**—पादैः पिबतीति–पादपः, 'स्थापास्ना०' ५।१।१४२....क, ( उप. त. पु. ) आम्रश्चासौ पादपश्च–आम्रपादपः, ( वि. पू. क. ) विततश्चासौ आम्रपादपश्च–विततात्रपादपः, ( वि.पू.क. ) विततात्रपादपे रता–विततात्रपादपरता। 'क्तेन' ३।१।९२....(स.त.पु.)
**चारिपुत्रा**—चरत इत्येवंशीलौ–चारिणौ, 'ग्रहादिभ्यो णिन्' ५।१।५३ ....णिन्, चारिणौ पुत्रौ यस्याः सा–चारिपुत्रा। ( स. ब. व्री. )

**असकृत्**—न सकृत्–असकृत्, तत्–असकृत्। ( न. त. पु. )

## श्रीपार्श्वजिनस्तुतिः

( स्रग्धरावृत्तम् )

**मालामालानबाहुर्दधददधदरं यामुदारा मुदारा,**
**लीनाऽलीनामिहाली मधुरमधुरसां सूचितोमाचितो मा।**
**पातात्पातात्स पार्श्वो रुचिररुचिरदो देवराजीवराजी–**
**पत्राऽऽपत्रा यदीया तनुरतनुरवो नन्दको नोदको नो**
**॥ १ ॥ ८९ ॥**

अन्वय—इह यदीया तनुः देवराजीवराजीपत्त्रा, आपत्त्रा (अस्ति) मधुरमधुरसां याम् (मालाम्) उदारा मुदा आरात् लीना अलीनाम् आली अरम् अदधत् (तां) मालां दधत्, आलानबाहुः, सूचितोमाचितः, रुचिररुचिरदः, अतनुरवः, नन्दकः, नो नोदकः, सः पार्श्वः पातात् मा पातात् ।

અર્થ—આ લોકને વિષે જે (પાર્શ્વનાથ)ની કાયા-દેવોવડે રચાયેલા કમલોની શ્રેણિ છે વાહન જેનું એવી, અને આપત્તિથી રક્ષણ કરનારી છે, વળી મધુર પુષ્પરસવાળી જે (માલા)ને વિષે મોટી, હર્ષથી નજીકમાં જ આસક્ત થયેલી ભ્રમરાઓની શ્રેણિ જલ્દીથી પાન કરતી હતી તે માલાને ધારણ કરતા એવા, હાથી બાંધવાના સ્તંભ સરખાં હાથવાળા, સુયોગ્ય કીર્તિવડે વ્યાપ્ત, મનોહર કાંતિવાળા દાંતો છે જેમને એવા, મોટા અવાજવાળા, આનંદ આપનારા, ક્લેશને નહિ કરનાર એવા તે પાર્શ્વનાથ ભગવાન (દુર્ગતિનાં) પતનથી મારૂં રક્ષણ કરો....

समास—

**आलानबाहुः**—आलानवत् बाहू यस्य सः—आलानबाहुः । (उप. ब. व्री.)

**मधुरमधुरसाम्**—मधोः रसः—मधुरसः, (ष. त. पु.) मधुरः मधुरसः यस्यां सा—मधुरमधुरसा, ताम्—मधुरमधुरसाम् । (स. ब. व्री.)

**सूचितोमाचितः**—शोभना उचिता—सूचिता, (सु. पू. त.पु.) सूचिता चासौ उमा च—सूचितोमा, (वि. पू. क.) सूचितोमया आचितः सूचितोमाचितः । (तृ. त. पु.)

**रुचिररुचिरदः**—रुचिरा रुचिः येषां ते—रुचिररुचयः, (स. ब. व्री.) रुचिररुचयः रदाः यस्य सः—रुचिररुचिरदः । (स. ब. व्री.)

**देवराजीवराजीपत्त्रा**—देवैः निर्मितानि –देवनिर्मितानि, ( तृ. त. पु. ) देवनिर्मितानि राजीवानि–देवराजीवानि, ( म. प. लो. क.) देवराजीवानां राजी–देवराजीवराजी, ( ष. त. पु. ) देवराजीवराजी पत्त्रं यस्याः सा–देवराजीवराजीपत्त्रा । ( स. ब. व्री. )

**आपत्त्रा**—आपदः त्रायते इति–आपत्त्रा । 'स्थापास्ना०' ५।१।१४२...क ।

**अतनुरवः**—न तनुः–अतनुः, ( न. त. पु. ) अतनुः रवः यस्य सः–अतनुरवः । ( स. ब. व्री. )

**यदीया**—यस्य इयं–यदीया । 'तस्येदम्' ६।३।१६० नां सूचनथी 'दोरीयः' ६।३।३२....ईय ।

**राजी राजीववक्त्रा तरलतरलसत्केतुरङ्गत्तुरङ्ग–**
**व्यालव्यालग्नयोधाचितरचितरणे भीतिहृद् यातिहृद्या।**
**सारा साराज्जिनानामलममलमतेर्बोधिका माऽधिकामा–**
**दव्यादव्याधिकालाननजननजरात्रासमानाऽसमाना**
**॥ २ ॥ ९० ॥**

**अन्वय**— या–राजीववक्त्रा तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितरचितरणे भीतिहृद्, अतिहृद्या, सारा, अमलमतेः अलं बोधिका, अव्याधिकालाननजननजरात्रासमाना, असमाना, (अस्ति) सा जिनानां राजी(आ)अधिकामात् मा आरात् अव्यात् ।

**અર્થ**—જે ( જિનેશ્વર ભગવંતની શ્રેણિ ) કમલ જેવા મુખવાળી, અતિ ચંચળ તથા શોભાયમાન ધજાઓવડે અને નાચતા ઘોડાઓ અને દુષ્ટ હાથીઓ ઉપર આરૂઢ થયેલા યોદ્ધાઓવડે વ્યાપ્ત અને કરાયેલા સંગ્રામને વિષે ભયને હરનારી, અતિશય મનોહર,

શ્રેષ્ઠ, નિર્મલ બુદ્ધિવાળાને અતિશય બોધ આપનારી, રોગ, મરણ, જન્મ, જરા, ત્રાસ અને માનથી રહિત, અનુપમ છે. તે જિનેશ્વર ભગવંતની શ્રેણિ ઘણા રોગથી ( મનની પીડા અને શ્રમથી ) મારું જલ્દીથી રક્ષણ કરો...

**समास—**

**राजीववक्त्रा**—राजीववत् वक्त्रं यस्याः सा — राजीववक्त्रा । ( उप. ब. व्री. )

**तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितरचितरणे —** लसन्तश्चामी केतवश्च—लसत्केतवः, ( वि. पू. क. ) अतिशयेन तरलाः तरलतराः, 'द्वयोर्विभज्ये०' ७।३।६... तरप्, तरलतराः लसत्केतवः—तरलतरलसत्केतवः, ( वि. पू. क. ) रङ्गन्तश्च ते तुरङ्गाश्च—रङ्गत्तुरङ्गाः, ( वि. पू. क. ) रङ्गत्तुरङ्गाश्च व्यालाश्च—रङ्गत्तुरङ्गव्यालाः, ( इ. द्व. ) रङ्गत्तुरङ्गव्यालेषु व्यालग्नाः—रङ्गत्तुरङ्गव्यालव्यालग्नाः, 'क्तेन' ३।१।९२.... ( स. त. पु. ) रङ्गत्तुरङ्गव्यालव्यालग्नाश्च ते योधाश्च—रङ्गत्तुरङ्गव्यालव्यालग्नयोधाः, ( वि. पू. क. ) तरलतरलसत्केतवश्च रङ्गत्तुरङ्गव्यालव्यालग्नयोधाश्च—तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाः, ( इ. द्व. ) आदौ आचितः पश्चात् रचितः—आचितरचितः, 'पूर्वकालैक०' ३।१।९७( वि. उभ. प. क. ) तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधैः आचितरचितः —तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितरचितः, (तृ. त. पु.) तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितरचितः रणः—तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितरचितरणः, तस्मिन्—तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितरचितरणे । ( वि. पू. क. )

**भीतिहृद्**—भीयते इति भीतिः, 'स्त्रियां क्तिः' ५।३।९१... क्ति, भीतिं हरतीति—भीतिहृद् । 'क्विप्' ५।१।१४८....क्विप्, (उप.त.पु.)

**अतिहृद्या**—हृदि प्रिया हृद्या, 'हृद्य-पद्य-तुल्य-मूल्य' ७।१।११ ....निपातन, अतिशयेन हृद्या—अतिहृद्या । अतिरतिक्रमे च ३।१।४४ ( प्रादि. त. पु. )

**अमलमतेः**—न मला—अमला, (न.त.पु.) अमला मतिः यस्य सः—अमलमतिः, तस्य—अमलमतेः । ( स. ब. व्री. )

**अधिकामात्**—अधिकश्चासौ आमश्च—अधिकामः, तस्मात्—अधिकामात् । ( वि. पू. क. ) **अथवा**—आधिकामात्—आधिश्च कामश्च एतयोः समाहारः—आधिकामम्, तस्मात्—आधिकामात् । ( स. द्व. )

**अव्याधिकालाननजननजरात्रासमाना**—कालस्य आननम्—कालाननम्, ( ष. त. पु. ) व्याधिश्च कालाननं च जननं च जरा च त्रासश्च मानश्च—व्याधिकालाननजननजरात्रासमानाः, ( इ. द्व. ) न विद्यन्ते व्याधिकालाननजननजरात्रासमानाः यस्यां सा—अव्याधिकालाननजननजरात्रासमाना । ( न. ब. व्री. )

**असमाना**—नास्ति समानः यस्याः सा—असमाना । (न.ब.व्री.)

**सद्योऽसद्योगभिद् वागमलगमलया जैनराजीनराजी-**
**नूता नूतार्थधात्रीह ततहततमःपातकाऽपातकामा ।**
**शास्त्री शास्त्री नराणां हृदयहृदयशोरोधिकाऽबाधिका वा-**
**ऽऽदेया देयान्मुदं ते मनुजमनु जरां त्याजयन्ती जयन्ती**
**॥ ३ ॥ ९१ ॥**

अन्वय—असद्योगभिद्, अमलगमलया, इनराजीनूता, नूतार्थधात्री, ततहततमःपातका, अपातकामा, शास्त्री, नराणां शास्त्री, (शास्त्रीशा, स्त्रीनराणां) हृदयहृत्, अयशोरोधिका, अबाधिका, आदेया, मनुजम् अनु जरां त्याजयन्ती, जयन्ती वा जैनराजी वाग् ते इह सद्यः मुदं देयात् ।

**અર્થ**—અશુભ યોગને ભેદનારી, નિર્મલ સરખા પાઠોનો શ્લેષ છે જેમાં એવી, રાજાઓની શ્રેણિવડે સ્તવાયેલી,નવીન અર્થને ધારણ કરનારી, નાશ કરાયા છે વિસ્તાર પામેલા અજ્ઞાન અને પાપો જેનાવડે એવી, પતન અને કામથી રહિત, (અથવા નથી વિદ્યમાન પાતક અને રોગ જેમાં એવી), શાસ્ત્ર સંબંધિની, મનુષ્યોને શિક્ષા આપનારી, (અથવા–શાસ્ત્રને જાણનારની સ્વામિની, તથા સ્ત્રી અને મનુષ્યોના) હૃદયને હરનારી, અપકીર્તિને રોકનારી, પીડા ઉત્પન્ન નહિ કરનારી, ગ્રહણ કરવા યોગ્ય, મનુષ્યને આશ્રયીને જરાનો ત્યાગ કરાવનારી, અને જયવંતી એવી જિનેશ્વર ભગવંતની વાણી તને આ જગતમાં જલ્દી આનંદ આપો...

**समास–**

**असद्योगभिद्**—न सन्– असन्, (न. त. पु.) असंश्चासौ योगश्च—असद्योगः, (वि. पू. क.) असद्योगं भिनत्ति इति—असद्-योगभिद् । क्विप्' ५।३।१४८...क्विप् । (उप. त. पु.)

**अमलगमलया**—न विद्यते मलः यस्मिन् सः—अमलः, (न.ब.व्री.) गमानां लयः—गमलयः, (ष. त. पु.) अमलः गमलयः यस्यां सा—अमलगमलया । (स. ब. व्री.)

**जैनराजी**—जिनेषु राजानः—जिनराजाः, (स. त. पु.) 'राजन् सखेः' ७।३।१०६...अट् समासान्त, जिनराजानाम् इयम्—जैनराजी । 'तस्येदम्०' ६।३।१६० ना सूचनथी 'प्राग् जितादण्' ६।१।१३....अण् ।

**इनराजीनूता**—इनानां राजी—इनराजी, (ष. त. पु.) इनराज्या नूता—इनराजीनूता । (तृ. त. पु.)

**नूतार्थधात्री**—नूताः अर्थाः—नूतार्थाः, (वि. पू. क.) नूतार्थान् दधातीति–नूतार्थधात्री । 'तृन् शीलधर्मसाधुषु०' ५।२।२७....तृन्,

**अथवा**—दधाति इत्येवं शीला—धात्री, 'धात्री' ५।२।८१.... तृन्नन्त—निपातन; नूतार्थानां धात्री—नूतार्थधात्री। (ष. त. पु.)

**ततहततमःपातका**—तमश्च पातकानि च—तमःपातकानि, (इ.द्व.) ततानि हतानि तमःपातकानि यया सा—ततहततमःपातका। (स.ब.ब.व्री.)

**अपातकामा**—पातश्च कामश्च—पातकामौ, अथवा—पातकं च आमश्च पातकामौ, (इ. द्व.) न विद्येते पातकामौ यस्यां सा अपातकामा। (न. ब. व्री.)

**हृदयहृत्**—हृदयं हरतीति—हृदयहृत्। 'क्विप्' ५।१।१४८ ...क्विप्. (उप. त. पु.)

**अयशोरोधिका**—न यशांसि—अयशांसि, (न. त. पु.) अयशांसि रुणद्धि—अयशोरोधिका। 'णकतृचौ०' ५।१।४८...णक,

**अबाधिका**—न बाधिका—अबाधिका। (न. त. पु.) अथवा—न विद्यते बाधा यस्यां सा—अबाधिका। (न. ब. व्री.)

**याता या तारतेजाःसदसि सदसिभृत् कालकान्तालकान्ता,**
**ऽपारिं पारिन्द्रराजं सुरवसुरवधूपूजिताऽरं जितारम्।**
**सा त्रासात् त्रायतां त्वामविषमविषभृद्भूषणाऽभीषणाभी-**
**हीनाहीनाग्र्यपत्नी कुवलयवलयश्यामदेहाऽमदेहा**
**॥ ४ ॥ ९२ ॥**

अन्वय—या सदसि तारतेजाः, सदसिभृत्, कालकान्तालकान्ता, जितारम् अपारिं पारिन्द्रराजं याता, सुरवसुरवधूपूजिता (अस्ति) अविषमविषभृद्भूषणा, अभीषणा, भीहीना, कुवलयवलयश्यामदेहा, अमदेहा, अहीनाग्र्यपत्नी, सा त्वां त्रासात् अरं त्रायताम्।

**અર્થ**—જેણી સભાને વિષે ઉજ્જવળ કાંતિવાળી શ્રેષ્ઠ ખડ્ગને ધારણ કરનારી, શ્યામ મનોહર કેશના અગ્રભાગવાળી જિતાયો છે શત્રુસમૂહ જેનાવડે એવા દૂર થયા છે શત્રુ જેના એવા અજગરરાજ ઉપર બેઠેલી, સારા સ્વરવાળી દેવોની સ્ત્રીઓવડે પૂજાયેલી છે. સૌમ્ય સર્પો છે અલંકાર જેના એવી, ભયંકરતા રહિત, ભયવડે રહિત, નીલકમલનાં સમૂહ જેવા શ્યામ દેહવાળી, મદ રહિત છે ચેષ્ટા જેની એવી સર્પોનાં સ્વામિ (ધરણેન્દ્ર)ની મુખ્ય દેવી, (પદ્માવતી) એવી તે તારું ત્રાસથી જલ્દીથી રક્ષણ કરો...

**समास—**

**तारतेजाः**—तारं तेजः यस्याः सा—तारतेजाः। (स.ब.व्री.)

**सदसिभृत्**—संश्चासौ असिश्च—सदसिः, सदसिं बिभर्तीति—सदसिभृत्। 'क्विप्' ५।१।१४८....क्विप्, (उप. त. पु.)

**कालकान्तालकान्ता**—अलकानाम् अन्ताः—अलकान्ताः, (ष. त. पु.) कालाः कान्ताः अलकान्ताः यस्याः सा—कालकान्तालकान्ता। (स. ब. ब. व्री.)

**अपारिम्**—अपगताः अरयः यस्य सः—अपारिः, तम्—अपारिम्। (प्रा. ब. व्रीः)

**पारिन्द्रराजम्**—पारिन्द्राणां राजा—पारिन्द्रराजः, तम्-पारिन्द्रराजम्। (ष. त. पु.) 'राजन्सखेः' ७।३।१०६....अट्

**सुरवसुरवधूपूजिता**—शोभनः रवः यासां ताः—सुरवाः, (अव्य. ब. व्री.) सुराणां वध्वः—सुरवध्वः (ष. त. पु.) सुरवाश्चामूः सुरवध्वश्च—सुरवसुरवध्वः, (वि. पू. क.) सुरवसुरवधूभिः पूजिता—सुरवसुरवधूपूजिता। (तृ. त. पु.)

**जितारम्**—अरीणां समूहः—आरम्, 'षष्ठ्याः समूहे ६।२।९नां सूचनथी' 'प्राग् जितादण्' ६।१।१३....अण्, जितम् आरं येन सः—जितारः, तम्—जितारम्। (स. ब. व्री.)

**अविषमविषभृद्भूषणा**—विषं बिभ्रति—इति—विषभृतः 'क्विप्' ५।१।१४८...क्विप्, (उप. त. पु.) न विषमाः—अविषमाः, (न. त. पु.) अविषमाः विषभृतः—अविषमविषभृतः, (वि. पू. क.) अविषमविषभृतः (एव) भूषणानि यस्याः सा—अविषमविषभृद्भूषणा। (स.ब.व्री.)

**अभीषणा**—न भीषणा—अभीषणा, (न. त. पु.)

**भीहीना**-भिया हीना-भीहीना। 'ऊनार्थ०' ३।१।६७...(तृ.त.पु.)

**अहीनाग्र्यपत्नी**—अहीनाम् इनः—अहीनः, (ष.त.पु.) अग्रे भवा—अग्र्या, 'दिगादि०' ६।३।१२४....य, अग्र्या चासौ पत्नी च—अग्र्यपत्नी, (वि.पू.क.) अहीनस्य अग्र्यपत्नी—अहीनाग्र्यपत्नी। (ष.त.पु.)

**कुवलयवलयश्यामदेहा**—कुवलयानां वलयम्—कुवलयवलयम्, (ष. त.पु.) श्यामः देहः—श्यामदेहः, (वि.पू.क.) कुवलयवलयवत् श्यामदेहः यस्याः सा—कुवलयवलयश्यामदेहा। (उप.ब.व्री.)

**अमदेहा**—न विद्यते मदः यस्याः सा—अमदा, (न.ब.व्री.) अमदा ईहा यस्याः सा—अमदेहा। (सं.ब.व्री.)

### श्रीमहावीरजिनस्तुतिः

अर्णवदण्डकच्छन्दः

**नमदमर शिरोरुहस्रस्त सामोद निर्निद्र-**
**मन्दारमालारजोरञ्जितांहे ! धरित्रीकृता-**
**वन ! वरतमसङ्ग मोदारतारोदितानङ्गनार्याव-**
**लीलापदे हे क्षितामोहिताक्षो भवान्।**
**मम वितरतु वीर ! निर्वाणशर्माणि जाताऽवतारो-**
**धराधीश सिद्धार्थधाम्नि क्षमालङ्कृताऽ-**
**वनवरतमसङ्गमोदारतारोदिताऽनङ्गनाऽऽर्याव !**
**लीलापदे हे क्षितामो हिताऽक्षोभ्वान् ॥१॥९३॥**

अन्वय—नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितांह्रे! धरित्रीकृतावन! असङ्गमोद! अरत! अरोदित! अनङ्गन! आर्यात्र! हित! हे वीर! वरतमसङ्गमोदारतारोदिताऽनङ्गनार्यावलीलापदेहेक्षितामोहिताक्षः, क्षमाऽलङ्कृतौ लीलापदे धराधीशसिद्धार्थधाम्नि जाताऽवतारः, क्षितामः, अक्षोभवान् भवान् मम निर्वाणशर्म्माणि अनवरतं वितरतु।

અર્થ—નમતા એવા દેવોના કેશ ઉપરથી પડેલી, સુવાસિત વિકસિત એવી કલ્પવૃક્ષના પુષ્પોની માલાના પરાગવડે રંગાયેલા છે ચરણો જેના એવા, પૃથ્વી ( લોક )નું કરાયું છે રક્ષણ જેના વડે એવા, સંગ અને હર્ષથી રહિત; અથવા—સંગથી ઉત્પન્ન થતાં હર્ષથી રહિત, અનાસક્ત, રૂદન રહિત, સ્ત્રીઓ રહિત, સજ્જનોનું રક્ષણ કરનારા, હિતકારી, એવા હે મહાવીરસ્વામી ભગવાન! અતિશય શ્રેષ્ઠ સંગતિવાળી, વિશાળ નેત્રની કીકીઓવાળી, અને પ્રગટ થયો છે કામ જેને એવી સ્ત્રીઓની શ્રેણિના વચનો દેહ અને અવલોકન વડે નથી મોહ પામી ઇન્દ્રિયો જેની એવા, પૃથ્વીમંડલના આભૂષણરૂપ, તથા વિલાસના સ્થાનરૂપ એવાં સિદ્ધાર્થરાજાના ભવનને વિષે થયો છે-જન્મ જેનો એવા-ક્ષય પામ્યા છે રોગો જેના એવા, નથી ક્ષોભ જેને એવા આપ મને મોક્ષનાં સુખોને સતત આપો...

समास—

नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जिताऽह्रे!—
नमन्तश्च ते अमराश्च—नमदमराः, ( वि. पू. क. ) शिरसि रोहन्ति इति—शिरोरुहाः, 'मूलविभुजादयः०' ५।१।१४४....क, ( उप. त. पु. ) नमदमराणां शिरोरुहाः—नमदमरशिरोरुहाः, ( ष. त. पु. ) नमदमरशिरो-

रुहेभ्यः स्रस्ताः—नमदमरशिरोरुहस्रस्ताः, ( पं. त. पु. ) आमोदेन सह वर्तन्ते ये ते—सामोदाः, ( सह. ब. व्री. ) निर्गता निद्रा येभ्यस्ते—निर्निद्राः, ( प्रादि. ब. व्री. ) सामोदाश्च ते निर्निद्राश्च—सामोदनिर्निद्राः, ( वि. उभ. क. ) सामोदनिर्निद्राश्चामी मन्दाराश्च—सामोदनिर्निद्रमन्दाराः, ( वि. पू. क. ) सामोदनिर्निद्रमन्दाराणां मालाः—सामोदनिर्निद्रमन्दारमालाः, ( ष. त. पु. ) नमदमरशिरोरुहस्रस्ताश्च ताः सामोदनिर्निद्रमन्दारमालाश्च—नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालाः, ( वि. पू. क. ) नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालानां रजांसि—नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजांसि ( ष. त. पु. ) नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोभिः रञ्जितौ—नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितौ, (तृ. त. पु.) नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितौ अंह्री यस्य सः नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितांह्रिः, तत्संबोधनम्— नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितांह्रे ! ( स. ब. व्री. )

**धरित्रीकृतावन !**—कृतम् अवनं येन सः—कृतावनः, (स.ब.व्री.) धरित्र्याः कृतावनः — धरित्रीकृतावनः, तत्संबोधनम् — धरित्रीकृतावन ! ( ष. त. पु. )

**वरतमसङ्गमोदारतारोदिताऽनङ्गनार्यावलीलापदेहेक्षितामोहिताक्षः**—अतिशयेन वरः—वरतमः,वरतमः सङ्गमः यासां ताः—वरतमसङ्गमाः, (स.ब.व्री.) उदारा तारा यासां ताः—उदारताराः, (स. ब. व्री.) उदितः अनङ्गः यासां ताः—उदितानङ्गाः, (स.ब.व्री.)(ष.त.पु.) वरतमसङ्गमाः उदारताराः—वरतमसङ्गमोदारताराः, (वि.उभ. क.) वरतमसङ्गमोदारताराः उदितानङ्गाः—वरतमसङ्गमोदारतारोदितानङ्गाः (वि. उभ. क.) वरतमसङ्गमोदारतारोदितानङ्गाः

नार्यः--वरतमसङ्गमोदारतारोदितानङ्गनार्यः, ( वि. पू. क. ) वरतमसङ्गमोदारतारोदितानङ्गनारीणाम्—आवली—वरतमसङ्गमोदारतारोदितानङ्गनार्यावली. ( ष. त. पु. ) लापाश्च देहाश्च ईक्षितानि च—लापदेहेक्षितानि, (इ. द्व.) वरतमसङ्गमोदारतारोदितानङ्गनार्यावल्याः लापदेहेक्षितानि—वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितानि, ( ष. त. पु. ) न मोहितानि—अमोहितानि, ( न. त. पु. ) वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितैः अमोहितानि—वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितामोहितानि, ( तृ. त. पु. ) वरतमसङ्गमादारतारोदितानङ्गनार्यावलीलापदेहेक्षितामोहितानि अक्षाणि यस्य सः—वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितामोहिताक्षः । ( स. ब. व्री. )

**निर्वाणशर्म्माणि**—निर्वाणस्य शर्माणि—निर्वाणशर्माणि, तानिः—निर्वाणशर्म्माणि । ( ष. त. पु. )

**जातावतारः**—जातः अवतारः यस्य सः—जातावतारः । (स.ब.व्री.)

**धराधीशसिद्धार्थधाम्नि**—अधिकः ईशः—अधीशः, (प्रा. त. पु.) धरायाः अधीशः—धराधीशः, (ष.त.पु.) धराधीशः सिद्धार्थः—धराधीशसिद्धार्थः, ( वि.पू.क. ) धराधीशसिद्धार्थस्य धाम—धराधीशसिद्धार्थधाम, तस्मिन्—धराधीशसिद्धार्थधाम्नि । (ष.त.पु.)

**क्षमालङ्कृतौ**—अलङ्क्रियतेऽनया—अलङ्कृतिः, 'स्त्रियां क्तिः' ५।३।९१...क्ति, क्षमायाः अलङ्कृतिः—क्षमालङ्कृतिः, तस्याम्—क्षमालङ्कृतौ । "कृतिः" ३।१।७७ (ष.त.पु.)

**असङ्गमोद !**—सङ्गश्च मोदश्च—सङ्गमोदौ, (इ.द्व.) न विद्येते सङ्गमोदौ यस्य सः—असङ्गमोदः, (न.ब.व्री.) अथवा सङ्गेन प्राप्तः—सङ्गप्राप्तः, (तृ.त.पु.) सङ्गप्राप्तः मोदः—सङ्गमोदः, (म.प.लो.क.) न विद्यते सङ्गमोदः यस्य सः—असङ्गमोदः, तत्संबोधनम्—असङ्गमोदः ! (न.ब.व्री.)

**–अरत !**—न रतः–अरतः तत्संबोधनम्–अरत ! (न.त.पु.)

**अरोदित !**—न विद्यते रोदितं यस्य सः–अरोदितः, तत्संबोधनम्–अरोदित ! ( न.ब.व्री. )

**अनङ्गन !**—न सन्ति अङ्गनाः यस्य सः–अनङ्गनः, तत्संबोधनम् –अनङ्गन ! (न.ब.व्री.)

**आर्यावः**—आर्यान् अवतीति–आर्यावः, तत्संबोधनम्–आर्याव ! 'कर्मणोऽण्' ५।१।७२...अण्, (उप.त.पु.)

**लीलापदे**—लीलायाः पदम्–लीलापदम्, तस्मिन्–लीलापदे। ( ष. त. पु. )

**क्षितामः**—क्षितः आमः येन सः–क्षितामः । (स.ब.व्री.)

**अक्षोभवान्**—क्षोभः अस्ति अस्य–क्षोभवान्, तदस्या ७।२।१... मतु, न क्षोभवान्–अक्षोभवान् । (न.त.पु.)

**समवसरणमत्र यस्याः स्फुरत्केतुचक्रानकानेक–**
**पद्मेन्दुरुक्चामरोत्सर्पिसालत्रयी,–**
**सदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्र–**
**प्रभागुर्वराराट् परेताहितारोचितम् ।**
**प्रवितरतु समीहितं साऽर्हतां संहतिर्भक्तिभाजाम्**
**भवाम्भोधिसम्भ्रान्तभव्यावलीसेविता–**
**ऽसदवनमदशोकपृथ्वीक्षणप्रा यशोभातपत्र–**
**प्रभागुर्वराराट्परेताहितारोचितम् ॥ २ ॥ ९४ ॥**

अन्वय—अत्र यस्याः स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पि-सालत्रयीसद्वनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभागुरु, परेताहितारोचितम्, (आरोचितम्) यशोभातपत्रप्रभागुर्वराराट्परेताहितारोचितं समवसरणम् अराराट् सा भवाम्भोधिसम्भ्रान्तभव्यावली सेविता (परा इताहिता) असद्वनमदशोकपृथ्वी, ईक्षणप्रा अर्हतां संहतिः भक्तिभाजां समीहितं प्रवितरतु ।

**અર્થ**—આ લોકને વિષે જે (જિનવરશ્રેણિ)નું ફરકતો એવો ધ્વજ. ચક્ર, દેવદુન્દુભિ, અનેક કમલો, ચંદ્ર જેવી કાન્તિવાળા, ચામરો (એકબીજાથી) મોટા ત્રણ ગઢ. શ્રેષ્ઠ અને નમતું એવું અશોકવૃક્ષ, પૃથ્વીને વિષે ઉત્સવરૂપ શોભાવાળા છત્રોની કાંતિ (આ સર્વ) વડે મહાન્, ચાલ્યા ગયા છે અહિત (શત્રુઓ) જેઓના એવા (મુનિઓ) થી શોભા પામેલું, (અથવા–મુનિઓના સમૂહને યોગ્ય) કીર્તિવડે શોભા પામેલ વાહનોને ભજનારા રાજાઓ અસુરો નાગકુમારો અને જ્યોતિષ્ક દેવોને યોગ્ય, એવું સમવસરણ ખૂબ શોભતું હતું. તે સંસારરૂપી સમુદ્રમાં વ્યાકુલ થયેલા ભવ્ય જીવોની શ્રેણિ વડે સેવાયેલી, (શ્રેષ્ઠ અને ચાલ્યા ગયા છે અહિતો જેના એવી,) સંતાપસહિત મદ અને શોકના વિસ્તાર વિનાની, નેત્રોને સંતોષ આપનારી, (અથવા–જ્ઞાન આપનારી) એવી અરિહંત ભગવંતોની શ્રેણિ ભક્તિને ભજનારાઓના ઇચ્છિતને સારી રીતે વિસ્તારો...

समास–

समवसरणम्—समवसरन्ते जिनाश्वराः यस्मिन्—समवसरणम् । 'करणाऽऽधारे०' ५।३।१२९...अनट् ।

स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयीसद्वनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभागुरु— स्फुरन् केतुः—स्फुरत्केतुः;

( वि.पू.क. ) न एकानि–अनेकानि, ( न.त.पु. ) अनेकानि च तानि पद्मानि च–अनेकपद्मानि, ( वि. पू. क.) इन्दुवत् रुक् येषां तानि–इन्दुरुञ्चि, ( उप. ब.व्री. ) इन्दुरुञ्चि चेमानि चामराणि च–इन्दुरुक्चामराणि, ( वि. पू. क. ) उत्सर्पन्ति इत्येवंशीला–उत्सर्पिणी, 'अजातेः शीले०' ५।१।१५४....णिन्, त्रयः प्रकाराः यस्याः सा–त्रयी, 'द्वित्रिभ्यामू०' ७।१।१५२...अयट्, 'अणञेयेकण्०' २।४।२०.... ङी, सालानां त्रयी–सालत्रयी, ( ष. त. पु. ) उत्सर्पिणी चेयं सालत्रयी च उत्सर्पिसालत्रयी, ( वि. पू. क. ) अवनमतीति–अवनमन्, अवनमंश्च सः अशोकश्च–अवनमदशोकः, ( वि. पू. क. ) सन् अवनमदशोकः–सदवनमदशोकः, ( वि. पू. क. ) क्षणप्राया शोभा–क्षणप्रायशोभा, (वि.पू.क.) पृथ्व्यां क्षणप्रायशोभा येषां तानि–पृथ्वीक्षणप्रायशोभानि, ( व्य. ब. व्री.) आतपात् त्रायन्ते–आतपत्राणि, 'स्था–पा०' ५।१।१४२...क, (उप. त. पु. ) पृथ्वीक्षणप्रायशोभानि आतपत्राणि–पृथ्वीक्षणप्रायशोभातपत्राणि, ( वि.पू.क. ) स्फुरत्केतुश्च चक्रं च आनकश्च अनेकपद्मानि च इन्दुरुक्चामराणि च उत्सर्पिसालत्रयी च सदवनमदशोकश्च पृथ्वीक्षणप्रायशोभातपत्राणि च–स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयीसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्राणि, ( इ. द्व. ) स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयीसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्राणां प्रभाः–स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयीसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभाः, ( ष.त.पु. ) स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयीसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभाभिः, ( कृतम्)

गुरु— स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयीसदवनमदशोक-पृथ्वीक्षणप्रायशोभातपत्रप्रभागुरु । 'तृतीया०' ३।१।६५...(तृ.त.पु.)

**परेताहितारोचितम्**—न हिताः--अहिताः, ( न.त.पु. ) ( परा+इ+क्त ) परेताः अहिताः येषां ते परेताहिताः, (मुनयः) (स.ब.व्री ) परेताहितैः आरोचितम्—परेताहितारोचितम् । (तृ.त.पु. )

**अथवा**—इताहिता—इताः अहिताः सा—इताहिता । (स.ब.व्री.) आरोचितम्—अरन्ति संसारपारम्—अराः, 'अच्' ५।१।४९... अच्, ( ऋ+अच्) अराणां समूहः—आरम्, 'षष्ठयाः, समूहे०' ६।२।९ना सूचनथी 'प्राग् जितादण्०' ६।१।१३...अण्, आरस्य उचितम्—आरोचितम् । ( ष. त. पु. )

**भक्तिभाजाम्**—भक्तिं भजन्तीति – भक्तिभाजः, तेषां – भक्तिभाजाम् । 'भजोविण्' ५।१।१४६...विण्, ( उप. त. पु. )

**भवाम्भोधिसंभ्रान्तभव्यावलीसेविता**—अम्भांसि धीयन्ते यस्मिन्—अम्भोधिः, 'व्याप्यादाधारे' ५।३।८८...कि, भव एव अम्भोधिः—भवाम्भोधिः, ( अव. पू. क. ) भवाम्भोधौ संभ्रान्ताः—भवाम्भोधिसंभ्रान्ताः, 'क्तेन' ५।१।९२ ( स. त. पु.) भवाम्भोधिसंभ्रान्ताः भव्याः—भवाम्भोधिसंभ्रान्तभव्याः, ( वि. पू. क. ) भवाम्भोधिसंभ्रान्तभव्यानाम् आवली—भवाम्भोधिसंभ्रान्तभव्यावली, ( ष. त. पु. ) भवाम्भोधिसंभ्रान्तभव्यावल्या सेविता—भवाम्भोधिसंभ्रान्तभव्यावलीसेविता, ( तृ. त. पु. )

**असदवनमदशोकपृथ्वी**—दवनेन सह वर्तते या सा—सदवना, ( सह. ब. व्री. ) मदश्चशोकश्च—मदशोकौ, ( इ. द्व. ) मदशोकयोः पृथ्वी—मदशोकपृथ्वी ( ष. त. पु. ) न विद्यते सदवना मदशोकपृथ्वी यस्याः सा—असदवनमदशोकपृथ्वी । ( न. ब. व्री. )

ईक्षणप्रा—ईक्षणानि प्राति–ईक्षणप्रा। 'आतोडोऽह्वा' ५।१।७६ ....( उप. त. पु. )

**यशोभातपत्रप्रभागुर्वराराट्परेताहितारोचितम्**—यशसा भातानि यशोभातानि, (तृ. त. पु.) यशोभातानि पत्राणि–यशोभातपत्राणि, (वि. पू. क.) यशोभातपत्राणि प्रभजन्तीति–यशोभातपत्रप्रभाजः, '.भजोविण्' ५।१।१४६...विण्, (उप.त.पु.) राजन्ते इति राजः, 'द्युित्–ददत्०' ५।२।८३...क्विप्, उर्वराया: राजः–उर्वराराजः, (ष.त.पु.) यशोभातपत्रप्रभाजः उर्वराराजः–यशोभातपत्रप्रभागुर्वराराजः, (वि.पू.क.) परम् इताः–परेताः, (द्वि.त.पु.) यशोभातपत्रप्रभागुर्वराराजश्च परेताश्च अहयश्च ताराश्च –यशोभातपत्रप्रभागुर्वराराट्परेताहितारा: (इ.द्व.) यशोभातपत्रप्रभागुर्वराराट्परेताहिताराणाम् उचितम्–यशोभातपत्रप्रभागुर्वराराट्परेताहितारोचितम्। (ष. त. पु.)

परमततिमिरोग्रभानुप्रभा भूरिभङ्गैर्गभीरा
भृशं विश्ववर्यै निकाय्ये वितीर्यात्तराम्–
अहतिमतिमते हि ते शस्यमानस्य वासं सदाऽ–
तन्वतीता–पदानन्दधानस्य सामानिनः।
जननमृतितरङ्गनिष्पारसंसारनीराकरान्त–
र्निमज्जज्जनोत्तारनौर्भारती तीर्थकृत्!।
महति मतिमतेहितेशस्य मानस्य वा संसदा
तन्वती तापदानं दधानस्य सामानि नः ॥३॥९५॥

अन्वय— अतन्वतीतापत् ! ( मतिमते हित ! ) तीर्थकृत् ! हि शस्यमानस्य आनन्दधानस्य अमानिनः ( सामानिनः ) ईशस्य नः सामानि दधानस्य ते सा परमततिमिरोग्रभानुप्रभा भूरिभङ्गैः भृशं- गभीरा जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनोत्तारनौः मतिमतेहिता मानस्य संसद् वा तापदानम् आतन्वती भारती विश्वार्ये महति अतिमत्ते ( अहतिमति मत्ते ) निकाय्ये अहतिं वासं सदा वितीर्यात्तराम् ।

અર્થ—મોટી દૂર થઇ છે આપત્તિઓ જેને એવા, ( બુદ્ધિ- માનને હિતકારી ) હે તીર્થંકર ભગવન્ ! ખરેખર પ્રશંસા કરાતાં, આનંદનાં સ્થાનસમા, અભિમાન વગરનાં, (માનવગરનાં મુનિઓ સાથે રહેલાં ) સ્વામિ અમારા પ્રિયને પુષ્ટ કરનારા એવા તારી, અન્ય મત- રૂપી અંધકારનો નાશ કરવામાં પ્રચંડ સૂર્યની કાન્તિ સરખી, ઘણા વિકલ્પોવડે અતિ ગંભીર, જન્મ અને મરણરૂપી તરંગોવાળા અપાર સંસારરૂપી સમુદ્રની અંદર ડુબતા લોકોને તારવામાં નૌકા સમાન, બુદ્ધિશાળીને અભિષ્ટ, સન્માનની જાણે સભા હોય તેવી, સંતાપના ખંડનને વિસ્તારતી, એવી વાણી... વિશ્વમાં શ્રેષ્ઠ, વિસ્તારવાલા, અતિશય ઇષ્ટ, ( નાશ નથી જેમાં એવા, અને ઇષ્ટ, ) એવા ભવનને વિષે નથી નાશ જેમાં એવા વાસને હંમેશા સંપૂર્ણપણે આપો....

समास—

परमततिमिरोग्रभानुप्रभा—परेषां मतानि—परमतानि, (ष.त.पु.) परमतानि एव तिमिराणि—परमततिमिराणि, (अव.पू.क.) उग्रश्चासौ भानुश्च—उग्रभानुः, (वि.पू.क.) उग्रभानोः प्रभा—उग्रभानुप्रभा, (ष.त.पु.) परमततिमिराणि ध्वंसते इति—परमततिमिरध्वंसिनी, 'अजातेः शीले' ५।१।१५४...णिन् (उप.त.पु.) परमततिमिरध्वंसिनी उग्रभानुप्रभा (इव) —परमततिमिरोग्रभानुप्रभा । (म.प.लो.क.)

**भूरिभङ्गै**—भूरयश्च ते भङ्गाश्च—भूरिभङ्गाः, तैः—भूरिभङ्गैः। (वि.पू.क.)

**विश्ववर्ये**—विश्वे वर्यः—विश्ववर्यः तस्मिन्—विश्ववर्ये। (स.त.पु.)

**अहतिमति**—न विद्यते हतिः यस्मिन् सः—अहतिमान्, तस्मिन् —अहतिमते। 'तदस्या०' ७।२।१...मतु, (न. ब. व्री.)

**अहतिम्**—न विद्यते हतिः यस्मिन् सः—अहतिः तम्—अहतिम्। (न. ब. व्री.)

**अतन्वतीतापद्!**—न तन्व्यः—अतन्व्यः, (न.त.पु.) अतन्व्यः अतीताः आपदः यस्य सः—अतन्वतीतापद्, तत्संबोधनम्—अतन्वतीतापद्!। (स.ब.ब.व्री.)

**आनन्दधानस्य**—आनन्दस्य धानम्—आनन्दधानम्, तस्य—आनन्दधानस्य। (ष.त.पु.)

**अमानिनः**—न विद्यते मानः यस्य सः—अमानी, तस्य—अमानिनः। (न. ब. व्री.)

**सामानिनः**—न विद्यते मानः येषां ते—अमानिनः, (मुनयः) (न.ब.व्री.) अमानिभिः सह वर्तते यः सः—सामानी, तस्य—सामानिनः। (सह. ब. व्री) 'अतोऽनेक०' ७।२।६....इन्,

**जननमृतितरङ्गनिष्पारसंसारनीशकरान्तर्निमज्जज्जनोत्तारनौः**—जायन्ते इति—जननानि, 'अनट्' ५।३।१२४...अनट्, म्रियन्ते इति—मृतयः 'स्त्रियां क्तिः' ५।३।९१...क्ति, जननानि च मृतयश्च—जननमृतयः, (इ.द्व.) जननमृतयः एव तरङ्गाः यस्य सः—जननमृतितरङ्गः, (उपमानोत्तर.ब.व्री.) निर्गतः पारः यस्मात्सः—निष्पारः, (प्रा. ब. व्री.) नीराणाम् आकरः—नीराकरः, (ष.त.पु.) संसारः एव नीराकरः—संसारनीराकरः, (अव. पू. क.) निष्पारः ससारनीराकरः—निष्पारसंसारनीराकरः, (वि. पू. क.) जननमृतितरङ्गश्चायं निष्पारसंसारनीराकरश्च—जननमृतितरङ्गनिष्पारसंसारनीराकरः, (वि.पू.क.) जननमृतितरङ्गनिष्पारसंसारनीराकरस्य

अन्तः–जननमृतितरङ्गनिष्पारसंसारनीराकरान्तः, (ष.त.पु.) जननमृतितरङ्ग-निष्पारसंसारनीराकरान्तः निमज्जन्तः–जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जन्तः, (स.त.पु.) जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जन्तः जनाः–जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनाः ( वि.पू.क.) जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनानाम् उत्तारः-जननमृति-तरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनोत्तारः, 'कृति' ३।१।७७.... ( ष. त. पु. ) जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनोत्तारे नौः इव–जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनोत्तारनौः । 'सिहाद्यैः पूजायाम्' ३।१।८९ ( स. त. पु. )

**तीर्थकृत् !**—तीर्थं करोतीति–तीर्थकृत्, तत्संबोधनम्–तीर्थकृत् !। ( उप. त. पु. ) 'क्विप्' ५।१।१४८....क्विप्

**मतिमते**—मतिरस्ति यस्य–मतिमान्, तस्मै–मतिमते । 'तदस्या०' ७।२।१...मतु ।

**तापदानम्**—तापस्य दानम्–तापदानम्, तद्–तापदानम् । 'कृति' ३।१।७७ ( ष. त. पु. )

**सरभसनतनाकिनारीजनोरोजपीठीलुठ–**
**त्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहे !**
**परमवसुतराङ्गजाऽऽरावसन्नाशितारातिभा–**
**राऽजिते भासिनी हारतारा बलक्षेमदा ।**
**क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्ट–**
**कण्ठोद्भटे संस्थिते ! भव्यलोकं त्वमम्बाऽम्बिके !**
**परमव सुतराङ्गजारावसन्ना शितारातिभा**
**राजिते ! भासि नीहारताराबलक्षेऽमदा ॥ ४ ॥ ९६ ॥**

अन्वय— सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहे ! क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठोद्भटे राजिते अजिते भासि नीहारताराबलक्षे गजारौ संस्थिते ! ( राजिते ! अजिते ! नीहारताराबलक्षे ! ) अम्बिके !, परमवसुतराङ्गजा, आरावसन्नाशितारातिभारा, भासिनी, हारतारा, बलक्षेमदा, असन्ना, शितारातिभा, अमदा, अम्बा, त्वम् परं भव्यलोकं सुतराम् अव ।

**અર્થ**—વેગ સહિત ( જલ્દીથી ) નમેલા દેવાંગના રૂપ લોક અથવા દેવાંગનાઓના સમૂહનાં સ્તનરૂપી પીઠિકા ઉપર શોભતા ઉજ્જવલ હારોમાંથી પ્રકટ થતાં કિરણોવડે કરીને કાબરચિતરાવર્ણવાળા છે ચરણકમલ જેણીનાં એવી, વિદ્યુત જેવી ઉજ્જવલ, મોટી તથા ચંચલ એવી કેસરાઓવડે ઉત્કૃષ્ટ એવા કંઠવડે વિકરાલ, શોભતા, ( કોઇથી ) નહિ જિતાયેલ, કાન્તિવાળા, તથા બરફ અને તારાઓ જેવા ઉજ્જવલ સિંહને વિષે બેઠેલી, ( શોભતી; કોઇથી નહિ જીતાયેલી, બરફ તથા તારા જેવી ઉજ્જવલ ) અંબિકાદેવી ! શ્રેષ્ઠ તેજવાળા બે પુત્રવાળી, અવાજ માત્રથી સર્વથા નાશ કર્યો છે શત્રુઓનો સમૂહ જેનાવડે એવી, શોભવાના સ્વભાવવાળી, હાર જેવી ઉજ્જવલ, સામર્થ્ય અને કલ્યાણને આપનારી, ખિન્ન નહીં થયેલી, તીક્ષ્ણ કરેલ ( ચકચકિત ) પિત્તલ જેવી અતિશય કાન્તિવાળી, અભિમાન વિનાની માતા એવી તું ઉત્તમ ભવ્ય લોકોનું સારી રીતે રક્ષણ કર !

समास—

**सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहे !**—रभसेन सह वर्तते यत् तत्—सरभसम्, ( सह. ब. व्री. ) सरभसं नतः—सरभसनतः, ( द्वि. त. पु. ) नाकिनां नार्यः —नाकिनार्यः ( ष. त. पु. ) नाकिनार्यः एव जनः—नाकिनारीजनः, ( अव. पू. क. ) सरभसनतः नाकिनारीजनः—सरभसनतनाकिनारीजनः, ( वि. पू. क. ) सरभसनतनाकिनारीजनस्य उरोजाः—सरभसनतनाकिनारीजनोरोजाः, (ष. त. पु.)

सरभसनतनाकिनारीजनोरोजाः एव पीठ्यः-सरभसनतनाकिनारीजनोरोजपीठ्यः, ( अव. पू. क. ) सरभसनतनाकिनारीजनोरोजपीठीषु लुठन्तः– सरभसनतनाकिनारीजनोरोजपीठीलुठन्तः, (स. त. पु.) ताराश्च ते हाराश्च—तारहाराः, ( वि. पू. क. ) सरभसनतनाकिनारीजनोरोजपीठीलुठन्तः तारहाराः–सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहाराः, (वि.पू.क.) स्फुरन्तश्चामी रश्मयश्च —स्फुरद्रश्मयः, ( वि. पू. क. ) सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहाराणाम् स्फुरद्रश्मयः—सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मयः, (ष. त. पु.) सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिभिः (कृते) सारे—सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारे, 'तृतीया तत्कृतैः' ३।१।६५, (तृ. त. पु.) अम्भसि रुहे—अम्भोरुहे, 'मूलविभुजादयः' ५।१।१४४....क, ( उप. त. पु.) क्रमौ एव अम्भोरुहे—क्रमाम्भोरुहे, (अव.पू.क.) सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारे क्रमाम्भोरुहे यस्याः सा—सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहा, तत्संबोधनम्—सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहे ! । ( स. ब. व्री. )

**परमवसुतराङ्गजा**—परमं वसु ययोस्तौ—परमवसू, ( स. ब. व्री. ) अतिशयेन परमवसू—परमवसुतरौ, 'द्वयोर्विभज्ये०' ७।३।६... तरप्, अङ्गात् जातौ-अङ्गजौ, 'अजातेः पञ्चम्याः' ५।१।१७०...ड ( उप. त. पु. ) परमवसुतरौ अङ्गजौ यस्याः सा—परमवसुतराङ्गजा । ( स. ब. व्री. )

**आरावसन्नाशितारातिभारा**—सम्यग् नाशितः – सन्नाशितः, आरावेण सन्नाशितः—आरावसन्नाशितः, ( तृ. त. पु. ) अरातीनां भारः–अरातिभारः, ( ष. त. पु. ) आरावसन्नाशितः अरातिभारः यया सा—आरावसन्नाशितारातिभारा । ( स. ब. व्री. )

**अजिते !**—न जिता अजिता, तत्संबोधनम्—अजिते ! । (न. त.पु.)

**अथवा**—न जितः—अजितः, तस्मिन्–अजिते । ( न. त. पु. )

**हारतारा**—हारवत् तारा—हारतारा । ( उप. पू. क. )

**बलक्षेमदा**—बलं च क्षेमञ्च—बलक्षेमे, ( इ. द्व. ) बलक्षेमे ददाति बलक्षेमदा । 'आतोऽडोह्वा०' ५।१।७६...ड,

**क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठोद्भटे**—क्षणं रुचिर्यस्याः सा—क्षणरुचिः, ( स. ब. व्री. ) क्षणरुचिवत् रुचिरा—क्षणरुचिरुचिराः, ( उप. पू. क. ) चञ्चन्त्यः सटाः—चञ्चत्सटाः, ( वि. पू. क.) उरवः चञ्चत्सटाः—उरुचञ्चत्सटाः, ( वि. पू. क. ) क्षणरुचिरुचिराः उरुचञ्चत्सटाः—क्षणरुचिरुचिरोरुचञ्चत्सटाः, ( वि. पू. क. ) क्षणरुचिरुचिरोरुचञ्चत्सटाभिः ( कृतः ) सङ्कटः—क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटः, 'तृतीया०' ३।१।६५...( तृ. त. पु. ) उत्कृष्टश्चासौ कण्ठश्च—उत्कृष्टकण्ठः, ( वि. पू. क. ) क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटः उत्कृष्टकण्ठः,—क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठः, (वि.पू.क.) क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठेन (कृतः) उद्भटः—क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठोद्भटः, तस्मिन्—क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठोद्भटे । 'तृतीया०' ३।१।६५...(तृ.त.पु.)

**भव्यलोकम्**— भव्यश्चासौ लोकश्च—भव्यलोकः, तम्—भव्यलोकम् । ( वि. पू. क. )

**गजारौ**—गजानाम् अरिः—गजारिः, तस्मिन्—गजारौ । (ष.त.पु.)

**असन्ना**—न सन्ना—असन्ना । ( न. त. पु. )

**शितारातिभा**—शितं च तद् आरं च—शितारम्, ( वि. पू. क. ) अतिशयेन भा—अतिभा, ( प्रा. त. पु. ) शितारवद् अतिभा यस्याः सा—शितारातिभा । ( उप. ब. व्री. )

**नीहारतारावलक्षे**—नीहाराश्च ताराश्च—नीहारताराः, (इ.द्व.) नीहारतारावद् वलक्षः—नीहारतारावलक्षः, तस्मिन्—नीहारतारावलक्षे । (उप.क.)

**अमदा**—न विद्यते मदः यस्याः सा—अमदा । ( न. ब. व्री. )

रम्यपदभञ्जिकोपेता—

प्रकीर्णक स्तुति लक्षणा—

पणिपीयूषपयस्विनी—

# प
# श्चि
# म
# कू
# ल
# म्

ॐ ह्रीँ श्रीँ अर्हँ नमः

णमो सिरिमइ-सुअ-ओहि-मणपज्जव-केवलनाणाणं

नमः श्रीसिद्धि-विनय-भद्र-विलास-ॐकार-अरविन्द-यशोविजयसूरिभ्य

श्री वाग्देव्यैः नमोऽस्तु

## श्री ज्ञानपञ्चमीस्तुतिः

(स्रग्धरा)

श्रीनेमिनाथपरमात्मनः पञ्चकल्याणकवर्णनात्मिकेयं स्तुतिः

श्रीनेमिः पञ्चरूपत्रिदशपतिकृतप्राज्यजन्माभिषेक

श्चञ्चत् पञ्चाक्षमत्तद्विरदमदभिदा-पञ्चवक्त्रोपमानः ॥

निर्मुक्तः पञ्चदेह्याः परमसुखमयः प्रास्तकर्मप्रपञ्चः ।

कल्याणं पञ्चमीसत्तपसि वितनुतां पञ्चमज्ञानवान् वः ॥

॥ १ ॥

अन्वय—पञ्चरूपत्रिदशपतिकृतप्राज्यजन्माभिषेकः, चञ्चत्-पञ्चाक्षमत्तद्विरदमदभिदापञ्चवक्त्रोपमानः, पञ्चमज्ञानवान्, प्रास्त-कर्मप्रपञ्चः, पञ्चदेह्याः निर्मुक्तः, परमसुखमयः, श्रीनेमिः वः पञ्चमीसत्तपसि कल्याणं वितनुताम् ।

### रम्यपदभञ्जिका—

श्रीनेमिरिति—'पञ्चरूपत्रिदशपतिकृतप्राज्यजन्माभिषेकः' पञ्च-रूपाणि स्वरूपाणि, वज्रोत्क्षेपकचामरवीजक-च्छत्रधारक-परमात्मग्राहक-रूपाणि आकारा वा यस्य तेन पञ्चस्वरूपेण, "रूपं तु श्लोक शब्दयोः ॥ पशवाकारे सौन्दर्ये, नाणके नाटकादिके ॥ २९३ ॥ ग्रन्थावृत्तौ स्वभावे च.... इत्यनेकार्थः (२। २९४)। त्रिदशपतिना सुरेन्द्रेण, तिस्रः

दशाः अवस्थाः जन्म-कौमार्य-मृत्युरूपाः येषां, "त्रिदशा अमर्त्याः स्वाहा—स्वधाक्रतु-सुधाभुज आदितेयाः" इति हैमः (२। ८८)। तेषां पत्या स्वामिना, "पतीन्द्र स्वामि-नाथार्याः प्रभु—र्भर्तेश्वरो विभुः ईशितेनो नायकाश्च"—इति हैमः (२। ३५९)। कृतः विहितः "डुकुंञ् करणे" (४४४) कृ—धातोः कर्मण्यर्थे 'तत्साप्यानाप्यात्०' (सि. ३।३।२१) इति विहितः 'क्त-क्तवतू' (सि. ५।१।१७४) इत्यनेन च क्त-प्रत्ययो भूतः। प्राज्यः अतिशयः प्रभूतो वा, 'प्राज्यं—प्रभूतं—प्रचुरं-बहुलं-बहु-पुष्कलम् ॥ भूयिष्ठं—पुरुहं भूयो भूयो दभ्रं पुरु—स्फिरम्' इति हैमः (६।६१।६२)। जन्माभिषेकः जन्मनि जननवेलायां क्रियमाणो यो अभिषेकः स्नानक्रियाविशेषो यस्य सः। एतदखिलं पदं श्रीनेमिरित्यस्य विशेषणं ज्ञेयम्। 'चञ्चत्-पञ्चाक्ष-मत्त-द्विरद-मद-भिदा-पञ्चवक्त्रोपमानः' चञ्चत्—चञ्चलम् अस्थिरं वा पञ्चाक्षम्—पञ्चानाम् अक्षाणाम् इन्द्रियाणां समाहारः ....पञ्चहृषीकमिति "अक्षं सौवर्चले तुरये हृषीके स्याद्" इत्यनेकार्थः (२५४४)। तदेव मत्तः माद्यतीति मत्तः 'गत्यर्थाऽकर्मक०' (सि. ५।१।११)...क्त 'डीयश्व्यैदितः' (४।४।६१)....इडभावश्च, व्याकुलः सन् व्याकुलीकुर्वन् "शौण्डो मत्ते च विख्याते पिप्पल्यां च भवेत् स्त्रियाम्" इति विश्वः। तादृशो यो द्विरदः द्वौ रदौ दन्तौ यस्य तस्य हस्तिनः गजराजस्य वा, 'स्तम्बेरम द्विरद—सिन्धुर—नाग—दन्तिनो....इत्यादि हैमः (४।२८३)। भिदायां भेदने द्वैधीकरणे वा, भिद्यते अनयेति भिदा 'भिदादयः' (सि. ५।३।१०८) ...अङ्, स्त्रिय आप् च, अपाकरणमित्यर्थः, तस्यां पञ्चवक्त्रस्य पञ्च वक्त्राणि मुखानि यस्य सिंहस्य 'मुखेन

पादैश्च योद्धृत्वादस्य पञ्चवक्त्र इत्यभिधानं प्रसिद्धमिति यद्वा 'पचुण् विस्तारे' पच्यते इति पञ्चम्, पञ्चं विस्तृतं वक्त्रम् आननं यस्य पञ्चवक्त्र इत्यपि व्युत्पत्तिरभिधाने तस्य उपमानं तुल्यता यस्य सः 'भावाऽकर्त्रोः' (सि. ५।३।१८)...घञ्। 'पञ्चमज्ञानवान्' केवलज्ञानी, पञ्चानां पूरणम् पञ्चमम् केवलनामकं ज्ञानं ज्ञप्ति यस्य। 'प्रास्तकर्मप्रपञ्चः' प्रकर्षेण पुनः अनुद्भवत्वेन अस्तो ध्वस्तः प्रणाशितो वा, कर्मणाम् ज्ञानावरणीय—दर्शनावरणीय-वेदनीय-मोहनीयायुर्नाम—गोत्रान्तराय—लक्षणानाम् अष्टविधकर्मणां प्रपञ्चो विस्तारो येन। 'प्रपञ्चो निप्रलम्भने ॥ १२९ ॥ विस्तारे सञ्चये चापि' इत्यनेकार्थः (३।१३०)। यदि कर्मसञ्चयो मूलतो विनष्टस्तर्हि तज्जन्य—शरीराद्युपाधिरपि कुतः संभवेद्? अत एवोक्तम् 'पञ्चदेहाः निर्मुक्तः' पञ्चशरीरात् संत्यक्तः पञ्चानां देहानां कायानां समाहारः—पञ्चदेही—पञ्चशरीरमित्यर्थः। द्विगुकर्मधारयस्तत्पश्चात् 'द्विगोः समाहारात्' (सि. २।४।२२)....ङी, तस्याः पञ्चकायसम्बन्धात् निर्मुक्तः दूरीकृतः।

श्रीनेमिनाथप्रभुणा औदारिकवैक्रियाहारकतैजसकार्मणलक्षण—पञ्चशरीराणि विमुक्तानि तत्प्रभवस्थान—नामकर्मणः क्षपितत्वादित्यर्थः। एतद्विशेषणद्वयस्य अनुरूपमेव तृतीयं निम्नलिखितविशेषणमवबोध्यम्। दुःखस्वरूपं यदि किञ्चित् तदा देहा एव, यदि कर्माण्येव न विद्यन्ते तर्हि देहा कुतः? यदि च देहा न सन्ति तर्हि दुःखस्य का वार्ता? अत एवाग्रे उवाच हि 'परमसुखमयः' परमं श्रेष्ठम् उच्चतमं वा प्रचुरं सुखमाह्लादश्चित्तप्रसन्नता वा यस्य यस्मिन् वा "प्रकृते मयट्" (सि. ७।३।१)....मयट्। 'श्रीनेमिः' श्रिया लक्ष्म्या, 'श्री लक्ष्म्यां सरलद्रवे, ॥ १२ ॥ वेषोपकरणे वेषरचनायां मतौ गिरि। शोभा त्रिवर्गसंपत्योः....'

इत्यनेकार्थः ( १।१२।१३ ) । राज्यभोग–सुखादिक–बाह्यया चतुस्त्रिंशदतिशयाष्टमहाप्रातिहार्यात्मिकाभ्यन्तरया च शोभया युक्तः नेमिः अरिष्टनेमिः द्वाविंशस्तीर्थपतिरितियावत् । 'अरिष्टनेमिस्तु नेमिः' इति हैमः ( १।३० ) । 'वः' युष्माकम् । 'पञ्चमीसत्तपसि' पञ्चम्याः तन्नामपर्वणः सति शोभने तपसि धर्मानुष्ठानविशेषे । 'तपो लोकान्तरेऽपि च ॥ चान्द्रायणादौ धर्मे च पुमान् शिशिरमाघयोः' इति मेदिनी (१७१।२४) । 'कल्याणं' मङ्गलं कुशलं वा । 'कल्याणं हेम्नि मङ्गले' इत्यनेकार्थः ( ३।१८६ ) । 'वितनुताम्' विस्तारयतु विकिरतु वा ।

स्तुति-पद-द्वारेण परमात्मनः पञ्चकल्याणकघटना—अवतरणं विना प्रभोः जननं कुतः ? अत एव जन्मान्तर्गतमेव च्यवनकल्याणकमवबोध्यम् । अथ 'पञ्चरूपत्रिदशपति....जन्माभिषेकः' इति पदेन देवाधिदेवस्य जन्मकल्याणकमवगम्यम् । संयममृते सम्पूर्णतया पञ्चेन्द्रिय-निगृहो दुष्करोऽत एव.... 'चञ्चत्पञ्चाक्षमत्त.... पञ्चवक्त्रोपमानः' इति पदं दीक्षाकल्याणकवाचकमिति । लोकालोकप्रकाशककेवलज्ञानोत्पत्तिश्च तुर्यकल्याणकम्–तत्तु 'पञ्चमज्ञानवान्' इत्येतेन पदेनावगम्यम् । अथ घात्यघाति–कर्मक्षयेणैव पञ्चकायविनाशस्तेनैव च परमसुखप्राप्ति र्भवति अत उक्तम् अखिलं तृतीयचरणम् 'निर्मुक्तः पञ्चदेह्याःपरमसुखमयः प्रास्तकर्मप्रपञ्चः' इति लक्षणम्....तदेव निर्वाणावाप्तिरूपं–पञ्चमकल्याणकं गमयतीति पाञ्चकल्याणकिकी भावना ।....

अस्यां स्तुतौ स्रग्धराच्छन्दः म्रभ्नैर्यानां त्रयेण त्रिमुनियुतियुता स्रग्धरा कीर्तितेयम् ॥ इति वृत्तरत्नाकरे ।

**અર્થ**—પાંચ રૂપદ્વારા ઇન્દ્રવડે કરાયો છે મોટો જન્માભિષેક જેનો તેવા, ચંચલ ( વિલાસ કરતી ) પાંચ ઇન્દ્રિયોરૂપી મહોન્મત્ત હાથીના મદને ભેદવામાં સિંહની ઉપમાવાળા, પાંચ ( પ્રકારના )

દેહથી સંપૂર્ણ પણે મુક્ત થયેલ, અતિશય રીતે દૂર કરાયો છે (નાશ કરાયો છે) કર્મને વિસ્તાર જેના વડે એવા, (અને તેથી જ) અત્યંત શ્રેષ્ઠ સુખવાળા અને પાંચમા જ્ઞાનવાળા શ્રી નેમિનાથ પ્રભુ તમારા પંચમીના સુંદર તપને વિષે કલ્યાણનો વિસ્તાર કરો...

**समास—**

**श्रीनेमिः—**श्रिया युक्तः—श्रीयुक्तः, ( तृ. त. पु. ) श्रीयुक्तः नेमिः—श्रीनेमिः । ( म. प. लो. क. )

**पञ्चरूपत्रिदशपतिकृतप्राज्यजन्माभिषेकः—**पञ्चानां रूपाणां समाहारः—पञ्चरूपम्, ( द्विगु. क. ) तिस्रः दशा येषां ते—त्रिदशाः, ( स. ब. व्री. ) त्रिदशानां पतिः—त्रिदशपतिः, ( ष. त. पु. ) जन्मनि कृतः—जन्मकृतः, 'क्तेन' ३।१।९२... ( स. त. पुं. ) जन्मकृतः अभिषेकः—जन्माभिषेकः, ( म. प. लो. क. ) प्राज्यः जन्माभिषेकः—प्राज्यजन्माभिषेकः, ( वि. पू. क. ) त्रिदशपतिना कृतः—त्रिदशपतिकृतः, ( तृ. त. पु. ) त्रिदशपतिकृतः प्राज्यजन्माभिषेकः—त्रिदशपतिकृतप्राज्यजन्माभिषेकः, ( वि. पू. क. ) पञ्चरूपेण त्रिदशपतिकृतप्राज्यजन्माभिषेकः यस्य सः—पञ्चरूपत्रिदशपतिकृतप्राज्यजन्माभिषेकः । ( व्य. ब. व्री. )

**चञ्चत्पञ्चाक्षमत्तद्विरदमदभिदापञ्चवक्त्रोपमानः —** पञ्चानाम् अक्षाणाम् समाहारः—पञ्चाक्षम्, (द्विगु.क.) चञ्चत् च तद् पञ्चाक्षम् च—चञ्चत्पञ्चाक्षम्, ( वि. पू. क. ) द्वौ रदौ यस्य सः—द्विरदः, ( स. ब. व्री. ) मत्तः द्विरदः—मत्तद्विरदः, (वि.पू.क.) चञ्चत्पञ्चाक्षम् एव मत्तद्विरदः—चञ्चत्पञ्चाक्षमत्तद्विरदः, (अव. पू.क.) चञ्चत्पञ्चाक्षमत्तद्विरदस्य मदः—चञ्चत्पञ्चाक्षमत्तद्विरदमदः, ( ष. त. पु. ) चञ्चत्पञ्चाक्षमत्तद्विरदमदस्य भिदा—चञ्चत्पञ्चाक्षमत्तद्विरदमदभिदा, 'कृति' ३।१।७७ ( ष. त. पु. ) पञ्च

वक्त्राणि यस्य सः–पञ्चवक्त्रः, ( स. ब. व्री. ) पञ्चवक्त्रस्य उपमानं–पञ्चवक्त्रोपमानम्, (ष.त. पु.) चञ्चत्पञ्चाक्षमत्तद्विरदमदभिदायां पञ्चवक्त्रोपमानं यस्यः सः–चञ्चत्पञ्चाक्षमत्तद्विरदमदभिदापञ्चवक्त्रोपमानः । ( व्य. ब. व्री. )

**निर्मुक्तः**—निःशेषेण मुक्तः–निर्मुक्तः । ( गति. त. पु. )

**पञ्चदेह्याः**—पञ्चानां देहानां समाहारः–पञ्चदेही, तस्याः–पञ्चदेह्याः । ( द्विगु. क. )

**परमसुखमयः**—परमं च तद् सुखं च–परमसुखम्, 'सन्महत्०' ३।१।१०७....( वि. पू. क. ) परमसुखं प्रचुरं यस्मिन् सः–परमसुखमयः ।

**प्रास्तकर्मप्रपञ्चः**—कर्मणां प्रपञ्चः–कर्मप्रपञ्चः, ( ष. त. पु. ) प्रकर्षेण अस्तः–प्रास्तः, ( गति. त. पु. ) प्रास्तः कर्मप्रपञ्चः येन सः–प्रास्तकर्मप्रपञ्चः । ( स. ब. व्री. )

**पञ्चमीसत्तपसि**—सच्च तद् तपश्च–सत्तपः, 'सन्महत्०' ३।१।१०७ ( वि. पू. क. ) पञ्चम्याः सत्तपः–पञ्चमीसत्तपः, तस्मिन्–पञ्चमीसत्तपसि । ( ष. त. पु. )

**पञ्चमज्ञानवान्**—पञ्चानां पूरणम्–पञ्चमम्, 'नो मट्' ७।१।१५९....मट्, पञ्चमं ज्ञानं–पञ्चमज्ञानम्, ( वि. पू. क. ) पञ्चमज्ञानमस्ति यस्य–पञ्चमज्ञानवान् । 'तदस्या०' ७।२।१...मतु ।

वीतराग-विसरो विधुवदिति विवेविच्यते....

**संप्रीणन् सच्चकोरान् शिवतिलकसमः**
**कौशिकानन्द(न्दि)मूर्तिः,**
**पुण्याब्धि-प्रीतिदायी सितरुचिरिव यः**
**स्वीयगोभिस्तमांसि ।**

सान्द्राणि ध्वंसमानः सकलकुवलयोल्ला-
समुच्चैश्चकार,

ज्ञानं पुष्याज्जिनौघः स तपसि भविनां
पञ्चमीवासरस्य ॥ २ ॥

अन्वयः—यः ( जिनौघः ) सितरुचिः इव सच्चकोरान् सम्प्रीणन् शिवतिलकसमः, कौशिकानन्द-( न्दि )मूर्तिः, पुण्याब्धि-प्रीतिदायी, स्वीयगोभिः सान्द्राणि तमांसि ध्वंसमानः, सकलकुवलयोल्लासम् उच्चैश्चकार सः जिनौघः भविनां पञ्चमीवासरस्य तपसि ज्ञानं पुष्यात् ।

संप्रीणन्निति—'यः' निम्नोक्तस्वरूपी जिनौघः, 'सितरुचिः' सिता श्वेता शुक्ला वा रुचिः कान्ति र्यस्य चन्द्रमाः इव शशिवदित्यर्थः । कया रीत्या? 'सच्चकोरान्' चन्द्रपक्षे—सतः शोभनांश्चकोरान् प्रियचन्द्रचन्द्रिकान्—तन्नामकपक्षिविशेषान् वा । जिनौघपक्षे—सतः सज्जनान् एव चकोरान् " सन् साधौ धीर-शस्तयोः । मान्ये सत्ये विद्यमाने त्रिषु साध्व्युभयोः स्त्रियाम् " इति मेदिनी ( ५९।६८–६९ ) । 'संप्रीणन्' समाह्लादयन् । पुनः किंभूतः? 'शिवतिलकसमः' शशिपक्षे—शिवस्य महादेवस्य, जिनजातपक्षे तु शिवस्य मोक्षस्य, तिलकेन ललाटभूषणेन समस्तुल्यः । " शिवो योगान्तरे वेदे गुग्गुलौ वालुके हरे । पुण्डरीक–द्रुमे कीले " इत्यनेकार्थः (२।५२६) । " तिलकोऽश्वद्रुमभिदोः पुण्ड्रके तिलकालके " ॥ ४५ ॥ इत्यनेकार्थः ( ३।४५ ) । हरस्य जटाया उपरिष्टाच्चन्द्रस्तिलक इव प्रतिभातीत्यतः, सिद्धभगवन्तः तु सिद्धशिलायां लोकाग्रभागे स्थितत्वात् शिवतिलकसमः इति यथार्थम् । अथ किं लक्षणः? 'कौशिकानन्द ( न्दि )मूर्तिः' शितांशुपक्षे—कौशिकाः घूकाः तन्ना-

मकपक्षिविशेषाः वा, विभुव्रजपक्षे तु–कौशिका इन्द्राः " कौशिक-शक्रघूकयोः " ॥ २८ ॥ इत्यनेकार्थः ( ३।२८ )। तान् आनन्दयतीत्येवंशीला ( आनन्दिनी )मूर्तिः प्रतिकृतिः स्वरूपं वा यस्य। 'मूर्तिः पुनः प्रतिमायां काय–काठिन्ययोरपि ' इत्यनेकार्थः ( २/१८५ )। 'कौशिकानन्दमूर्तिः' इत्यपि पाठोऽस्ति तद्वृत्तिस्त्वेवम्–कौशिकानां निराटानां शक्राणां च आनन्दा मूर्ति यस्येत्यन्वयः। अपि चैष कीदृशः ? पुण्याब्धिप्रीतिदायी ' विभाकरपक्षे–पुण्यस्य पवित्रस्य अब्धेः ( आपः धीयन्ते यत्र तस्य) समुद्रस्य, प्रभुपङ्क्तिपक्षे तु–पुण्यं 'पुणत् शुभे' (१३-६९ ) पुणतीति पुणः ' नाम्युपान्त्य० ' ( सि. ५।१।५४ ) इति कः, तत्र साधुः " तत्र साधौ " ( सि. ७।१।१५ ) इति यः सुकृतं शुभकर्म वा, " पुण्यं तु सुन्दरे । सुकृते पावने धर्मे " इत्यनेकार्थः। (२।३६२) तदेव अब्धिः सागरस्तस्य प्रीतिम् आनन्दं ददाति यच्छतीत्येवंशीलः। पुनश्च किं विशिष्टः ? 'स्वीयगोभिः सान्द्राणि तमांसि ध्वंसमानः 'रजनीपतिपक्षे–स्वीयस्य निजस्य गोभिः किरणैः जिनौघपक्षे–स्वीयस्य आत्मीयस्य गोभिः वाणीभिः सान्द्राणि निरन्तराणि ( जनानां ) तमांसि अन्धकाराणि पापानि अज्ञानानि वा ध्वंसमानः दूरीकुर्वन् विनाशयन्नित्यर्थः। " गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान् । स्त्री सौरभेयी दृग्बाणदिग्वाग्भूष्वप्सु भूम्नि च। इति विश्वमेदिन्यौ ( २५।१ ) ' तमो राहौ गुणे पापे ध्वान्ते " इत्यनेकार्थः ( २।५६८)। स तु कीदृग् ? ' सकलकुवलयोल्लासम् ' सकलानि समस्तानि कुवलयानि ( कोः पृथ्व्याः वलयानि कङ्क-

णानि इव शोभाकरत्वात्) कुमुदानि चन्द्रविकासिकमलानि वा तेषाम् जिनव्रजपक्षे तु सकलं कोः मह्याः वलयं मण्डलम् तस्य "कुर्वसुमती मही" इति हैमः (९३६)। उल्लासं विकासनं प्रमोदं वा उच्चैश्चकार अतिशयेनावर्धयत् वृद्धिकृतवान् वा। सः 'जिनौघः' जिनानां रागद्वेषजेतृत्वात् वीतरागाणाम् ओघः ऊह्यते वहति वा ओघः, 'न्यङ्कूद्गमेघादयः' (सि. ४।१।११२) इति साधुः, जिनसमूहः। 'ओघो वेगे जलस्य च। वृन्दे परम्परायां द्रुतनृत्योपदेशयोः' इति मेदिनी (२६।२–३)। 'भविनां' भवः संसारोऽस्ति येषां तेषां भावुकानां संसारिजीवानां वा। 'तपसि' अनुष्ठानविशेषे,। 'ज्ञानं' प्रबोधं। 'पुष्यात्' पुष्टिं कुर्यात्।

અર્થ—જેણે (જિનેશ્વર ભગવંતના સમૂહે) (ચંદ્રની જેમ ચન્દ્રપક્ષે–સુંદર ચકોર પક્ષીઓને ખુશ કરતો, મહાદેવના તિલક સરખો, ધ્રુવને આનંદ આપવાના સ્વરૂપવાળો, પવિત્ર સમુદ્રને પ્રીતિ આપવાના સ્વભાવવાળો, પોતાના કિરણોથી ગાઢ અંધકારનો નાશ કરતો, સમસ્ત ચંદ્રવિકાશી કમલોના ઉલ્લાસને પ્રબલ કર્યો છે એવા) ચંદ્રની જેમ સજ્જનોરૂપી ચકોરને પ્રમુદિત કરતો, મોક્ષને વિષે તિલક સમાન, ઈન્દ્રને આનંદ આપવાના સ્વભાવવાળુ સ્વરૂપ છે જેનું એવો, સુકૃતરૂપી સમુદ્રને હર્ષ આપનાર, પોતાની વાણીવડે નિબિડ પાપોનો નાશ કરતો, સમસ્ત પૃથ્વીમંડલને વિષે ઉલ્લાસને પ્રબલ કર્યો છે એવો તે જિનેશ્વરદેવનો સમૂહ પ્રાણીઓનાં પાંચમનાં તપને વિષે જ્ઞાનને પુષ્ટ કરો...

**समास—चन्द्रपक्षे–**

**सच्चकोरान्**—सन्तश्चामी चकोराश्च–सच्चकोराः, तान्–सच्चकोरान्। 'सन्महत्०' ३।१।१०७ (वि. पू. क.)

**शिवतिलकसम :**—तिलकेन समः–तिलकसमः, 'ऊनार्थ०' ३।१।६७ (तृ. त. पु.) **अथवा**—तिलकस्य समः–तिलकसमः, (ष. त. पु.) शिवस्य तिलकसमः–शिवतिलकसमः । (ष. त. पु.)

**कौशिकानन्दिमूर्तिः**—आनन्दयतीत्येवंशीला-आनन्दिनी, कौशिकानाम् आनन्दिनी–कौशिकानन्दिनी, (ष. त. पु.) कौशिकानन्दिनी मूर्तिः यस्य सः–कौशिकानन्दिमूर्तिः । (स. ब. व्री.)

**पुण्याब्धिप्रीतिदायी**—आपः धीयन्ते यस्मिन्–अब्धिः, 'व्याप्यादाधारे:' ५।३।८८...कि, (उप. त. पु.) पुण्यश्चासौ अब्धिश्च–पुण्याब्धिः, (वि. पू. क.) प्रीतिं ददातीत्येवंशीलः–प्रीतिदायी, (उप. त. पु.) 'अजातेः शीले' ५।१।१५४...णिन्, पुण्याब्धेः प्रीतिदायी–पुण्याब्धिप्रीतिदायी । (ष. त. पु.)

**स्वीयगोभिः**—स्वस्य इमाः–स्वीयाः, 'तस्येदम्' ६।३।१६० ना सूचनर्थी 'दोरीयः' ६।३।३२....ईय, स्वीयाश्चामी गावश्च–स्वीयगावः, तैः–स्वीयगोभिः । (वि. पू. क.)

**सकलकुवलयोल्लासम्**—सकलानि च तानि कुवलयानि च–सकलकुवलयानि, (वि. पू. क.) सकलकुवलयानाम् उल्लासः–सकलकुवलयोल्लासः, तम्–सकलकुवलयोल्लासम् । (ष. त. पु.)

**जिनौघपक्षे सच्चकोरान्**—सन्तः एव चकोराः–सच्चकोराः, तान्–सच्चकोरान् । (अव. पू. क.)

**शिवतिलकसमः**—तिलकस्य समः–तिलकसमः, (ष. त. पु.) शिवस्य तिलकसमः—शिवतिलकसमः । (ष. त. पु.)

**कौशिकानन्दिमूर्तिः**—कौशिकानाम् आनन्दिनी–कौशिकानन्दिनी, (ष. त. पु.) कौशिकानन्दिनी मूर्तिः यस्य सः–कौशिकानन्दिमूर्तिः । (स. ब. व्री.)

**पुण्याब्धिप्रीतिदायी**–पुण्यम् एव अब्धिः–पुण्याब्धिः, (अव.पू.क.) प्रीतिं ददातीत्येवंशीलः–प्रीतिदायी, ( उप. त. पु. ) पुण्याब्धेः प्रीतिदायी –पुण्याब्धिप्रीतिदायी । ( ष. त. पु. )

**सितरुचि** :—सिता रुचिः यस्य सः–सितरुचिः । ( स. ब. व्री )

**स्वीयगोभि** :—स्वस्य इमाः–स्वीयाः, स्वीयाः गावः– स्वीयगावः, ताभिः–स्वीयगोभिः । ( वि. पू. क. )

**सकलकुवलयोल्लासम्**—कोः वलयम्–कुवलयम्, ( ष. त. पु. ) सकलं कुवलयं–सकलकुवलयम्, ( वि. पू. क. ) सकलकुवलयस्य उल्लासः– सकलकुवलयोल्लासः, तम्–सकलकुवलयोल्लासम् । ( ष. त. पु. )

**जिनौघ** :—जिनानाम् ओघः–जिनौघः । ( ष. त. पु. )

**पञ्चमीवासरस्य**—पञ्चम्याः वासरम्–पञ्चमीवासरम्, तस्य– पञ्चमीवासरस्य । ( ष. त. पु. )

**નોંધ**—કોઈક પુસ્તિકામાં પ્રથમ ચરણનું અન્વયપદ "कौशिका-नन्दिमूर्तिः"ને સ્થાને "कौशिकानन्दमूर्तिः"એ પ્રમાણે પાઠ પણ છે ત્યાં અર્થ તો સરખો જ રહેશે પણ સમાસમાં અલ્પ તફાવત પડે છે તે આ પ્રમાણે– कौशिकानन्दमूर्तिः–आनन्दयतीति-आनन्दा ( आ+ नन्द्+अच्+आप् ) 'अच्' ५।१।४९....अच् । कौशिकानाम् आनन्दा– कौशिकानन्दा । ( ष. त. पु. ) कौशिकानन्दा मूर्तिः यस्य सः–कौशिका-नन्दमूर्तिः । ( स. ब. व्री. )

अथ जिनागमं पीयूषसमोपमीकुर्वन्नाह—

पीत्वा नानाभि(वि)धार्थाऽमृतरसमसमं
यान्ति यास्यन्ति जग्मु-
र्जीवा यस्मादनेके विधिवदमरतां
प्राज्यनिर्वाणपुर्याम् ॥
यात्वा देवाधिदेवागमदशमसुधाकुण्डमानन्दहेतु-
स्तत् पञ्चम्यास्तपस्युद्यतविशदधियां
भाविनामस्तु नित्यम् ॥ ३ ॥

अन्वय—यस्माद् अनेके जीवाः असमं नानाभि-( वि )-धार्थाऽमृतरसं विधिवत् पीत्वा प्राज्यनिर्वाणपुर्यां यात्वा अमरतां जग्मुः यान्ति यास्यन्ति तत् देवाधिदेवागमदशमसुधाकुण्डं पञ्चम्याः तपसि उद्यतविशदधियां भाविनां नित्यम् आनन्दहेतुः अस्तु ।

पीत्वेति....'यस्माद्' जिनप्रणीतसिद्धान्ताद्। 'अनेके' न एके अपि तु बहवः, 'जीवाः' संसारिणः, "जीवः स्यात्त्रिदशाचार्ये, द्रुमभेदे शरीरिणि। जीवितेऽपि च" इत्यनेकार्थः (२।५१०)। 'असमम्' न विद्यते समस्तुल्यो यस्य तम् अद्वितीयमसाधारणं वा । 'नानाभि-( वि )धार्थामृतरसम्' नाना बहुप्रकारा विविधा वा, "नाना विनोभयानेकार्थेषु" इत्यनेकार्थः ( ७।३२ ) । अभिधा नामधेयानि येषां त[ेऽर्था] वाच्या विषया वा "अर्थो हेतौ प्रयोजने ॥ २०८ ॥ निवृतौ विष[ये] वाच्ये प्रकार द्रव्य-वस्तुषु" इत्यनेकार्थः (२।२०८।९)। यद्वा न[ा]ना अनेके विधाः प्रकाराः येषां तेऽर्थाः, त एवामृतस्य सुधाया "अमृतं यज्ञशेषेऽम्बु—सुधा-मोक्षे—ष्वयाचिते इत्यनेकार्थः ( २।२२[.] )। रसः आस्वादः तम् ।

'विधिवत्' विधिना इव आगमोक्तरीत्येत्यर्थः । 'पीत्वा' पानं कृत्वा आचम्य वा । 'प्राज्यनिर्वाणपुर्याम्' प्राज्यायां महत्यां निर्वाणस्य शर्मणः मोक्षस्य वा, पुर्यां नगर्याम् । 'यात्वा' गत्वा प्राप्य वा । 'अमरताम्' म्रियते इति मरः मृत्युः न मरः अमरः मृत्यभावस्तस्य भावोऽमरता मृत्युरहितता ताम् । 'जग्मुः' प्राप्नुवन् "गत्यर्थाः प्राप्त्यर्थाः" इति वचनात् गम्धातुः प्रापणार्थोऽत्र बोध्यः । 'यान्ति' प्राप्नुवन्ति । 'यास्यन्ति' प्राप्स्यन्ति । 'तत्' पूर्वोक्तामृतरसभृतम् । 'देवाधिदेवागमदशमसुधाकुण्डम्' देवाधिदेवेन हरिहरादिदेवानाम् अधिकः उत्कृष्टः देवस्तेन अधिदेवेन तीर्थकृद्भगवता प्रोक्तो य आगमः सिद्धान्तः समयो वा "आगमस्त्वागतौ शास्त्रे" इत्यनेकार्थः ( ३।४५३ ) । स एव दशमं नवामृतरसस्य कुण्डानि पाताले प्राक् प्रकटितानि इति श्रुतिः अत एव एतच्छास्त्रं दशमसुधाकुण्डमिति कथितम् । सुधायाः अमृतस्य कुण्डम् द्रहविशेषः जलाधारो वा । 'पञ्चम्याः' तत्पर्वविशेषस्य । 'तपसि' अनुष्ठानविशेषे । 'उद्यतविशदधियाम्' उद्यता तत्परा तपस्करणशीला वा, विशदा निर्मला धी मति येषां तेषां । "विशदः शुचिः," इति हैमः ( ६।२८ ) ।" "बुद्धिर्मनीषा धीषणा धीः प्रज्ञा शेमुषी मतिः ।" इत्यमरः (१।५।१) । 'भाविनाम्' भावुकानां भव्यजीवानां वा । 'नित्यम्' सततं निरन्तरं वा । 'आनन्दहेतुः' आनन्दस्य प्रमोदस्य हर्षस्य वा, हेतुः कारणम् । "निमित्ते कारणं हेतुः बीजं योनि र्निबन्धनम् ॥ १४९ ॥ निदानम्" इति हैमः (६।१४९) । 'अस्तु' भवतु भूयाद् वा ।

**અર્થ**—જેમાંથી અનેક જીવો અસાધારણ એવા વિવિધ પ્રકારના અર્થરૂપી અમૃતરસનું વિધિપૂર્વક પાન કરીને મહાન્ મુક્તિનગરીને વિષે જઈને અમરતાને પ્રાપ્ત કરી છે પ્રાપ્ત કરે છે અને પ્રાપ્ત કરશે તે દેવાધિદેવના આગમરૂપી દશમો અમૃતકુંડ પંચમીના તપને વિષે તત્પર થયેલી નિર્મલબુદ્ધિવાળા ભવ્યજનોને હંમેશા આનંદના હેતુભૂત થાઓ...

**समास**—

**नानाविधार्थामृतरसम्**—नाना विधाः येषां ते—नानाविधाः, ( स. ब. व्री. ) नानाविधाश्चामी अर्थाश्च—नानाविधार्थाः, ( वि. पू. क. ) अमृतस्य रसः—अमृतरसः, ( ष. त. पु. ) नानाविधार्था एव अमृतरसः—नानाविधार्थामृतरसः, तम्—नानाविधार्थामृतरसम्। ( अव. पू. क. )

**असमम्**—न समः—असमः, तम्—असमम्। ( न. त. पु. )

**अनेके**—न एके—अनेके। ( न. त. पु. )

**प्राज्यनिर्वाणपुर्याम्**—निर्वाणस्य पुरी—निर्वाणपुरी, ( ष. त. पु. ) प्राज्या निर्वाणपुरी—प्राज्यनिर्वाणपुरी, तस्याम्—प्राज्यनिर्वाणपुर्याम्। (वि. पू. क.)

**देवाधिदेवागमदशमसुधाकुण्डम्** — अधिकः देवः — अधिदेवः, ( प्रा. त. पु. ) देवेषु अधिदेवः—देवाधिदेवः, ( स. त. पु. ) देवाधिदेवस्य आगमः—देवाधिदेवागमः, (ष. त. पु.) यद्वा देवाधिदेवेन प्ररूपितः—देवाधिदेवप्ररूपितः, ( तृ. त. पु. ) देवाधिदेवप्ररूपितश्चासौ आगमश्च—देवाधिदेवागमः, ( म. प. लो. क. ) सुधायाः कुण्डम्-सुधाकुण्डम्, ( ष. त. पु. ) दशानां पूरणम्—दशमम्, 'नो मट्' ७।१।१५९.... मट्, दशमं च तद् सुधाकुण्डं च—दशमसुधाकुण्डम्, ( वि. पू. क. ) देवाधिदेवागमः एव दशमसुधाकुण्डम्—देवाधिदेवागमदशमसुधाकुण्डम्। ( अव. पू. क. )

आनन्दहेतुः—आनन्दस्य हेतुः—आनन्दहेतुः। (ष. त. पु.)

उद्यतविशदधियाम्—उद्यता विशदा धियः येषां ते—उद्यतविशदधियः, तेषाम्—उद्यतविशदधियाम्। (स. ब. ब. व्री.)

नोंध—'नानाभिधार्थामृतरसम्' એ પ્રમાણે પણ પાઠ છે. नाना अभिधा येषां ते-नानाभिधाः। अभिधा=નામ-વિવિધપ્રકારના નામવાળા અર્થોરૂપી અમૃતરસ...

श्रीनेमिनाथचरणसेविकाऽम्बिकादेव्यै प्रार्थना....

स्वर्णाऽलङ्कारवल्गन्मणिकिरणगणध्वस्तनित्यान्धकारा,
हुङ्काराराववदूरीकृतसुकृतिजनव्रातविघ्नप्रचारा ।
देवी श्रीअम्बिकाख्या जिनवरचरणाम्भोजभृङ्गीसमाना
पञ्चम्यह्नस्तपोऽर्थं वितरतु कुशलं धीमतां सावधाना
॥ ४ ॥

अन्वय—स्वर्णालङ्कारवल्गन्मणिकिरणगणध्वस्तनित्यान्धकारा, हुङ्काराराववदूरीकृतसुकृतिजनाव्रातविघ्नप्रचारा, जिनवरचरणाम्भोजभृङ्गीसमाना, सावधाना, श्रीअम्बिकाख्या देवी धीमतां पञ्चम्यह्नः तपोऽर्थं कुशलं वितरतु...

स्वर्णेति.... 'स्वर्णालङ्कारवल्गन्मणिकिरणगणध्वस्तनित्यान्धकारा' स्वर्णस्य सुवर्णस्य तन्नामोत्तमधातुविशेषस्य वा, "स्वर्णं-हेम-हिरण्य-हाटक-वसून्यष्टापदं काञ्चनं कल्याणं कनकं महारजतगाङ्गेयरुक्म ॥ १०९ ॥ इति हैमः (४।१०९)। अलङ्कारेषु अलङ्क्रियन्ते एभिः अलङ्काराः कटककेयूरादयस्तेषु आभरणेषु वल्गन्तः विलसन्तः ये मणयः रत्नानि "मणिस्त्वजागलस्तने

॥ १४८ ॥ मेढ्राग्रेऽलिञ्जरे रत्ने" इत्यनेकार्थः । (२।१४८) ॥ १४८ ॥ तेषां किरणानाम् अंशूनां रश्मीनां वा गणेन समूहेन ध्वस्तं परास्तं दूरीकृतं वा नित्यं सततं बाढं वा अन्धकारं तमः यया सा... हेममयभूषणविराजद्रत्नांशुव्रजास्ततमाः इत्यर्थः । पुनरपि सा कीदृशी ? 'हुङ्काराराबदूरीकृतसुकृतिजनव्रातविघ्नप्रचारा' हुमेव...हुङ्कारः, "वर्णाऽव्ययात् स्वरूपे कारः" (सि. ७।२।१५६) तस्य तन्नामशब्दविशेषस्य आरावेण ध्वनिना "रवो नादः स्वनिर्घोषः संव्याङ्भ्यो राव आरवः" इति हैमः (६।३६) । दूरीकृतः प्रणाशितोऽपगमितो वा सुकृतिनां शोभनं कृतं कार्यमस्ति येषां तेषां पुण्यशालिनां धन्यानां वा "सुकृती पुण्यवान् धन्यः" इति हैमः (३।१५३) । जनानां लोकानां व्रातस्य समूहस्य "सन्दोहः समुदाय-राशिविसरव्राताः कलापो व्रजः" इति हैमः (६।४७) । ये विघ्ना उपद्रवाः तेषां प्रचारो विस्तारो यया सा ....हुं हुम् इति शब्देन पुण्यशालिजनगणस्य विघ्नविस्तारं विनाशिकेत्यर्थः । अपि स्या किं लक्षणा ? जिनवरचरणाम्भोजभृङ्गीसमाना' जिनेषु सामान्यकेवलिभगवत्सु वरः उत्तमः प्रधानो वा तीर्थकृद् अर्हन् वा तस्य श्रीनेमिनाथप्रभोः चरणौ पादौ एव अम्भसि जायेते स्म अम्भोजे कमले तयोः भृङ्गया भ्रमर्या समाना तुल्येतियावत्...यथा पुष्पपरागासक्ता भ्रमरी तथैव श्रीमन्नेमिनाथक्रमकजासक्तेयम् अम्बिकादेवीत्यर्थः । 'सावधाना' अवधानेन समाधानेन सह वर्तते या सा सावधाना समाधिसमेत्ता एकाग्रचित्ता वेत्यर्थः । 'श्रीअम्बिकाख्या' श्रिया शोभया ऐश्वर्येण वा युक्ता अम्बिका अम्बा

श्रीनेमिनाथार्हच्छाशनसेविका वा आख्या अभिधानं यस्याः सा। 'देवी' सुरी। तत्स्वरूपम् अत्रैव पुस्तके अष्टाशीतितमश्लोकात् (२२।४) ज्ञेयम्। 'धीमताम्' धीर्बुद्धिरस्ति येषां तेषां मतिमताम् प्रज्ञाशालिनां वा। 'पञ्चम्यह्नः' पञ्चमीवासरस्य। 'तपोऽर्थम्' तपसे विशिष्टाराधनाय इदम्। 'कुशलम्' क्षेमं भद्रं वा। 'वितरतु' प्रददातु विस्तारयतु वा।

**અર્થ**—સુવર્ણનાં આભૂષણોને વિષે વિલાસ કરતાં મણિઓનાં કિરણોનાં સમૂહવડે નાશ કરાયો છે સતત અંધકારનો જેણીવડે એવી, હુંકારના અવાજવડે દૂર કરાયા છે પુણ્યશાલીઓનાં સમૂહનાં વિઘ્નનાં પ્રચાર (વિસ્તાર) જેણીવડે એવી, જિનેશ્વરદેવનાં ચરણરૂપી કમલને વિષે ભ્રમરીસમાન એવી, શ્રીઅંબિકા નામની દેવી બુદ્ધિશાલીઓનાં પંચમીદિવસના તપને માટે કલ્યાણને આપો....

**समास—**

**स्वर्णालङ्कारवल्गन्मणिकिरणगणध्वस्तनित्यान्धकारा**— स्वर्णस्य अलङ्काराः–स्वर्णालङ्काराः, (ष.त.पु.) स्वर्णालङ्कारेषु वल्गन्तः–स्वर्णालङ्कारवल्गन्तः, (स.त.पु.) स्वर्णालङ्कारवल्गन्तः मणयः स्वर्णालङ्कारवल्गन्मणयः (वि.पू.क.) स्वर्णालङ्कारवल्गन्मणीनां किरणाः–स्वर्णालङ्कारवल्गन्मणिकिरणाः, (ष.त.पु.) स्वर्णालङ्कारवल्गन्मणिकिरणानां गणः–स्वर्णालङ्कारवल्गन्मणिकिरणगणः, (ष.त.पु.) स्वर्णालङ्कारवल्गन्मणिकिरणगणेन ध्वस्तम्–स्वर्णालङ्कारवल्गन्मणिकिरणगणध्वस्तम्, ( तृ. त. पु. ) स्वर्णालङ्कारवल्गन्मणिकिरणगणध्वस्तं नित्यम् अन्धकारं यया सा– स्वर्णालङ्कारवल्गन्मणिकिरणगणध्वस्तनित्यान्धकारा। ( स. ब. व्री. )

**हुङ्काराराववदूरीकृतसुकृतिजनव्रातविघ्नप्रचारा**— हुमेव–हुङ्कारः, हुङ्कारश्चासौ आरावश्च–हुङ्कारारावः, (वि. पू. क.) अदूरं दूरं क्रियते स्म-दूरीकृतः, (गति. त. पु.) हुङ्कारारावेण दूरीकृतः–हुङ्कारारावदूरीकृतः,

( तृ. त. पु. ) सुकृतमस्ति येषां—सुकृतिनः, अतोऽनेक०' ७।२।६.... इन्, सुकृतिनश्चामी जनाश्च—सुकृतिजनाः, ( वि. पू. क. ) सुकृतिजनानां व्रातः—सुकृतिजनव्रातः, ( ष. त. पु. ) विघ्नस्य प्रचारः—विघ्नप्रचारः, ( ष. त. पु. ) सुकृतिजनव्रातस्य विघ्नप्रचारः—सुकृतिजनव्रातविघ्नप्रचारः, ( ष. त. पु. ) हुङ्काराराववदूरीकृतः सुकृतिजनव्रातविघ्नप्रचारः यया सा—हुङ्काराराववदूरीकृतसुकृतिजनव्रातविघ्नप्रचारा । ( स. ब. व्री. )

**श्रीअम्बिकाख्या**—श्रिया युक्ता—श्रीयुक्ता, ( तृ. त. पु. ) श्रीयुक्ता अम्बिका—श्रीअम्बिका, ( म. प. लो. क. ) श्रीअम्बिका आख्या यस्याः सा—श्रीअम्बिकाख्या । ( स. ब. व्री. )

**जिनवरचरणाम्भोजभृङ्गीसमाना**—जिनेषु वरः—जिनवरः, (स.त.पु.) चरणे एव अम्भोजे—चरणाम्भोजे, ( अव. पू. क. ) जिनवरस्य चरणाम्भोजे जिनवरचरणाम्भोजे, (ष.त.पु.) भृङ्ग्याः समाना—भृङ्गीसमाना, (ष.त.पु.) जिनवरचरणाम्भोजयोः भृङ्गीसमाना—जिनवरचरणाम्भोजभृङ्गीसमाना ।(स.त.पु.)

**पञ्चम्यह्नः**—पञ्चम्याः अहः—पञ्चम्यहः, तस्य—पञ्चम्यह्नः । (ष.त.पु.)

**तपोऽर्थम् :**—तपसे इदम्—तपोऽर्थम्, तद्—तपोऽर्थम् । 'तदर्थाऽर्थेन' ३।१।७२ ....(च.त.पु.)

**सावधाना :**—अवधानेन सह वर्तते या सा—सावधाना । (सह.ब.व्री.)

## श्रीमौनएकादशीस्तुतिः

( स्रग्धरावृत्तम् । )

### अतिशयचतुष्कवर्णनात्मिकेयं स्तुतिः

**श्रीभाग् नेमिर्बभाषे जलशयसविधे स्फूर्तिमेकादशीयाम्,**
**माद्यन्मोहावनीन्द्रप्रशमनत्रिशिखः पञ्चबाणार्चिरर्णः ।**

मिथ्यात्वध्वान्तवान्तौ रविकरनिकरस्तीव्रलोभाद्रिवज्रम्,
श्रेयस्तत्पर्वं व स्ताच्छिवसुखमिति वा सुव्रतश्रेष्ठिनोऽभूत्॥१॥

अन्वय–

माद्यन्मोहावनीन्द्रप्रशमनविशिखः, पञ्चबाणार्चिरर्णः, मिथ्यात्वध्वान्तवान्तौ रविकरनिकरः, श्रीभाग्, नेमिःजलशयसविधे एकादशीयां स्फूर्तिं बभाषे तीव्रलोभाद्रिवज्रं, श्रेयः, तत्पर्व सुव्रतश्रेष्ठिनः वा शिवसुखम् अभूत् इति वः स्तात्....।

श्रीभागिति .... 'माद्यन्मोहावनीन्द्रप्रशमनविशिखः'– माद्यन् हर्षातिरेकात्स्वयं विह्वलीभूतस्सन् अन्यान् व्याकुलीकुर्वन् स्वायत्तीकृतसर्वसत्त्वात्....यो मोहः मोहनीयकर्म स एव अवन्याः पृथ्व्याः इन्द्रस्य स्वामिनः प्रशमनं प्रमथनं विघातनं वा तस्मिन् विशिखः विगता शिखा यस्य बाणः इव इषुसमो वा "बाणे–पृषत्क–विशिखो" इति हैमः (३।४४२)। मदोन्मत्तमोहमहीपमारणबाणसदृक् श्रीनेमिरित्यर्थः। 'पञ्चबाणार्चिरर्णः' पञ्च बाणा यस्य कामदेवः एव अर्चिः अग्निः तस्य प्रशमने अर्णः जलमिव। "वह्नेर्द्वयोर्ज्वाल–कीलावर्चिर्हेतिः शिखा स्त्रियाम्" इत्यमरः (१।१।६०)। "अम्भोर्णस्तोय–पानीय–नीरक्षीराम्बु शम्बरम् इत्यमरः (१।१०।४)। मन्मथानलप्रशमननीरसदृक्ष इत्यर्थः। 'मिथ्यात्वध्वान्तवान्तौ" मिथ्यात्वं दर्शनमोहनीयजन्यपरिणामविशेषः तदेव ध्वान्तम् अन्धकारम् "ध्वान्तं भूच्छायान्धकारं तमसं समवान्धतः" इति हैमः

( २।६० )। तस्य वान्तौ दूरीकरणे विनाशे। 'रविकरनिकरः' रवेः सूर्यस्य "भानुर्हंसः सहस्रांशुस्तपनः सविता" इत्यमरः। ( १।३।३१ )। कराणां किरणानां "पाद—दीधिति-कर—द्युतिद्युतो—रुग्रोचिरक—किरण—त्विषि त्विषः" इति हैमः ( २।१४ )। निकरः समूहः इव। "सङ्घाते प्रकरौघवार—निकर व्यूहाः समूहश्चयः" इति हैमः ( ६।४७ )। 'श्रीभाग्' श्रियम् ऐश्वर्यं चतुस्त्रिंशदतिशयाष्टमहाप्रातिहार्यस्वरूपबाह्याम् अनन्तज्ञान—दर्शन—चारित्राद्यात्मिकाभ्यन्तरां लक्ष्मीम् भजतीति भूतिभागीत्यर्थः। 'नेमिः' द्वाविंशस्तीर्थपतिः, धर्मचक्रस्य नेमिवन्नेमिः, नेमिशब्दः इन्नन्तोऽप्यस्ति "नेमिनं नौमि भक्त्या" इति प्रयोगदर्शनात् "नेमौ नेमीत्यपीष्यते" इति हैमशिलोञ्छे। 'जलशयसविधे' जलशयस्य—जले शेते तस्य कृष्णस्य सविधे समीपे पार्श्वे वा। "पार्श्वं समीपं सविधं ससीमाभ्यासं सवेशान्तिकसन्निकर्षाः" इति हैमः (६।८६)। 'एकादशीयाम्' एकादशीपर्वसम्बन्धिनीम्। 'स्फूर्तिम्' प्रकाशम् प्राकट्यं वा। "बभाषे' भाषितवान्। 'तीव्रलोभाद्रि वज्रम्' तीव्रः बाढः यो लोभः चतुर्थकषायः मूर्च्छाविशेषोः वा स एव अद्रिः भूधरः पर्वतो वा, "महीध्रे शिखरिक्ष्माभृदहार्यधर पर्वताः। अद्रि—गोत्रगिरि ग्रावाचल—शैल—शिलोच्चयाः।" इत्यमरः ( २।३।१ )। तद्भेदने वज्रम् प्रहरणविशेषमिव "वज्रं त्वशनि र्ह्रादिनी स्वरुः शतकोटिः पविः शंतो दम्भोलि र्भिदुरं भिदुः" इति हैमः ( २।९४ )। पुनः किंभूतमेतत्पर्वं। 'श्रेयः' प्रशस्यत-

मम् कल्याणकारित्वा 'तत्'–उक्तलक्षणम्। 'पर्व' आराधनप्रधान तिथिः एकादशीदिनमिति वा। "वा" यथा अत्र वा शब्दो यथार्थः। "व वा यथा तथैवेवं साम्ये" इत्यमरः (३।४।९) 'सुव्रतश्रेष्ठिनः' सुव्रताभिधानधनिनः। 'शिवसुखम्' शिवस्य मोक्षस्य सुखं करोतीति शिवसुखयतीति शिवसुखम् "णिज्बहुलं नाम्नः कृगादिषु" (सि. ३।४।४२)...णिज्, पश्चाद् "अच्" (सि. ५।१।४९) अजन्तोऽयं शब्दोऽत एव शिवसुखकरमित्यर्थः। 'अभूत्' अभवत्। 'इति' तथैव। 'वः' युष्माकम्। 'स्तात्' अस्तु भवताद् वा।

श्रीभाग्...इति पदे श्रीः अतिशयाष्टमहाप्रातिहार्यादिरूपा बाह्यमैश्वर्यं प्रभोः पूजातिशयं ज्ञापयति अनन्तज्ञानादिस्वरूपा अभ्यन्तर-लक्ष्मीः ज्ञानातिशयं द्योतयति...तद्वान् प्रभुः अतः एव श्रीभाग् एत-त्पदमेव अतिशयद्वयम् अवबोधयति। जलशयसविधे...बभाषे एत-दखिलपदं तु वचनातिशयज्ञापकम्। अस्मिन्नपारे संसारे मोह-मदन-मिथ्यात्वमेव दुष्टा अपायास्ते तेनाऽपेताः अथ अन्यजन्तूनामपि दूरीक्रियन्तेऽतः एव...माद्यन्मोहावनीन्द्र...इति वाक्यत्रयम् श्रीनेमि-जिनेश्वरस्य अपायापगमातिशयं सूचयतीति अतिशयचतुष्कघटना। एतत्स्तुतिरपि स्रग्धरायां वर्तते तल्लक्षणन्तु पूर्वोक्तम्।

**અર્થ**— મદોન્મત્ત મોહરૂપી રાજાને દમન કરવામાં બાણ સમાન, કામરૂપી અગ્નિને શાંત કરવામાં પાણી સમાન, મિથ્યાત્વરૂપી અંધકારને દૂર કરવામાં સૂર્યનાં કિરણોનાં સમૂહ સરખાં, લક્ષ્મીને ભજનારા એવા શ્રી નેમિનાથ પ્રભુએ કૃષ્ણ પાસે એકાદશીનાં મહિમાને કહ્યો, તીવ્ર લોભરૂપી પર્વતને ભેદવામાં વજ્ર સમાન કલ્યાણકારી તે પર્વ સુવ્રત–શ્રેષ્ઠિને જે રીતે મોક્ષસુખ કરનારૂં થયું એ પ્રમાણે તમને થાઓ...

समास–

**श्रीभाग्**–श्रियम् भजतीति–श्रीभाग्। (उप. त. पु.) 'भजोविण्' ५।१।१४६...विण् ।

**जलशयसविधे :**–जले शेते–जलशयः, (उप.त.पु.) 'आधारात्' ५।१।१३७....अ, जलशयस्य सविधे–जलशयसविधे। (ष. त. पु.)

**एकादशीयाम् :**–एकेन अधिका दश–एकादश, (म.प.लो.क.) एकादशानां पूरणी–एकादशी, 'संख्यापूरणेडट्' ७।१।१५५...डट्, एकादश्याः इयम्–एकादशीया, ताम्–एकादशीयाम् । 'तस्येदम्' ६।३।१६० ना सूचनथी 'दोरीयः' ६।३।३२....ईय,

**माद्यन्मोहावनीन्द्रप्रशमनविशिख :**–अवन्याः इन्द्रः–अवनीन्द्रः, (ष.त.पु.) मोह एव अवनीन्द्रः–मोहावनीन्द्रः, (अव. पू. क.) माद्यंश्चासौ मोहावनीन्द्रश्च–माद्यन्मोहावनीन्द्रः, (वि.पू.क.) माद्यन्मोहावनीन्द्रस्य प्रशमनम्–माद्यन्मोहावनीन्द्रप्रशमनम्, 'कृति' ३।१।७७.... (ष.त.पु.) माद्यन्मोहावनीन्द्रप्रशमने विशिखः इव–माद्यन्मोहावनीन्द्रप्रशमनविशिखः। "सिंहाद्यैः०" ३।१।८९ (स.त.पु.)

**पञ्चबाणार्चिरर्ण :**–पञ्च बाणाः यस्य सः–पञ्चबाणः, (स.ब.व्री.) पञ्चबाण एव अर्चिः–पञ्चबाणार्चिः, ( अव. पू. क. ) पञ्चबाणार्चिः प्रशमयतीति–पञ्चबाणार्चिःप्रशमि; 'अजातेः शीले' ५।१।१५४....णिन्, (उप.त.पु.) पञ्चबाणार्चिःप्रशमि अर्णः–पञ्चबाणार्चिरर्णः। (म.प.लो.क.)

**मिथ्यात्वध्वान्तवान्तौ:**–मिथ्यात्वमेव ध्वान्तम्–मिथ्यात्वध्वान्तम्, (अव.पू.क.) मिथ्यात्वध्वान्तस्य वान्तिः–मिथ्यात्वध्वान्तवान्तिः, तस्याम्–मिथ्यात्वध्वान्तवान्तौ। 'कृतिः' ३।१।७७....(ष.त.पु.)

**रविकरनिकरः** :—रवेःकराः—रविकराः, ( ष. त. पु. ) रविकराणां निकरः—रविकरनिकरः। (ष. त. पु.)

**तीव्रलोभाद्रिवज्रम्** :—तीव्रःलोभः—तीव्रलोभः, ( वि. पू. क. ) तीव्रलोभ एव अद्रिः—तीव्रलोभाद्रिः, ( अव.पू. क. ) तीव्रलोभाद्रिम् भिनत्तीति—तीव्रलोभाद्रिभेदकम्, (उप.त.पु.) 'णकतृचौ' ५।१।४८...णक. तीव्रलोभाद्रिभेदकम वज्रम्—तीव्रलोभाद्रिवज्रम्। (म. प. लो. क.)

**शिवसुखम्** :—शिवस्य सुखम्—शिवसुखम्, (ष.त.पु.) शिवसुखम् करोतीति—शिवसुखयति, शिवसुखयतीति—शिवसुखम्।

**सुव्रतश्रेष्ठिन** :—सुव्रतः नाम यस्य सः—सुव्रतनामा, (स.ब.व्री.) सुव्रतनामा चासौ श्रेष्ठी च—सुव्रतश्रेष्ठी, तस्य—सुव्रतश्रेष्ठीनः। (म.प.लो.क.)

एकादशीपर्वमहिमवर्णनात्मिकेयं स्तुतिः

**इन्द्रैरभ्रभ्रमद्भिः मुनिपगुणरसास्वादनानन्दपूर्णैः,**
**दीव्यद्भिः स्फारहारैर्ललितवरवपुर्यष्टिभिः स्वर्वधूभिः।**
**सार्धं कल्याणकौघो जिनपतिनवतेःबिन्दुभूतेन्दुसङ्ख्यो,**
**घस्रे यस्मिन् जगे तद् भवतु सुभविनां**
**पर्व सच्छर्महेतुः ॥२॥**

अन्वय—

यस्मिन् घस्रे अभ्रभ्रमद्भिः, मुनिपगुणरसास्वादनानन्दपूर्णैः, दीव्यद्भिः, स्फारहारैः, इन्द्रैः, ललितवरवपुर्यष्टिभिः स्वर्वधूभिः सार्धं जिनपतिनवतेः बिन्दुभूतेन्दुसङ्ख्यः कल्याणकौघः जगे तत् पर्व सुभविनां सच्छर्महेतुः भवतु।...

इन्द्रैरिति...'यस्मिन्'–एकादशीपर्वणि। 'घस्रे' दिने वासरे वा। "घस्रे वासरहिंस्रयोः" इत्यनेकार्थः (२।४०४)। अभ्रभ्रमद्भिः' अभ्रे गगने भ्रमद्भिः चरद्भिः चलद्भि र्वा। "अभ्रं सुराभोऽभ्रमरुत्पथोऽम्बरम्" इति हैमः (२।७७)। 'मुनिपगुणरसास्वादनानन्दपूर्णैः' मुनीन् पान्ति रक्षन्तीति जिनेश्वरदेवाः तेषां च गुणाः अनन्तज्ञानदर्शनचारित्रप्रभृतयः "गुणो ज्यासूद-तन्तुषु ॥१३६॥ रज्जौ सत्त्वादौ सन्ध्यादौ शौर्यादौ भीमइन्द्रिये रूपादावप्रधाने च दोषान्यस्मिन्–विशेषणे" इत्यनेकार्थः (२।१३७)। तेषां रसानाम् आस्वादनानां स्वादानाम् आनन्दः आह्लादश्चित्तप्रसन्नता वा तेन पूर्णैः भृतैः। 'दीप्यद्भिः' राजमानैः शोभमानै र्वा। 'स्फारहारैः' स्फाराः विपुलाः महन्तो वा "स्फारस्तु स्फरकादीनां बुद्बुदे विपुलेऽपि च" इत्यनेकार्थः (२।४५६)। हाराः कण्ठाभरणविशेषाः येषां तैः धृतानेकविधमहद्धारैः। हाराणां प्रकारा अपि बहवस्तथा हि–

"हारो मुक्तातः प्रालम्बस्रक्कलापावलीलताः।
देवच्छन्दः शतं साष्टं त्विन्द्रच्छन्दः सहस्रकम् ॥३२२॥

तदर्धं विजयच्छन्दः हारस्त्वष्टोत्तरं शतम्।
अर्धं रश्मिकलापोऽस्य द्वादश त्वर्धमाणवः ॥३२३॥

द्विर्द्वादशार्धगुच्छः स्यात् पञ्चहारफलं लताः।
अर्धहारश्चतुष्षष्टिः गुच्छमाणवमन्दराः ॥३२४॥

अपि गोस्तनगोपुच्छावर्धमर्धं यथोत्तरम्।
इति हारा यष्टिभेदात् एकावल्येकयष्टिका ॥३२५॥

कण्ठिकाऽपि अथ नक्षत्रमाला तत्संख्यमौक्तिकैः।"

इति हैमः । ( ३।३२२...३२५ )। 'इन्द्रैः' शक्रैः चतुष्षष्टिसंख्यकैः । 'ललितवरवपुर्यष्टिभिः' ललितं लालित्योपेतं मनोहरं वरं श्रेष्ठं वपुः शरीरं देहो वा तदेव यष्टिः काष्ठिकी कृशकायत्वात् यासां ताभिः । 'स्वर्वधूभिः' स्वः सुरलोकस्य स्वर्गस्य वा वधूभिः अङ्गनाभिः । 'सार्धम्' सह । "साकं सत्रा सत्रं सार्धममासह" इति हैमः ( ६।१६२ ) । 'जिनपतिनवतेः' जिनानां सामान्यकेवलिनां पतयः तीर्थकृतः तेषां नवतेः दशोनशतस्य अतीतवर्तमानाऽनागतकालीननवतिजिनेश्वराणाम् । 'बिन्दुभूतेन्दुसंख्यः' बिन्दुः शून्याङ्कम्, भूतानि पञ्च, इन्दुरेकः, पाश्चात्यक्रमेणानुयोजनं क्रियेत तर्हि (१५०) सार्धशतमिति संख्याः यस्य सः । हार्दमिदम्—तत्संख्यकानि ( सार्धशतसंख्यकानि) कल्याणकानि एतदेकादशीदिने बभूवुः । 'कल्याणकौघः' कल्याणकानां तीर्थकृच्च्यवनादिस्वरूपाणाम् ओघः समूहः । 'जगे' अगायि जगानो वा । 'तत्पर्व' एतदेकादशीलक्षणम् । 'सुभविनां' सद्भावुकानां संसारिजीवानां वा । 'सच्छर्महेतुः' सत् श्रेष्ठं सत्यं वा यत् शर्म सुखं निर्वाणं वा "अथो शर्म निर्वृतिः सातं सौख्यं सुखम्" इति हैमः (६।६)। तस्य हेतुः कारणम् । भवतु अस्तु ।

**અર્થ**— જે દિવસે આકાશમાં ફરતા, જિનેશ્વરદેવના ગુણોનાં રસોનાં આસ્વાદનનાં આનંદથી પૂર્ણ, દેદીપ્યમાન, વિસ્તીર્ણ હારવાળા, એવા ઇન્દ્રોવડે શોભાયુક્ત સુંદર દેહરૂપી યષ્ટિવાળી દેવાંગનાઓ સાથે નેવું (૯૦) જિનેશ્વરદેવનાં દોઢસો (૧૫૦) સંખ્યાવાળો કલ્યાણકોનો સમૂહ ગવાયો તે પર્વ ઉત્તમ ભવ્યજીવોને શ્રેષ્ઠ કલ્યાણનાં હેતુભૂત થાઓ...

समास—

**अग्रभ्रमद्भिः** —अग्रे भ्रमन्तः—अग्रभ्रमन्तः, तैः—अग्रभ्रमद्भिः । ( स. त. पु. )

**मुनिपगुणरसास्वादनानन्दपूर्णैः**—मुनीन् पान्तीति—मुनिपाः, (उप. त. पु.) 'स्था.पा०' ५।१।१४२...क, मुनिपानां गुणाः—मुनिपगुणाः, (ष. त. पु.) मुनिपगुणानां रसः—मुनिपगुणरसः, (ष. त. पु.) मुनिपगुणरसस्य आस्वादनम्—मुनिपगुणरसास्वादनम्, 'कृति' ३।१।७७....(ष. त. पु.) मुनिपगुणरसास्वादनानाम् आनन्दः—मुनिपगुणरसास्वादनानन्दः, (ष. त. पु.) मुनिपगुणरसास्वादनानन्देन पूर्णाः, मुनिपगुणरसास्वादनानन्दपूर्णाः, तैः—मुनिपगुणरसास्वादनानन्दपूर्णैः । (तृ. त. पु. )

**स्फारहारैः**—स्फारा हारा येषां ते—स्फारहाराः, तैः—स्फारहारैः । ( स. ब. व्री. )

**ललितवरवपुर्यष्टिभिः**—वपुरेव यष्टिः—वपुर्यष्टिः, ( अव. पू. क. ) ललिता वरा वपुर्यष्टिः यासां ताः—ललितवरवपुर्यष्टयः, ताभिः—ललितवरवपुर्यष्टिभिः । (स. ब. ब. व्री. )

**स्वर्वधूभिः**—स्वःवध्वः—स्वर्वध्वः, ताभिः—स्वर्वधूभिः । (ष.त.पु.)

**कल्याणकौघः**—कल्याणकानाम् ओघः—कल्याणकौघः । (ष.त.पु.)

**जिनपतिनवतेः**—जिनानां पतयः, जिनपतयः, (ष.त.पु.) जिनपतीनां नवतिः—जिनपतिनवतिः, तस्य—जिनपतिनवतेः । (ष.त.पु.)

**बिन्दुभूतेन्दुसंख्यः**—बिन्दुः भूतानिः इन्दुः संख्या यस्य सः—बिन्दुभूतेन्दुसंख्यः । (स. ब. ब. व्री.)

**सुभविनाम्**—शोभनाः भविनः—सुभविनः, तेषां—सुभविनाम् । ( सु. पू. त. पु. )

सच्छर्महेतु :—सच्च तद् शर्म च-सच्छर्म, 'सन्महत०' ३।१।१०७ (वि. पू. क.) सच्छर्मणःहेतुः-सच्छर्महेतुः। (ष. त. पु.)

समुद्रस्रोतः इव सिद्धान्तः सुवर्ण्यते.....

सिद्धान्ताब्धिप्रवाहः कुमतजनपदान् प्लावयन् यः प्रवृत्तः,
सिद्धिद्वीपं नयन्धीधनमुनिवणिजः सत्यपात्रप्रतिष्ठान्।
एकादश्यादिपर्वेन्दुमणिमतिदिशन् धीवराणां महार्घ्यम्,
सन्न्यायाम्भश्च नित्यं प्रवितरतु स नः
स्वप्रतीरे निवासम् ॥ ३ ॥

अन्वय—

यः कुमतजनपदान् प्लावयन्, सत्यपात्रप्रतिष्ठान् धीधनमुनिवणिजः सिद्धिद्वीपं नयन्, धीवराणां महार्घ्यम् एकादश्यादिपर्वेन्दुमणि सन्न्यायाम्भश्च अतिदिशन्, नित्यं प्रवृत्तः स सिद्धान्ताब्धिप्रवाहः नः स्वप्रतीरे निवासं प्रवितरतु।

सिद्धान्तेति—'यः' निम्नोक्तस्वरूपी सिद्धान्ताब्धिप्रवाहः। 'कुमतजनपदान्' कुत्सितं मतं समयः आशयो वा येषां तानेव जनपदान् देशान्। "जनपदः स्यात् पुनर्जन-देशयोः" इत्यनेकार्थः (४।१४१)। 'प्लावयन्' निमज्जयन् जलमयीकुर्वन् वा। 'सत्यपात्रप्रतिष्ठान्' सत्यं सद्भ्यो हितं "तस्मैहिते" (सि. ७।१।३५) इति यः यथार्थम्, तत्पात्रे आधेयग्राहके प्रतितिष्ठन्तीति "स्था पा स्ना०" (सि. ५।१।१४२) कः, एतादृशान्। 'धीधनमुनिवणिजः' धीः बुद्धिः सैव धनं द्रव्यं वित्तं वा येषां "धनं वित्ते गोधने च स्याद्" इत्यनेकार्थः (२।२६५) ते मुनयः साधवः एव वणिजो व्यापारिणस्तान्। "वाणिजो वणिक् क्रयविक्रयिकः पण्याजीवा-

पणिकनैगमाः" इति हैमः ( ३।५३१ ) 'सिद्धिद्वीपम्' सिद्धि मुक्तिः सिद्धनिवासस्थानं वा "महानन्दोऽमृतं सिद्धिः कैवल्यमपुनर्भवः। शिवं निःश्रेयसं श्रेयो निर्वाणं ब्रह्म निर्वृतिः॥" इति हैमः ( १।७४ )। सैव द्वीपं द्विधा गता आपः यस्मिन् तम् "द्व्यन्तर०" (सि. ३।२।१०१) इत्येतेन आप ईपादेशः अन्तर्जलेतटम् इत्यर्थः। 'नयन्' प्रापयन्। 'धीवराणाम्' धिया धियां वा वराणाम् उत्तमानां प्रज्ञाशालिनाम्। 'महार्घ्यम्' महत् गुरुतमम् अर्घार्थमिति. अर्घ्यम् महामूल्यवत् रत्नसदृगित्यर्थः। 'एकादश्यादिपर्वेन्दुमणिम्' एकादशी पर्वविशिष्टा आदिः प्रथमा यस्मिन्.... आदिशब्दोऽनेकार्थोऽपीह व्यवस्थावाची मन्तव्यः। "सामीप्ये च व्यवस्थायां प्रकारेऽवयवे तथा। चतुर्ष्वर्थेषु मेधावी आदिशब्दं तु लक्षयेत् ॥ १ ॥ इति शब्दकल्पद्रुमे। तत्रादिशब्दः सामीप्ये यथा ग्रामादौ घोषः इति। व्यवस्थायां यथा ब्राह्मणादयो वर्णाः इति। प्रकारे यथा जिनेश्वरा ऋषभादयः, अवयवे यथा स्तम्भादयो गृहाः इत्यर्थः। अत्र तु व्यवस्थार्थः संगतः। एकादश्यादिपर्व अनेकविधाराधनाप्रधानदिनम् तदेव इन्दुः कान्तः अस्य मणिः चन्द्रकान्तमणिस्तम्। 'सन्न्यायाम्भश्च' सन् श्रेष्ठः सत्यो वा न्यायः नीतिः प्रामाण्यं वा स एव अम्भः जलं वारि वा चकारः समुच्चयार्थः "चान्वाचयसमाहारेतरेतरसमुच्चये" इत्यमरः (३।३।२४०)। ( परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः' यथा ईश्वरं गुरुं च भजस्व तद्वत् अत्रापि ) एकादश्यादिपर्वेन्दुमणिं सन्न्यायाम्भश्च।

'अतिदिशन्' दर्शयन्। 'नित्यम्' सततम्। "अनारतं त्वरितं संसक्तं सततानिशे। नित्यानवरताजस्रासक्ताऽश्रान्तानि सन्ततम्"॥ इति हैमः (६।१०७)। 'प्रवृत्तः' प्रावर्तत प्रयत्नशीलो बभूव। 'स' उर्ध्वलिखितस्वरूपी। 'सिद्धान्ताब्धिप्रवाहः' सिद्धः अन्तः निश्चयोऽस्य आगमः स एव अब्धिः समुद्रः सागरो वा तस्य प्रवाहः स्रोतः। "प्रवाहः पुनरोघः स्याद् वेणीधारा रयश्च सः" इति हैमः (४।१५३)। 'नः' अस्माकम्। 'स्वप्रतीरे' स्वस्य आत्मीयस्य सिद्धिद्वीपस्य वा "स्वो ज्ञात्यात्मनोः स्वं निजे-धने" इत्यनेकार्थः (१।१४)। प्रतीरे कूले तटे वा। "कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु" इत्यमरः (१।१०।७)। 'निवासम्' वसनं स्थिरतां वा। 'प्रवितरतु' प्रददातु।

અર્થ:- જે ખરાબમતરૂપી દેશોને ડુબાવતો, સત્યરૂપી જહાજમાં બેઠેલ બુદ્ધિરૂપી ધનવાળા મુનિરૂપી વહેપારીઓને મુક્તિ-રૂપી દ્વીપ તરફ લઈ જતો, બુદ્ધિજનોને મહામૂલ્યવાન્ એકાદશી આદિ પર્વરૂપી ચંદ્રકાન્તમણિને અને સુંદર ન્યાયરૂપી પાણીને બતા-વતો, (આપતો) છતો હંમેશા પ્રવર્તી રહ્યો છે તે સિદ્ધાંતરૂપી સમુદ્રનો પ્રવાહ અમોને પોતાના કિનારે નિવાસ આપો (કરાવો)...

समास–

**सिद्धान्ताब्धिप्रवाह:**–आपः धीयन्ते यत्र–अब्धिः, (उप.त.पु.) सिद्धान्त एव अब्धिः–सिद्धान्ताब्धिः, (अव. पू. क.) सिद्धान्ताब्धेः प्रवाहः–सिद्धान्ताब्धिप्रवाहः। (ष.त.पु.)

**कुमतजनपदान्** :-कुत्सितानि मतानि-कुमतानि, (कु. पू. त. पु.) कुमतानि एव जनपदाः-कुमतजनपदाः, तान्-कुमतजनपदान्। (अव.पू.क.)

**सिद्धिद्वीपम्** :-सिद्धिरेव द्वीपः-सिद्धिद्वीपः, तम्-सिद्धिद्वीपम् । ( अव. पू. क. )

**धीधनमुनिवणिज** :-धीरेव धनं येषां ते-धीधनाः, (स.ब.व्री.) धीधनाश्चामी मुनयश्च-धीधनमुनयः, ( वि. पू. क. ) धीधनमुनयः एव वणिजः-धीधनमुनिर्वणिजः, तान्-धीधनमुनिवणिजः । ( अव. पू. क. )

**सत्यपात्रप्रतिष्ठान्** :-सत्यमेव पात्रम्-सत्यपात्रम् , (अव. पू. क.) सत्यपात्रे प्रतितिष्ठन्तीति-सत्यपात्रप्रतिष्ठाः, तान्-सत्यपात्रप्रतिष्ठान् । ( उप. त.पु.) स्था.पा-स्ना० ५।१।१४२....क,

**एकादश्यादिपर्वेन्दुमणिम्** :-एकादशी आदौ यस्मिन् तद्-एकादश्यादि, (व्य.ब.व्री) एकादश्यादि च तत् पर्व च-एकादश्यादिपर्व, (वि. पू. क.) इन्दुवत् शाम्यति-इन्दुशामकः, (उप. त. पु.) इन्दुशामको मणिः-इन्दुमणिः, ( म. प. लो. क. ) एकादश्यादिपर्व एव इन्दुमणिः-एकादश्यादिपर्वेन्दुमणिः, तम्-एकादश्यादिपर्वेन्दुमणिम् । (अव. पू. क.)

**धीवराणाम्** :-धिया (कृताः) वराः-धीवराः, तेषाम्-धीवराणाम्। 'तृतीया०' ३।१।६५. (तृ. त. पु.)

**महार्घ्यम्** :-महद् अर्घ्यं यस्य सः-महार्घ्यः, तम्-महार्घ्यम्। ( स. ब. व्री. )

**सन्न्यायाम्भ** :-सँश्चासौ न्यायश्च - सन्न्यायः, 'सन्महत्' ३।१।१०७ ( वि. पू. क. ) सन्न्याय एव अम्भः-सन्न्यायाम्भः, तद्-सन्न्यायाम्भः । (अव. पू. क.)

स्वप्रतीरे :–स्वस्य प्रतीरम्–स्वप्रतीरम्, तस्मिन्–स्वप्रतीरे। (ष. त. पु.)

श्री अम्बिकायै अर्थना

तत्पर्वोद्यापनार्थं समुदितसुधियां शम्भुसङ्ख्याप्रमेया,–
मुत्कृष्टां वस्तुवीथीमभयदसदने प्राभृतीकुर्वतां ताम्।
तेषां सव्याक्षपादैः प्रलपितमतिभिः प्रेतभूतादिभिर्वा
दुष्टैर्जन्यंत्वजन्यं हरतु हरितनुन्यस्तपादाम्बिकाख्या ॥४॥

अन्वय–

हरितनुन्यस्तपादा, अम्बिकाख्या तत्पर्वोद्यापनार्थम् उत्कृष्टाम् शम्भुसङ्ख्याप्रमेयां तां वस्तुवीथीम् अभयदसदने प्राभृतीकुर्वतां समुदितसुधियां तेषां प्रलपितमतिभिः सव्याक्षपादैः दुष्टै र्वा प्रेतभूतादिभिः तु जन्यम् अजन्यं हरतु।

तदिति....'हरितनुन्यस्तपादा' हरेः सिंहस्य "हरिर्दिवाकर समीरयोः ॥४५९॥ यम–वासव–सिंहांशु–शशाङ्क–कपि–वाजिषु। पिङ्गवर्ण–हरिद्वर्ण भेकोपेन्द्र-शुकाहिषु ॥४६०॥ लोकान्तरे च..." इत्यनेकार्थः। तनौ शरीरे देहे वा न्यस्तौ स्थापितौ पादौ चरणौ यस्याः सा। "पादोऽङ्घ्रिश्चरणोऽस्त्रीषु" इति गौडः। 'अम्बिकाख्या' अम्बिका अम्बेति आख्या अभिधानं यस्याः सा श्रीनेमिनाथ-शासनसेविकेत्यर्थः। "आख्याह्वे अभिधानं च नामधेयं च नाम च।" इत्यमरः (१।६।८)। 'तत्पर्वोद्यापनार्थम्' तस्य एकादशी-लक्षणस्य पर्वणः आराधनादिनस्य उद्यापनस्य पूर्णताजन्यहर्षव्यक्ती-करणस्य अर्थं निमित्तम्। 'उत्कृष्टाम्' श्रेष्ठां प्रकृष्टां वा। 'शम्भु-सङ्ख्याप्रमेयाम्' शम्भुः एकादशमानमस्य स्तया सङ्ख्यया प्रमाणेन

प्रमेयां मेयविषयाम्। ताम्–उक्तस्वरूपिणीम्। 'वस्तुवीथीम्' वस्तूनां पदार्थानाम् अङ्गाग्रपूजनोचितसामग्रीणां वीथीं श्रेणीम्। "वीथी वर्त्मनि पङ्क्तौ च गृहाङ्गे नाट्यरूपके" इत्यनेकार्थः (२।२१८)। तपःपूर्णता समये भावुकाः सम्यग्दर्शन–ज्ञान–चारित्रोपकरणानि ढौकयन्तीति हार्दम्। 'अभयदसदने' अभयं निर्भीरुत्वं ददातीति परमात्मा तस्य जिनेश्वरदेवस्य सदने आलये। "मन्दिरं सदनं सद्म निकाय्यो भवनं कुटः" इति हैमः (४।५६)। 'प्राभृतीकुर्वताम्' अप्राभृतं प्राभृतं कुर्वताम् उपहारीकुर्वताम् ढौकयताम् वा। "प्राभृतं तु प्रदेशनम् ॥२७॥ उपायनमुपग्राह्यमुपहारस्तथोपदा" इत्यमरः। (२।८।२८)। 'समुदितसुधियाम्' मुदितेन हर्षेण सह वर्तन्ते ये ते समुदिताः प्रोल्लसिताः शोभना धीः बुद्धि र्येषां मनीषिणः तेषाम्। 'तेषाम्' वर्णितरूपाणाम् लोकानामित्यध्याहार्यम्। 'प्रलपितमतिभिः' प्रलापाः व्यर्थवचांसि सञ्जाताः यस्या यस्याम् वा प्रलपिता "तदस्य सञ्जातं तारकादिभ्य इतः" (सि०७।१।१३८) ....इतः। "प्रलापोऽनर्थकं वचः" इत्यमरः (१।६।१५)। तादृशी मति–बुद्धिर्येषां यद्वातद्वाभाषिणस्तैः.... असम्यग्बोधिप्रज्ञावद्भिरित्यर्थः। 'सव्याक्षपादैः' सव्याः प्रतिकूलाः जैनागमविरोधिनो वा "सव्यं दक्षिणे वामे च प्रतिकूले च" इत्यनेकार्थः (२।३७५)। अक्षपादाः अक्षं पादे येषां...सौगताः बौद्धाः तैः। 'दुष्टैः' खलैः परपीडनासक्तैर्वा। 'वा' वाशब्दोऽत्र विकल्पाऽर्थो ज्ञेयः। "वा स्याद् विकल्पोपमयोरेवार्थे च समुच्चये" इति विश्वः। 'प्रेतभूतादिभिः' प्रेताः पिशाचाः राक्षसा वा भूताः व्यन्तरभेदविशेषाश्च आदौ पूर्वे येषां तैः "प्रेतः प्राण्यन्तरे मृते" इत्यमरः (३।३।५९)। 'जन्यम्' उत्पन्नम् उत्पद्यमानं वा। 'अजन्यम्' उपद्रवम् अशुभोत्पातं वा। "अजन्यमीतिरुत्पातः" इति हैमः (२।४०)।

'तु' अवधारणार्थोऽवबोध्यः। "तु पादपूरणे भेदे समुच्चयेऽवधारणे। पक्षान्तरे नियोगे च प्रशंसायां विनिग्रहे॥" इति मेदिनी। 'हरतु' अपैतु दूरीकरोत्वित्यर्थः।

**અર્થ**:-સિંહના શરીર ઉપર સ્થાપેલા છે ચરણ જેના એવી અંબિકાદેવી તે પર્વના ઉદ્યાપન (ઉજમણા) માટે શ્રેષ્ઠ અગ્યાર (૧૧) ની સંખ્યાનાં પ્રમાણવાળા તે વસ્તુ (પુસ્તકાદિ) નાં સમૂહને જિનેશ્વરદેવનાં મંદિરને વિષે ભેટણા રૂપે કરતાં અને સારી રીતે ઉદય પામેલી છે સુંદર બુદ્ધિ જેની એવા તેઓ (ભવ્યજનો) નાં પ્રલાપ કરવાવાળી બુદ્ધિવાળા પ્રતિકૂલ એવા અક્ષપાદો=(બૌદ્ધો) વડે અથવા દુષ્ટ એવા પ્રેતભૂત આદિવડે ઉત્પન્ન થનારા ઉપદ્રવોનું હરણ કરો...

**समास–**

**तत्पर्वोद्यापनार्थम्**:-तत् च तद् पर्व च–तत्पर्व, (वि.पू.क.) उद्यापनाय इदम्–उद्यापनार्थम्, "तदर्थार्थेन" ३।१।७२ (च. त. पु.) तत्पर्वणः उद्यापनार्थम्–तत्पर्वोद्यापनार्थम्। (ष. त. पु.)

**समुदितसुधियाम्**:–शोभना धीः–सुधीः, (सु.पू.त.पु.) समुदिता सुधीः येषां ते–समुदितसुधियः, तेषाम्–समुदितसुधियाम्। (स. ब. व्री.)

**शम्भुसङ्ख्याप्रमेयाम्**:–शम्भुः प्रमाणं यस्याः साः–शम्भुप्रमाणा, (स.ब.व्री,) शम्भुप्रमाणा सङ्ख्या–शम्भुसङ्ख्या, (म.प.लो.क.) शम्भुसङ्ख्यया प्रमेया–शम्भुसङ्ख्याप्रमेया, ताम्–शम्भुसङ्ख्याप्रमेयाम्। (तृ. त. पु.)

**वस्तुवीथीम्**:– वस्तूनां वीथीः – वस्तुवीथीः, ताम् – वस्तुवीथीम्। (ष. त. पु.)

**अभयदसदने**:– अभयं ददातीति – अभयदः, (उप. त. पु.) "आतोडोऽह्वा०" ५।१।७६....ड, अभयदस्य सदनम्–अभयदसदनम्, तस्मिन्–अभयदसदने। (ष. त. पु.)

**प्राभृतीकुर्वताम्**—न प्राभृतम्—अप्राभृतम्, (न. त. पु.) अप्राभृतं प्राभृतम् इव कुर्वन्तः—प्राभृतीकुर्वन्तः, तेषाम्—प्राभृतीकुर्वताम् । (गति.त.पु.)

**सव्याक्षपादैः**—सव्याश्चामी अक्षपादाश्च—सव्याक्षपादाः, तैः—सव्याक्षपादैः । (वि. पू. क.)

**प्रलपितमतिभिः**—प्रलपिता मतिः येषां ते—प्रलपितमतयः, तैः—प्रलपितमतिभिः । (स.ब.व्री.)

**प्रेतभूतादिभिः**—प्रेताश्च भूताश्च—प्रेतभूताः, (इ. द्व.) प्रेतभूताः आदौ येषां ते—प्रेतभूतादयः, तैः—प्रेतभूतादिभिः । (व्य.ब.व्री.)

**अजन्यम्**—न जन्यम्—अजन्यम् तद्—अजन्यम् । (न. त. पु.)

**हरितनुन्यस्तपादा**—हरेः तनुः—हरितनुः, (ष.त.पु.) न्यस्तौ च तौ पादौ च—न्यस्तपादौ, (वि.पू.क.) हरितनौ न्यस्तपादौ यस्याः सा—हरितनुन्यस्तपादा । (व्य.ब.व्री.)

**अम्बिकाख्या**—अम्बिका आख्या यस्याः सा—अम्बिकाख्या । (स. ब. व्री.)

ऐं

# श्रीसरस्वतीस्तुतिः

( इन्द्रवज्रावृत्तम् )



पद्मासने ! पद्मदृशे ! नमस्ते,
पद्मानने ! पद्महृदे नमस्ते ।
पद्मार्चिते ! पद्मकरे ! नमस्ते,
पद्मप्रभे ! पद्मनिभे ! नमस्ते ॥ १ ॥

चन्द्रांशुवच्छैत्यकरे ! नमस्ते,
चन्द्रांशुवच्चित्तहरे ! नमस्ते ।
चन्द्रांशुवद्ध्वान्तहृते ! नमस्ते,
चन्द्रांशुवद्विश्वगते ! नमस्ते ॥ २ ॥

शुभ्राशये ! शुभ्रयशाः ! नमस्ते,
शुभ्राम्बरे ! शुभ्रकरे ! नमस्ते ।
श्रेयस्करे ! भारति ! मे नमस्ते,
प्रेयस्करे ! सन्मतिदे ! नमस्ते ॥ ३ ॥

रम्याकृते ! ब्रह्मसुते ! नमस्ते,
रम्यादृते ! हंसगते ! नमस्ते ।
रम्यारवे ! ब्रह्मिणि ! मे नमस्ते,
रम्याश्रये ! दिव्यरूपे ! नमस्ते ॥ ४ ॥

( उपेन्द्रवज्रावृत्तम् )

श्रुताब्धिपारं भवती-प्रसत्त्या, व्रजन्ति सन्तः परिशुद्धबोधाः ।
सुरम्यभव्याप्सुजहर्षहेमद्युते ! सुदिव्ये ! कृपयेत् सुमातः ! ॥ ५ ॥

## श्रीदीपालिकास्तुतिः

( शार्दूलविक्रीडितवृत्तम् )

श्रीवीरविभोः निर्वाणवर्णनम्...

पापायां पुरि चारुषष्ठतपसा पर्यङ्कपर्यासनः ।
क्ष्मापालप्रभुहस्तिपालविपुलश्रीशुक्लशालां गतः ॥
गोसे कार्तिकदर्शनागकरणे, तुर्यारकान्ते शुभे ।
स्वातौ यः शिवमाप पापरहितं संस्तौमि वीरं
जिनम् ॥ १ ॥

अन्वय—

पापायां पुरि क्ष्मापालप्रभुहस्तिपालविपुलश्रीशुक्लशालां गतः, चारुषष्ठतपसा पर्यङ्कपर्यासनः, यः तुर्यारकान्ते कार्तिकदर्शनागकरणे शुभे गोसे स्वातौ पापरहितं शिवम् आप (तं) वीरं जिनं संस्तौमि ।

पापायामिति :—'पापायाम्' तन्नामग्रामविशेषे । 'पुरि' नगर्याम् । 'क्ष्मापालप्रभुहस्तिपालविपुलश्रीशुक्लशालाम्' क्ष्मां पृथ्वीं पालयन्तीति क्ष्मापालाः राजानः तेषां प्रभुः स्वामी, स चासौ हस्तिपालश्च तन्नामपृथ्वीपालपतिश्च तस्य विपुला महत्यः श्रियः शोभाः यस्यां सा शुक्लशाला क्षेत्रविशेषा ताम् । "विपुलः पृथुले ऽगाधे मेरु पश्चिमभूधरे" इति विश्वः (१५४।६१)। 'गतः' स्थितः । 'चारुषष्ठतपसा' चारु श्रेष्ठं निर्जलत्वात् षष्ठस्य द्व्युप-

वासात्मकस्य तपोऽनुष्ठानविशेषं तेन सहेत्यर्थोऽध्याहार्यः । 'पर्यङ्क-पर्यासनः' पर्यङ्कस्तन्नामासनं तस्मिन् परितः संपूर्णयोगनिरोधत्वात् आसनम् उपवेशनं यस्य सः । एतादृशो 'यः' वीरप्रभुः । 'तुर्यारिकान्ते'–तुर्यस्य चतुर्थस्य अरकस्य अरस्य अराः षड् सुषम-सुषमादयस्तस्मिंस्तुरियदुःषमसुषमलक्षणस्य अरस्य अन्ते पश्चिमभागे । 'कार्त्तिकदर्शनागकरणे'कार्त्तिकस्य वर्षान्तिममासस्य दर्शः दृश्यते चन्द्रो विपरीतलक्षयाऽस्मिन्निति संज्ञायां घः, अमावास्या "अमावस्या त्वमावास्या दर्शः सूर्येन्दुसंगमः ॥८॥ इत्यमरः (२।४।८)। तस्य तस्मिन् वा नागकरणे नागस्तन्नामकरणं तिथ्यर्धभागं, करणानि त्वेकादश बव–बालव–कौलव–तैतिल–गर–वणिज–विष्टि–शकुनि–चतुष्पाद–नाग–किंस्तुघ्न–लक्षणानि, तेभ्यो नागनामैककरणं,स्त स्मिन्नमावास्याया उत्तररात्राविस्यर्थः । उक्तं च–तदा च कार्तिक-दर्श–निशायाः पश्चिमे क्षणे। स्वातिऋक्षे वर्तमाने, कृतषष्ठो जगद्गुरुः ॥ २२२ ॥ एरण्डबीजवद्बन्धाभावादूर्ध्वगतिः प्रभुः । यथा स्वभावऋजुना मोक्षमेकमुपाययौ ॥ २४० ॥ वत्सरोऽभूत् तदा चन्द्रो, मासस्तु प्रीतिवर्धनः। नन्दिवर्धनकः पक्षोऽग्नि–वेशो नाम वासरः ॥ २४१ ॥ सोऽन्येन नाम्नोपशमो, देवानन्दा तु सा निशा । नैर्ऋतीत्यन्यनाम्ना तु लवोऽर्च्य इति संज्ञया ॥ २४२॥ प्राणः शुक्लाभिधानश्च स्तोकः शुद्धाभिधानकः । सर्वार्थसिद्धौ मुहूर्तो, नागाख्यं करणं पुनः ॥ २४४ ॥ इति त्रिषष्ठिशलाका पुरुष महा-चरिते। 'शुभे' शोभने कल्याणकारिणि वा निर्वाणाप्तिकारकत्वात् । 'गोसे' गां चन्द्रं स्यति क्षयति प्रभातकालः तस्मिन्। "गोसो

बोल–विभातयोः" इत्यनेकार्थः (२।५६५)। 'स्वातौ' तन्नामनक्षत्र-विशेषे। पापरहितम्' पापं दुःखं कर्म वा तेन रहितं विकलम्। 'शिवम्' मोक्षम्। 'आप' आप्नोत् प्राप्तवान् इत्यर्थः। पापरहित-मेतद्वीरमिति पदस्याऽपि विशेषणमतः पापरहितं कर्मविहीनम्। 'वीरं' श्रीमहावीरजिनेन्द्रम्। 'जिनम्' वीतरागम्। 'संस्तौमि' नौमि स्तुतिविषयं करोमीत्यर्थः। एतत्स्तुतिः शार्दूलविक्रीडितवृत्तम् "सूर्याश्वैर्मसजस्तताः स गुरवः शार्दूलविक्रीडितम्" एतल्लक्षणं वृत्तरत्नाकरे।

अर्थ—પાપાનગરીને વિષે રાજાઓનાં સ્વામિ એવા હસ્તિ-પાલ રાજાની ખૂબ જ શોભાવાળી શુક્લશાલાને વિષે રહેલા; સુંદર છઠ્ઠતપની સાથે પર્યંકાસને (પલાંઠીવાળીને) બેઠેલા, જે (પ્રભુ) ચોથા આરાના અંતે કાર્ત્તિકી અમાવાસ્યાના નાગકરણને વિષે શુભ–કલ્યાણ-કારી પ્રભાતે સ્વાતિનક્ષત્રને વિષે પાપરહિત એવા મોક્ષને પામ્યા તે (કર્મરહિત) વીરપ્રભુને હું સ્તવું છું.

समास—

**चारुषष्ठतपसा**:—षष्ठस्य तपः—षष्ठतपः, (ष. त. पु.) चारु च तद् षष्ठतपश्च—चारुषष्ठतपः, तेन—चारुषष्ठतपसा। (वि. पू. क.)

**पर्यङ्कपर्यासन**:—परितः आसनम्—पर्यासनम्, (प्रादि. त. पु.) पर्यङ्के पर्यासनं यस्य सः—पर्यङ्कपर्यासनः। (व्य. ब. व्री.)

**क्ष्मापालप्रभुहस्तिपालविपुलश्रीशुक्लशालाम्**:—क्ष्मां पालयन्तीति क्ष्मापालाः 'कर्मणोऽण्' ५।१।७०....अण्, (उप. त. पु.) क्ष्मापालानां प्रभुः—क्ष्मापालप्रभुः, (ष. त. पु.) क्ष्मापालप्रभुः हस्ति-पालः—क्ष्मापालप्रभुहस्तिपालः, (वि. पू. क.) विपुलाः श्रियः यस्याः

सा—विपुलश्रीः, (स. ब. व्री.) विपुलश्रीः शुक्रशाला—विपुलश्रीशुक्रशाला, (वि. पू. क.) क्ष्मापालप्रमुहस्तिपालस्य विपुलश्रीशुक्रशाला—क्ष्मापालप्रमुहस्तिपालविपुलश्रीशुक्रशाला,ताम्—क्ष्मापालप्रमुहस्तिपालविपुलश्रीशुक्रशालाम्। (ष. त. पु.)

**गोसे**:—गां स्यतीति—गोसः, तस्मिन्—गोसे। 'आतो डोऽह्वा०' ५।१।७६....ड, (उप. त. पु.)

**कार्तिकदर्शनागकरणे**:—कार्तिकस्य दर्शः—कार्तिकदर्शः,(ष.त.पु.) नागः नाम यस्य तद्—नागनाम, (स. ब. व्री.) नागनाम करणम्—नागकरणम्, (म. प. लो. क.) कार्तिकदर्शस्य नागकरणम्—कार्तिकदर्शनागकरणम्, तस्मिन्—कार्तिकदर्शनागकरणे। (ष. त. पु.)

**तुर्यारकान्ते**:—तुर्यश्चासौ अरकश्च—तुर्यारकः, (वि. पू. क.) तुर्यारकस्य अन्तम्—तुर्यारकान्तम्, तस्मिन्—तुर्यारकान्ते। (ष. त. पु.)

**पापरहितम्**:—पापेन रहितम्—पापरहितम्, तद्—पापरहितम्। 'ऊनार्थ०'....३।१।६७ (तृ. त. पु.)

**पञ्चकल्याणकमहोत्सववर्णनात्मिकेयं स्तुतिः**

**यद्गर्भागमनोद्भवव्रतवरज्ञानाप्तिभद्रक्षणे,।**
**संभूयाशु सुपर्वसंततिरहो! चक्रे महस्तत्क्षणात् ॥**
**श्रीमन्नाभिभवादिवीरचरमास्ते श्रीजिनाधीश्वराः,**
**सद्भायानघचेतसे विदधतां श्रेयांस्यनेनांसि च ॥२॥**

**अन्वय—**

अहो! सुपर्वसंततिः यद्गर्भागमनोद्भवव्रतवरज्ञानाप्तिभद्रक्षणे आशु संभूय तत्क्षणात् महः चक्रे ते श्रीमन्नाभिभवादिवीर—

चरमाः श्रीजिनाधीश्वराः अनघचेतसे सद्भाय श्रेयांसि अनेनांसि च विदधताम्।

यद्गर्भेतिः–'अहो'! आश्चर्यं विलासमग्नदेवानामपि अत्रागमनत्वाद्। "अहो ही च विस्मये" इत्यमरः (३।४।९)। 'सुपर्वसंततिः' सुपर्वणां शोभनं पर्व–चरितमुत्सवो वा येषां तेषां देवानां संततिः समुदायः। "सुपर्वा ना शरे वंशे पर्व–धूम–सुरेषु च" इति मेदिनी (१७४।६७)। "संततिः स्यात् पङ्क्तौ" गोत्रे पारम्पर्ये च पुत्रपौत्राणाम्" इति मेदिनी (६६।१६८)। 'यद्गर्भागमनोद्भवव्रतवरज्ञानाप्तिभद्रक्षणे' येषां निम्नोक्तजिनेश्वरभगवतां गर्भे–मातृकुक्षौ आगमनम् अवतरणं च उद्भवो जन्म च व्रतं संयमस्वीकृतिः सर्वथा प्राणातिपातादिविरमणलक्षणं वा च वरम् उत्तमम् अप्रतिहतत्वाद् अखिललोकालोकप्रकाशकत्वाच्च ज्ञानं बोधनं तस्य आप्तिः लब्धिश्च भद्रं निर्वाणं च "भद्रं तु मङ्गले ॥४३१॥ मुस्तकश्रेष्ठयोः साधौ, काञ्चने करणान्तरे" इत्यनेकार्थः (२।४३१–३२)। तेषां यः क्षणः काल उत्सवो वा तस्मिन् "क्षणः पर्वोत्सवेऽपि स्यात् तथामानेऽप्यनेहसः" इति मेदिनी (४५।४)। जिनेश्वरपञ्चकल्याणकसमये इत्यर्थः। 'आशु' शीघ्रम्। 'संभूय' मिलित्वा। 'तत्क्षणात्' तस्य प्रभोरवतरणादेः यद्वा स एव क्षणः कालस्तस्मात्। 'महः' उत्सवम् आनन्दस्य प्रकटीकरणं वा। "महः उत्सवतेजसोः" इति मेदिनी (१७२।३०)। 'चक्रे' अकरोत्। 'ते' गीतमहिमानः। 'श्रीमन्नाभिभवादिवीरचरमाः' श्रियः अष्टमहाप्रातिहार्यादियुतसमवसरण–शोभाः अनन्तज्ञानादिसंपदो वा येषां ते नाभेस्तन्नामकुलकरविशेषाद्

भवति जायते वा यः ऋषभदेवाख्यः प्रथमतीर्थपतिरितियावत् । स आदौ येषां ते अजितादिद्वाविंशतिर्जिनेन्द्राः, ते वीरः महावीरदेवः चरमेऽन्तिमे येषां ते चतुर्विंशतिस्तीर्थंकृतः इत्यर्थः । 'श्रीजिनाधीश्वराः' श्रिया तीर्थकृन्नामकर्मोदयप्रादुर्भूतैश्वर्येण युक्ताः जिनानाम् –परमावधिमनःपर्यायसामान्यकेवलिभगवताम् अधीश्वराः स्वामिनः देवाधिदेवा इत्यर्थः । 'अनघचेतसे' न विद्यते अघं पापं दुष्टविचारो वा यस्मिन् तत् पवित्रं चेतः मनोऽन्तरपरिणामो वा यस्य तस्मै । "चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥ ३१ ॥ इत्यमरः (२।४।३१) । 'सङ्घाय' साधुसाध्वीश्रावक श्राविकासमुदायः सङ्घस्तस्मै । 'श्रेयांसि' कल्याणकानि । 'अनेनांसि' न एनांसि पापानि अर्थापत्त्या पुण्यानि । 'चः' समुच्चये । 'विदधताम्' कुर्वतामिति ।

અર્થ— અહો ! (ખરેખર) દેવોના સમૂહે જે (જિનેશ્વરદેવો)નાં ગર્ભાગમન–જન્મ–દીક્ષા– શ્રેષ્ઠજ્ઞાનની પ્રાપ્તિ અને નિર્વાણની ક્ષણે જલ્દીથી ભેગા થઈને તે જ ક્ષણે મહોત્સવ કર્યો હતો. તે શ્રી (ઐશ્વર્યવાળા) નાભિરાજાના પુત્ર (ઋષભદેવ) આદિથી છેલ્લા વીરપ્રભુ સુધીનાં શ્રી જિનેશ્વરદેવો પવિત્ર ચિત્તવાળા સંઘના કલ્યાણને અને પુણ્યને કરો...

समास—

**यद्गर्भागमनोद्भवव्रतवरज्ञानाप्तिभद्रक्षणे**—गर्भे आगमनम्—गर्भागमनम्, (स. त. पु.) वरं च तद् ज्ञानं च—वरज्ञानम्, (वि.पू.क.) वरज्ञानस्य आप्तिः—वरज्ञानाप्तिः, 'कृतिः' ३।१।७७ (ष. त. पु.) गर्भागमनं च उद्भवश्च व्रतं च वरज्ञानाप्तिश्च भद्रं च—गर्भागमनोद्भवव्रतवरज्ञानाप्तिभद्राणि, (इ. द्व.) येषाम् गर्भागमनोद्भवव्रतवरज्ञानाप्ति–

भद्राणि - यद्गर्भागमनोद्भवव्रतवरज्ञानाप्तिभद्राणि, ( ष. त. पु. ) यद्गर्भागमनोद्भवव्रतवरज्ञानाप्तिभद्राणां क्षणः—यद्गर्भागमनोद्भवव्रतवरज्ञानाप्तिभद्रक्षणः, तस्मिन् - यद्गर्भागमनोद्भवव्रतवरज्ञानाप्तिभद्रक्षणे। (ष. त. पु.)

**सुपर्वसंतति**:-सुपर्वणां संततिः-सुपर्वसंततिः। ( ष. त. पु. )

**तत्क्षणात्**:—सः क्षणः—तत्क्षणः, तस्मात्—तत्क्षणात्। (वि.पू.क.)

**श्रीमन्नाभिभवादिवीरचरमाः**—श्रियः सन्ति येषाम्—श्रीमन्तः, 'तदस्या०' ७।२।१....मतु, नाभेः भवः यस्य सः—नाभिभवः, (व्य. ब. व्री. ) नाभिभवः आदौ येषां ते—नाभिभवादयः, ( व्य. ब. व्री. ) वीरः चरमे येषां ते—वीरचरमाः, ( व्य. ब. व्री. ) नाभिभवादयश्च ते वीरचरमाश्च—नाभिभवादिवीरचरमाः, ( वि. पू. क. ) श्रीमन्तः नाभिभवादिवीरचरमाः—श्रीमन्नाभिभवादिवीरचरमाः। ( वि. पू. क. )

**श्रीजिनाधीश्वराः**—अधिका ईश्वराः=अधीश्वराः, ( प्रादि. क. ) जिनानाम् अधीश्वराः—जिनाधीश्वराः, ( ष. त. पु. )

**अनघचेतसे**:-न विद्यते अघं यस्मिन् तत्—अनघम्, (न.ब.व्री.) अनघं चेतः यस्य सः—अनघचेताः, तस्मै—अनघचेतसे ( स. ब. व्री. )

**आगमोद्भवनं-स्वरूपं च विवर्णयन्नाह**

**अर्थात्पूर्वमिदं जगाद जिनपः श्रीवर्धमानाभिधः।**
**तत्पश्चाद् गणनायका व्विरचयांचक्रुस्तरां सूत्रतः॥**
**श्रीमत्तोर्थसमर्थनैकसमये सम्यग्दृशां भूस्पृशाम्।**
**भूयाद् भावुककारकं प्रवचनं चेतश्चमत्कारि यत्॥३॥**

अन्वय–

श्रीमत्तीर्थसमर्थनैकसमये श्रीवर्धमानाभिधः जिनपः पूर्वं यद् अर्थात् जगाद तत्पश्चात् गणनायकाः इदं सूत्रतः विरचयांचकुस्तरां चेतश्चमत्कारि प्रवचनं सम्यग्दृशां भूस्पृशां भावुककारकं भूयाद् ।

अर्थादिति–'श्रीमत्तीर्थसमर्थनैकसमये' श्रीः शोभा अष्टप्रातिहार्यादियुक्तसमवसरणशोभात्मकमैश्वर्यं विद्यते यस्मिन् तस्य तीर्थस्य धर्मस्य सङ्घस्य वा समर्थनं विधानं तस्य एकोऽद्वितीयः समयः कालस्तस्मिन् धर्मप्रवर्तनावसर इत्यर्थः । 'श्रीवर्धमानाभिधः' श्रिया शोभया लक्ष्म्या वा युक्तो वर्धमानः महावीरः इति अभिधा नाम यस्य सः चतुर्विंशतितमो जिनपतिः । 'जिनपः' जिनान् केवलिभगवतः पाति रक्षतीति तीर्थकृद्भगवानित्यर्थः । 'पूर्वम्' प्राक् "पूर्वं तु पूर्वजे ॥५२०॥ प्रागग्रे श्रुतिभेदे च" इत्यनेकार्थः (२।५२०।२१) । 'यत्' निम्नोक्तस्वरूपम् । 'अर्थात्' बोधमात्राद् । 'जगाद' कथितवान् । 'तत्पश्चात्' तस्मात् अर्थस्वरूपेण प्रकटितात् पश्चात्–पश्चिमसमये । "पश्चात् प्रतीच्यां चरमे" इति विश्वः (१८३।१५) । 'गणनायकाः' गणानां साधुवृन्दानां नायकाः स्वामिनः गणधरभगवन्त इत्यर्थः । 'इदम्' अर्थतः प्रकथितवचनं । 'सूत्रतः' सूत्रं वर्णात्मकरचना शब्दतः अर्थबोधो वा तस्मात् । "सूत्रं तु सूचनाकारि ग्रन्थे तन्तुव्यवस्थयोः" ॥४५८॥ इत्यनेकार्थः (२।४५८) । 'विरचयाञ्चकुस्तराम्' प्रशस्तं श्रेष्ठज्ञानकारित्वाद् विरचितवन्तः ग्रन्थस्वरूपीकृतवन्त इत्यर्थः । 'चेतश्चमत्कारि' चेतसां मनसां हृदयानां वा चमत्कारं विस्मयं

करोति विदधातीत्येवंशीलम्, अद्वितीयाऽनेकान्तवादस्य रागद्वेष-विहीनाप्तप्रणीतत्वात्। 'प्रवचनम्' प्रकृष्टानि वचनानि यस्मिन् शास्त्रं मतं वा। "प्रवचनमागमे ॥ १८० ॥ प्रकृष्टवचने" इत्यनेकार्थः (४।१८०।८१)। 'सम्यग्दृशाम्' सम्यग् सत्या निर्मला वा दृग् दृष्टिर्ज्ञानं वा येषां तेषां सम्यक्त्वशालिनामित्यर्थः। "दृक् स्त्रियां दर्शने नेत्रे बुद्धौ च त्रिषु वीक्षके" इति मेदिनी (१६३।८)। 'भूस्पृशाम्' भुवं पृथ्वीं स्पृशन्ति चलनादिक्रियाद्वारेण स्पर्शनां कुर्वन्ति तेषां नराणाम्। "मर्त्यः पञ्चजनो भूस्पृक् पुरुषः पूरुषो नरः" इति हैमः (३।१)। 'भावुककारकम्' भावुकस्य मङ्गलस्य कारकं विधायकं कल्याणकारीत्यर्थः। "भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्" इत्यमरः (१।४।२६)। 'भूयाद्' भवत्विति।

અર્થ— ઐશ્વર્યવાળા આ શાસનની પ્રવર્તનાનાં અપૂર્વ સમયે શ્રીવર્ધમાન નામના તીર્થંકરદેવે પહેલાં જે અર્થથી કહ્યું ત્યારપછી ગણધરભગવંતોએ એની સૂત્રથી અતિશય સુંદર રચના કરી એવો ચિત્તને આશ્ચર્ય કરવાનાં સ્વભાવવાળો આગમ સમ્યગ્દૃષ્ટિ મનુષ્યોનાં કલ્યાણને કરનારો થાઓ....

समास—

**जिनपः**—जिनान् पातीति—जिनपः। स्थापास्नात्रः कः ५।१।१४२ ....क, (उप. त. पु.)

**श्रीवर्धमानाभिधः**—श्रिया युक्तः—श्रीयुक्तः, (तृ.त.पु.) श्रीयुक्तः वर्धमानः—श्रीवर्धमानः, (म. प. लो. क.) श्रीवर्धमानः अभिधा यस्य सः—श्रीवर्धमानाभिधः। (स. ब. व्री.)

**तत्पश्चात्**:—तस्मात् पश्चात्—तत्पश्चात्। (पं. त. पु.)

**गणनायकाः**—गणानां नायकाः—गणनायकाः। (ष. त. पु.)

**श्रीमत्तीर्थप्रवर्तनैकसमये** :–श्रियः विद्यन्ते यस्मिन्–श्रीमत्, 'तदस्या०' ७।२।१...मतु, श्रीमत् च तद् तीर्थञ्च–श्रीमत्तीर्थम्, (वि.पू.क.) श्रीमत्तीर्थस्य प्रवर्तनम्–श्रीमत्तीर्थप्रवर्तनम्, 'कृति' ३।१।७७ (ष. त. पु.) एकश्चासौ समयश्च–एकसमयः, 'पूर्वकालैक०' ३।१।१०० (वि. पू. क.) श्रीमत्तीर्थप्रवर्तनस्य एकसमयः–श्रीमत्तीर्थप्रवर्तनैकसमयः, तस्मिन्–श्रीमत्तीर्थप्रवर्तनैकसमये। (ष. त. पु.)

**सम्यग्दृशाम्** :–सम्यग् दृक् येषां ते–सम्यग्दृशः, तेषां–सम्यग्दृशाम्। (स. ब. व्री.)

**भूस्पृशाम्** :–भुवं स्पृशन्ति–भूस्पृशः, तेषां–भूस्पृशाम्। (उप.त.पु.) 'क्विप्' ५।१।१४७....क्विप्।

**भावुककारकम्** :–भावुकं करोतीति–भावुककारकम् 'णकतृचौ' ५।१।४८....णक, (उप. त. पु.)

**प्रवचनम्** :–प्रकृष्टानि वचनानि यस्मिन् तद्–प्रवचनम्। (प्रादि. ब. व्री.)

**चेतश्चमत्कारि** :–अचमत् चमत् करोतीति–चमत्कारि, (गति. त. पु.) चेतसः चमत्कारि–चेतश्चमत्कारि। (ष. त. पु.)

**सिद्धायिकास्वरूपवर्णनम्–**

**श्रीतीर्थाधिपतीर्थभावनपरा सिद्धायिका देवता।**
**चञ्चच्चक्रधरा सुरासुरनता पायादसौ सर्वदा।**
**अर्हच्छ्रीजिनचन्द्रगीःसुमत(ति)तो भव्यात्मनः प्राणिनः।**
**या चक्रेऽवमकष्टहस्तिमथने शार्दूलविक्रीडितम् ॥४॥**

अन्वय–

या अर्हच्छ्रीजिनचन्द्रगीःसुमत( ति )तः भव्यात्मनः प्राणिनः अवमकष्टहस्तिमथने शार्दूलविक्रीडितं चक्रे असौ चञ्चच्चक्रधरा: सुरासुरनता श्रीतीर्थाधिपतीर्थभावनपरा सिद्धायिका देवता सर्वदा पायाद् ।

श्रीतीर्थाधिपेति–' या " निम्नवर्णितस्वरूपा सिद्धायिका वा । ' अर्हच्छ्रीजिनचन्द्रगीःसुमत( ति )तः ' अर्हतस्तीर्थकृतः श्रिया प्रातिहार्यादिबाह्यया दूरीकृतजनाऽखिलापायात्मिकाभ्यन्तरी–शोभया समेतः जिनेषु सामान्यकेवलिभगवत्सु चन्द्रः शशाङ्क इव तस्य जिनेश्वरदेवस्य वा या गीः वाणी ' गीः स्त्री भाषा–सरस्वत्योः ' इति मेदिनी ( १२४।२३ )। तया कृता शोभना मति बुद्धिस्तस्याः, यद्वा तया कृतं शोभनं शुभं मतम् आशयस्तस्माद् । ' भव्यात्मनः ' भव्यः सुन्दरतमः मोक्षप्रदजिनधर्मप्राप्तत्वाद् आत्मा यत्नः स्वभावः धैर्य वा यस्य तस्य । " आत्मा यत्नो धृति बुद्धिःस्वभावो ब्रह्म वर्ष्म च ' इत्यमरः ( ३।३।१०९ )। प्राणिनः' जीवस्य । ' अवमकष्टहस्तिमथने ' अवमैः अधमैः क्षुद्रजनै र्वा कृतानि कष्टानि दुःखानि एव हस्तिनः गजास्तेषां मथने दूरीकरणे । " निकृष्ट–प्रतिकृष्टाऽर्वा–रेफयाप्यावमाधमाः । " इत्यमरः ( ३।१।५४ )। ' शार्दूलविक्रीडितम् ' शार्दूलस्य सिंहस्य विक्रीडितम् क्रीडनं चेष्टास्वरूपं वा सुकरत्वाद् । " शार्दूलो राक्षसान्तरे। व्याघ्रे च पशुभेदे च सत्तमे तूत्तरस्थितः "। इति मेदिनी ( १५४।१३७ )। ' चक्रे ' अकरोत् । ' असौ ' एषा । ' चञ्चच्चक्रधरा ' चञ्चत् चञ्चलं भ्राम्यद् वा चक्रम् आयुधविशेषं धरति गृण्हातीति । सुरासुरनता ' सुष्ठु राजन्ते–सुराः "क्वचिद्"

( सि–५।१।१७१ )....डः, सुन्वन्ति सेवकदुःखमिति सुराः, “ ऋज्यजितश्वि०” ( उणादि–३८८ )....किन् रः, “ सुरत् ऐश्वर्य-दीप्त्योः ” सुरन्ति दीप्यन्ते–सुराः, “ नाम्युपान्त्य०” ( सि० ५।१।५४)....कः, सुष्ठु रान्ति भक्तवाञ्छितमिति सुराः, “उपसर्गा-दातो. ” ( सि०५।१।५६ )....डः, तैः देवैश्च असुरैः दानवैश्च नता नमस्कृता। ‘ श्रीतीर्थाधिपतीर्थभावनपरा ’ श्रिया आर्हन्तीलक्ष्म्या युक्ताः तीर्थं धर्मलक्षणं साधुसाध्वीश्रावकश्राविकास्वरूपं वा अधिकं पान्ति रक्षन्तीति तीर्थंकरभगवन्त इत्यर्थः। तेषां तीर्थस्य पुण्यक्षेत्रस्य चतुर्विधसङ्घस्य वा भावने चिन्तायाम् अपायदूरीकरण–शीलत्वात् परा श्रेष्ठा। “ परो दूरान्यश्रेष्ठशत्रुषु ” इत्यनेकार्थः ( २।४२५ )। ‘ सिद्धायिका ’ सिद्धाः निष्पन्ना आया लाभा यस्याः–सिद्धायिका महावीरप्रभोस्तन्नामशासनदेवी। ‘ देवता ’ देवी एव देवता। “ नामगृहणे लिङ्गविशिष्टस्याऽपि ग्रहणमिति न्यायात् “ देवात्तल् ” ( सि० ७।२।१६२ )....तल्। ‘ सर्वदा ’ सर्वस्मिन् काले सदा वा। पायाद् रक्षन्तु।

અર્થ— જેણીએ અરિહંતની લક્ષ્મી વડે યુક્ત, વીતરાગદેવમાં ચંદ્રસમાન ( જિનેશ્વરદેવ )ની વાણીવડે, સારી બુદ્ધિથી ભવ્ય છે આત્મા જેનો એવા પ્રાણિઓનાં અધમજનો વડે કરાયેલા કષ્ટરૂપી હાથીઓનું મથન કરવામાં સિંહની ક્રીડા જેવું વર્તન કર્યું એ ચંચલચક્રને ધારણ કરનારી, દેવો અને દાનવોવડે નમન કરાયેલી, શ્રી તીર્થંકર પરમાત્માનાં તીર્થની ચિંતામાં તત્પર એવી સિદ્ધાયિકાદેવી હંમેશા રક્ષણ કરો...

समास–

**श्रीतीर्थाधिपतीर्थभावनपरा :**–श्रिया युक्ताः–श्रीयुक्ताः, (तृ.त.पु.) अधिकं पान्तीति–अधिपाः, ‘स्थापास्नात्रः कः ५।१।१४२....क,

तीर्थस्य अधिपाः—तीर्थाधिपाः,(ष.त.पु.)श्रीयुक्ताः तीर्थाधिपाः—श्रीतीर्थाधिपाः, (म. प. लो. क.) श्रीतीर्थाधिपानां तीर्थः—श्रीतीर्थाधिपतीर्थः, (स. त. पु.) श्रीतीर्थाधिपतीर्थस्य भावनम्—श्रीतीर्थाधिपतीर्थभावनम्, "कृति" ३।१।७७ (ष.त.पु.) श्रीतीर्थाधिपतीर्थभावने परा—श्रीतीर्थाधिपतीर्थभावनपरा (स.त.पु.)

**चञ्चच्चक्रधरा** :-चञ्चच्च तच्चक्रं च-चञ्चच्चक्रम् ( वि. पू. क. ) चञ्चच्चक्रं धरतीति-चञ्चच्चक्रधरा। ( उप. त. पु. ) " आयुधादिभ्यो० " ५।१।९४ ....अच्,.

**सुरासुरनता** :—सुराश्च असुराश्च एतेषां समाहारः—सुरासुरम् (स.द्व.) सुरासुरेण नता—सुरासुरनता। (तृ.त.पु.)

**अर्हच्छ्रीजिनचन्द्रगीःसुमति(त)त** :—अर्हतः श्रीः—अर्हच्छ्रीः, (ष. त. पु.) अर्हच्छ्रिया युक्तः--अर्हच्छ्रीयुक्तः, (तृ. त. पु.) जिनेषु चन्द्रः इव—जिनचन्द्रः, " सिंहाद्यैः पूजायाम् " ३।१।८९ ( स. त. पु. ) अर्हच्छ्रीयुक्तः जिनचन्द्रः—अर्हच्छ्रीजिनचन्द्रः, (म. प. लो. क.) अर्हच्छ्रीजिनचन्द्रस्य गीः—अर्हच्छ्रीजिनचन्द्र गीः, (ष.त.पु.) शोभना मतिः—सुमतिः, (सु. पू. त. पु.) अर्हच्छ्रीजिनचन्द्रगिरा ( कृता ) सुमतिः—अर्हच्छ्रीजिनचन्द्रगीःसुमतिः, तस्याः—अर्हच्छ्रीजिनचन्द्रगीःसुमतितः। " तृतीया० " ३।१।६५ ( तृ. त. पु. ) " अहीयरुहोऽपादाने " ७।२।८८...तस्।

**भव्यात्मन** :—भव्यः आत्मा यस्य सः—भव्यात्मा, तस्य—भव्यात्मनः। ( स. ब. व्री. )

**प्राणिनः**—प्राणाः सन्ति यस्य—प्राणी, तस्य—प्राणिनः। 'अतोऽनेक०' ७।२।६ इन्,

**अवमकष्टहस्तिमथने** – अवमैः जनितम्—अवमजनितम्, (तृ.त.पु.) अवमजनितं कष्टम्—अवमकष्टम्, (म. प. लो. क.) अवमकष्टमेव

हस्ती—अवमकष्टहस्ती, (अव. पू. क.) अवमकष्टहस्तिनः मथनम्—अवमकष्ट-हस्तिमथनम्, तस्मिन्—अवमकष्टहस्तिमथने। 'कृति' ३।१।७७ (ष.त.पु.)

शार्दूलविक्रीडितम् :—शार्दूलस्य विक्रीडितम्—शार्दूलविक्रीडितम् तत्—शार्दूलविक्रीडितम। 'कृति' ३।१।७७ (ष. त. पु.)

## स्नातस्यापादपूर्ति—श्रीवीरजिनस्तुतिः

(शार्दूलविक्रीडितवृत्तम्)

श्रीवीरजिनजन्ममहोत्सववर्णनात्मिकेयं स्तुतिः

**स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावली,—**
**रङ्गत्कान्तिकरम्बितादभुतनखश्रेणीसमुज्जृम्भितम्।**
**सिद्धार्थाङ्गरुहस्य कीर्तितगुणस्याङ्घ्रिद्वयं पातु वः,**
**स्नातस्याऽप्रतिमस्य मेरुशिखरे शच्या विभोः शैशवे॥१॥**

अन्वय—

शैशवे मेरुशिखरे शच्या स्नातस्य अप्रतिमस्य कीर्तितगुणस्य सिद्धार्थाङ्गरुहस्य विभोः स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावलीरङ्गत्कान्तिकरम्बितादभुतनखश्रेणीसमुज्जृम्भितम् अङ्घ्रिद्वयं वः पातु।

स्फूर्जदिति—'शैशवे' शिशोः भावः कर्म वा तस्मिन् बाल्य-काले। "शिशुत्वं शैशवं बाल्यम्" इत्यमरः (२।६।४०)। 'मेरुशिखरे' मेरोः स्वर्णगिरेः तन्नामपर्वतविशेषस्य वा "मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः इत्यमरः" (१।१।४९)। शिखरे शृङ्गे उपरितनभागे वा। 'शच्या' इन्द्राण्या उपलक्षणत्वात् इन्द्रै-रित्यपि ज्ञेयम्। "शचीन्द्राणी शतावर्योः" इत्यनेकार्थः (२।५९)।

'स्नातस्य' स्नापितस्य स्नाधातोरकर्मकत्वाद् अत्र तु विभोः इति कर्म विद्यते अत एव स्नातमध्ये अन्तर्भूतण्यर्थोऽवबोध्यः। 'अप्रतिमस्य' नास्ति प्रतिमा उपमा यस्य तस्य अनुपमस्य अतुलस्य वा। 'कीर्तितगुणस्य' कीर्तिता सुरासुरनरैः संस्तुता गुणाः शौर्यादयः प्रशमादयो वा यस्य तस्य। 'सिद्धार्थाङ्गरुहस्य' सिद्धाः अर्थाः पुरुषार्थाः धर्मार्थकाममोक्षलक्षणाः यस्य स सिद्धार्थः क्षत्रियकुण्डनरेशः श्रीवीरजिनपिता तस्य अङ्गाद् गात्रात् रोहति प्रभवतीति मूलविभुजादित्वात्कः अङ्गरुहः पुत्रस्तस्य श्रीमहावीरजिनेन्द्रस्य। 'विभोः' प्रभोः। 'स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावलीरङ्गत्कान्तिकरम्बिताद्भुतनखश्रेणिसमुज्जृम्भितम्' स्फूर्जन्तः प्रमोदप्रकटीकरणाय परस्परं वज्रादिशस्त्रास्फालनेन ध्वनिं कुर्वन्तः भक्त्या आन्तरिकानुरागेण "अथ सेवा भक्तिः परिचर्या प्रसादना" इति हैमः (३।१६०)। नताः प्रह्वीभूता वन्दिता वा ये इन्द्राः स्वर्गाधिपाः "इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः" इत्यमरः (१।१।४४)। तेषां शीर्षेषु मस्तकेषु विलसन्ति शोभमानानि यानि कोटीराणि मुकुटाः "मौलिः कोटीरमुष्णिषं किरीटं मुकुटोऽस्त्रियाः" इति वैजयन्ती ॥ १३५ ॥। तेषां रत्नानि वैडूर्याद्यनेकविधानि तेषाम् आवल्या पङ्क्त्या रङ्गन्ती रङ्ग इव आचरन्ती विविधरङ्गिणी वा या कान्तिः प्रभा तया करम्बिताः करम्बः मिश्रणः सञ्जातो येषां मिश्रिताः येऽद्भुता अनुपमा सौन्दर्योपेता वा नखाः पादरुहाः "नखः करजषष्ठयोः" इत्यनेकार्थः (२।२२)। तेषां श्रेण्या पङ्क्त्या समुज्जृम्भितं प्रकाशितम्। 'अङ्घ्रिद्वयम्'—अङ्घ्रयोश्चरणयोः द्वयं द्विकं। 'वः' युष्मान्। 'पातु' रक्षतु। इदं पद्यद्वयं शार्दूलविक्रीडितवृत्तम् तल्लक्षणं तु पूर्वोक्तम्।

**અર્થ**— બાલ્યકાલમાં મેરુપર્વતનાં શિખર ઉપર ઈન્દ્રાણીવડે સ્નાન કરાયેલ, અદ્વિતીય સ્તુતિ કરાયેલા છે ગુણો જેના એવા શ્રી સિદ્ધાર્થ રાજાનાં પુત્ર (વર્ધમાનસ્વામિ) પ્રભુનાં, (વજ્રનાં) અવાજને કરતા ભક્તિથી નમેલા ઈન્દ્રોનાં મસ્તકને વિષે શોભતાં મુગુટોનાં રત્નોની પંક્તિ વડે કરીને રંગીનકાંતિથી મિશ્રિત થયેલ અદ્ભુત નખોની શ્રેણિથી પ્રકાશિત થયેલ ચરણયુગલ તમારૂં રક્ષણ કરો...

**समास**—

**स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावलीरञ्जत्कान्तिकरम्बिताद्भुतनखश्रेणीसमुज्जृम्भितम्**-भक्त्या नताः—भक्तिनताः, (तृ.त.पु.) स्फूर्जन्तः भक्तिनताः स्फूर्जद्भक्तिनताः, (वि.उभ.क.) स्फूर्जद्भक्तिनताश्चामी इन्द्राश्च—स्फूर्जद्भक्तिनतेन्द्राः, (वि. पू. क.) स्फूर्जद्भक्तिनतेन्द्राणां-शीर्षाणि—स्फूर्जद्भक्तिनतेन्द्रशीर्षाणि, (ष.त.पु.) विलसन्ति कोटीराणि—विलसत्कोटीराणिः, (वि.पू.क.) स्फूर्जद्भक्तिनतेन्द्रशीर्षेषु विलसत्कोटीराणिः—स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीराणिः, (स. त. पु.) स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीराणां रत्नानि—स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नानि, (ष.त.पु.)स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नानाम् आवली—स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावली, (ष. त. पु.) रञ्जन्ती कान्तिः—रञ्जत्कान्तिः, (वि.पू.क.)स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावल्या (कृता) रञ्जत्कान्तिः—स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावलीरञ्जत्कान्तिः, "तृतीया तत्कृतैः" ३।१।६५ (तृ. त. पु.) करम्बः सञ्जातः येषां—करम्बिताः, "तदस्य सञ्जातं०" ७।१।१३८....इत, स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावलीरञ्जत्कान्त्या करम्बिताः—स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावलीरञ्जत्कान्तिकरम्बिताः, (तृ.त.पु.) नास्ति खं येषु ते—नखाः, (न.ब.व्री.) अद्भुताश्चामी नखाश्च—अद्भुतनखाः, (वि.पू.क.) स्फूर्जद्भक्तिनतेन्द्र-

शीर्षविलसत्कोटीररत्नावलीरञ्जत्कान्तिकरम्बिताः अद्भुतनखाः—स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावलीरञ्जत्कान्तिकरम्बिताद्भुतनखाः, (वि.पू.क.) स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावलीरञ्जत्कान्तिकरम्बिताद्भुतनखानां श्रेणी—स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावलीरञ्जत्कान्तिकरम्बिताद्भुतनखश्रेणी, ( ष. त. पु. ) स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावलीरञ्जत्कान्तिकरम्बिताद्भुतनखश्रेण्या समुज्जृम्भितम्—स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावलीरञ्जत्कान्तिकरम्बिताद्भुतनखश्रेणीसमुज्जृम्भितम् । (तृ.त.पु.)

**सिद्धार्थाङ्कुरुहस्यः**—अङ्काद् रोहतीति—अङ्करुहः, ( उप. त. पु. ) सिद्धार्थस्य अङ्करुहः—सिद्धार्थाङ्करुहः,—तस्य—सिद्धार्थाङ्करुहस्य । (ष.त.पु.)

**कीर्तितगुणस्यः**—कीर्तिताः गुणाः यस्य स—कीर्तितगुणः, तस्य—कीर्तितगुणस्य । ( स. ब. व्री. )

**अङ्घ्रिद्वयम्ः**—द्वौ प्रकारौ यस्य—द्वयम्, ‘ द्वित्रिभ्याम्० ’ ७।१।१५२....अयट्, अङ्घ्र्योः द्वयम्—अङ्घ्रिद्वयम् । ( ष. त. पु. )

**मेरुशिखरेः**—मेरोः शिखरम्—मेरुशिखरम्, तस्मिन्—मेरुशिखरे । ( ष. त. पु. )

जन्माभिषेकवर्णनात्मिका स्तुतिः

**श्रेयःशर्मकृते भवन्तु भवतां सर्वेऽपि तीर्थाधिपाः,**
**येषां जन्ममहः कृतः सुरगिरौ वृन्दारकैः सादरैः ।**
**पौलोमीस्तनगर्वखण्डनपरैः कुम्भैः सुवर्णोद्भवैः,**
**हंसांसाहतपद्मरेणुकपिशक्षीरार्णवाम्भोभृतैः ॥२॥**

अन्वय—

सुरगिरौ सादरैः वृन्दारकैः पौलोमीस्तनगर्वखण्डनपरैः सुवर्णो-

द्भवैः हंसांसाहतपद्मरेणुकपिशक्षीरार्णवाम्भोभृतैः कुम्भैः येषां जन्ममहः कृतः (ते) सर्वे अपि तीर्थाधिपाः भवतां श्रेयःशर्मकृते भवन्तु ।

( २-५- ) श्रेयःशर्मकृत इति–'सुरगिरौ' सुराणां देवानां गिरौ पर्वते मेरुपर्वते। 'सादरैः' आदरेण सह वर्तन्ते ये तैः भक्तिभावभृतैरित्यर्थः। 'वृन्दारकैः' प्रशस्तं वृन्दमस्ति येषां तैः "वृन्दादारकः" ( सि० ७।२।११ ) इति आरकः, अमरैः। "वृन्दारको मनोरमे ॥ ३४ ॥ सुरे श्रेष्ठे" इत्यनेकार्थः (४।३४। ३५) 'पौलोमीस्तनगर्वखण्डनपरैः' पौलोम्याः पुलोम्नः मुनेरपत्यं स्त्री–पौलोमी इन्द्राणी "बाह्वादिभ्यो गोत्रे" (सि–६।१।३२) इति इञ्, "इञ इतः" (सि–२।४।७१) इति ङी च तस्याः "प्रिया शचीन्द्राणी पौलोमी जयवाहिनी" इति हैमः (२।८९)। स्तनयोः पयोधरयोः "स्तनौ कुचौ पयोधरौ" इति हैमः (३। २६७)। यो गर्वः दर्पः अहं सर्वोपर्यस्मीत्याकारकमिथ्याभिमानो वा "अभिमानस्त्वहङ्कारो गर्वोऽस्त्री" इति वैजयन्ती। तस्य खण्डने विनाशने परैः कुशलैः। 'सुवर्णोद्भवैः' सुवर्णाद् कनकाद् उद्भवः उत्पत्तिर्येषां तैः हेममयैरित्यर्थः। 'हंसांसाहतपद्मरेणुकपिशक्षीरार्णवाम्भोभृतैः' हंसानां श्वेतशकुनीनां तन्नामपक्षिविशेषाणां वा, "हंसः स्यान्मानसौकसि। निर्लोभनृपविष्णवर्कपरमात्मन्यमत्सरे। योगभेदे मन्त्रभेदे शारीरमरुदन्तरे॥ तुरंगमप्रभेदे च इति मेदिनी ( १७०।१२–१४। ) अंसैः अवयवैः उपलक्षणात् पक्षैः अत्र तु हंसस्यैकावयवविशेषः पक्षो गृह्यते उड्डयनक्रियायां पक्षप्रसारणत्वात्, आहतानि ताडितानि यानि पद्मानि कमलानि "पद्म व्यूहे निधावब्जे। संख्याब्जयोः पद्मसिभविन्दौ" इत्यनेकार्थः ( २।३२१ )। तेषां रेणुभिः परागकणैः कृतानि कपिशानि पिङ्गलानि कृष्णपीतवर्णमिश्रितानि वा "पिशङ्गः कपिशो

हरिः " इति हैमः ( ६।३२ )। क्षीरार्णवस्य–क्षीरवत् अर्णः यस्मिन् क्षीरार्णवः क्षीरसमुद्रस्तस्य अम्भोभिः नीरैः भृतैः ' पूर्णैः ' कुम्भैः कलशैः " कुम्भो राश्यन्तरे हस्तिमूर्धांशे राक्षसान्तरे कार्मुके वार-नार्यां च घटे क्लीबं तु गुग्गुलौ ॥ इति मेदिनी (१०६।२–३) ' येषाम् ' ये भूतास्तीर्थकृद्भगवन्तस्तेषाम् । ' जन्ममहः '–जन्मनि जननकाले यो महः उत्सवः । " महः उद्धव उत्सवः " इत्यमरः । ( १।७।३८ ) । प्रादुर्भूतप्रमोदप्रकटीकरणाय सर्वशक्रैः स्वस्व–परिवारपरिवृतैः जिनजन्माभिषेकलक्षणो महोत्सवः ।'कृतः' रचितः विहितो वा । ' सर्वे ' समस्ताः " सर्वं समस्तमन्यूनं समग्रं सकलं समम् " इति हैमः ( ६।६१ ) । ' अपि ' समुच्चयार्थे " गर्हा–समुच्चय–प्रश्न–शङ्का–सम्भावनास्त्वपि " इत्यमरः ( ३।३।२४८ ) । " तीर्थाधिपाः " तीर्थस्य साधुसाध्वीश्रावकश्राविकालक्षणस्य पुण्यक्षेत्रस्य वा अधिकं पान्ति रक्षन्तीति अधिपाः स्वामिनः तीर्थ-करभगवन्त इत्यर्थः । ' भवताम् ' युष्माकम् । 'श्रेयःशर्मकृते' श्रेयः प्रशस्यतमं परमं वा " श्रेयान् श्रेष्ठः पुष्कलः स्यात् सत्तमश्चाति–शोभने " इत्यमरः ( ३।१।५८ ) । तादृशं शर्म सुखम् , यद्वा श्रेयो मोक्षः ' श्रेयो मुक्तौ शुभे धर्मेऽतिप्रशस्ते च वाच्यवत् । " इति मेदिनी ( १७३।४३ )। तस्य शर्म सुखं तस्य कृते प्रयोजनं । ' भवन्तु ' सन्तु ।

અર્થ—મેરૂગિરિ ઉપર સાદર–ભક્તિવાળા દેવોવડે ઇન્દ્રાણીનાં સ્તનનાં ગર્વનું ખંડન કરવામાં તત્પર, સુવર્ણમાંથી બનેલા, હંસોની પાંખોવડે ચારે બાજુથી હણાયેલા કમલોની રજથી કાબરચિતરાવર્ણ-વાળા ક્ષીરસમુદ્રનાં જલથી ભરાયેલ, કલશોવડે જેઓ (તીર્થંકરદેવો)નો જન્મમહોત્સવ કરાયો હતો તે સર્વે પણ તીર્થંકર ભગવંતો આપના મોક્ષસુખને કરવા માટે હો ( થાઓ ).

समास—

**श्रेयःशर्मकृते**:—श्रेयसः शर्म—श्रेयःशर्म, (ष.त.पु.) श्रेयःशर्मणः कृते—श्रेयःशर्मकृते....( ष. त. पु. ) ( उप. त. पु. )

**तीर्थाधिपाः**—अधिकं पातीति—अधिपाः, 'स्थापा०' ५।१।१४२...क ( उप. त. पु. ) तीर्थानाम् अधिपाः—तीर्थाधिपाः। ( ष. त. पु. )

**जन्ममह**:—जन्मनः महः—जन्ममहः। ( ष. त. पु. )

**सुरगिरौ**:—सुराणां गिरिः—सुरगिरिः, तस्मिन्—सुरगिरौ। (ष.त.पु.)

**सादरै**:—आदरेण सह वर्तन्ते ये ते—सादराः, तैः—सादरैः। ( सह. ब. व्री. )

**पौलोमीस्तनगर्वखण्डनपरैः**—पौलोम्याः स्तनौ—पौलोमीस्तनौ, (ष. त. पु. ) पौलोमीस्तनयोः गर्वः—पौलोमीस्तनगर्वः, ( ष. त. पु. ) पौलोमीस्तनगर्वस्य खण्डनम्—पौलोमीस्तनगर्वखण्डनम्, 'कृति' ३।१।७७... ( ष. त. पु. ) पौलोमीस्तनगर्वखण्डने पराः—पौलोमीस्तनगर्वखण्डनपराः, तैः—पौलोमीस्तनगर्वखण्डनपरैः। ( स. त. पु. )

**सुवर्णोद्भवैः**—सुवर्णाद् उद्भवः येषां ते—सुवर्णोद्भवाः तैः—सुवर्णोद्भवैः ( व्य. ब. व्री. )

**हंसांसाहतपद्मरेणुकपिशक्षीरार्णवाम्भोभृतै**:—हंसानाम् अंसाः—हंसांसाः, ( ष. त. पु. ) हंसांसैः आहतानि—हंसांसाहतानि ( तृ. त. पु. ) हंसांसाहतानि पद्मानि—हंसांसाहतपद्मानि, (वि. पू. क.) हंसांसाहतपद्मानां रेणवः—हंसांसाहतपद्मरेणवः, ( ष. त. पु. ) हंसांसाहतपद्मरेणुभिः (कृतानि) कपिशानि—हंसांसाहतपद्मरेणुकपिशानि, 'तृतीया०' ३।१।६५ (तृ.त.पु.) क्षीरवत् अर्णः यस्मिन्सः—क्षीरार्णवः, "तमिस्राऽर्णव—ज्योत्स्ना" ७।२।५२...

मत्वर्थे व, क्षीरार्णवस्य अम्भांसि—क्षीरार्णवाम्भांसि, (ष. त. पु.) हंसांसाहतपद्मरेणुकपिशानि क्षीरार्णवाम्भांसि,— हंसांसाहतपद्मरेणुकपिशक्षीरार्णवाम्भांसि, (वि.पू.क.) हंसांसाहतपद्मरेणुकपिशक्षीरार्णवाम्भोभिः भृताः—हंसांसाहतपद्मरेणुकपिशक्षीरार्णवाम्भोभृताः, तैः—हंसांसाहतपद्मरेणुकपिशक्षीरार्णवाम्भोभृतैः। (तृ. त. पु.)

( स्रग्धरावृत्तम् )

आर्हतागमस्य अनेकोपमानं विवर्णयिषुराह—

**सेवे सिद्धान्तमुद्यत्सकलमुनिजनप्रार्थिताऽमर्त्यरत्नम्,**
**गर्जद्वाचाटवादिद्विरदघनघटादर्पकण्ठीरवाभम् ।**
**मिथ्याधर्मान्धकारे स्फुटविकटकरादित्यमल्पप्रभं नो,**
**अर्हद्वक्त्रप्रसूतं गणधररचितं द्वादशाङ्गं विशालम् ॥३॥**

अन्वय—

उद्यत्सकलमुनिजनप्रार्थितामर्त्यरत्नं, गर्जद्वाचाटवादिद्विरदघनघटादर्पकण्ठीरवाभं, मिथ्याधर्मान्धकारे नो अल्पप्रभं स्फुटविकटकरादित्यम्, अर्हद्वक्त्रप्रसूतं, गणधररचितं, विशालं, द्वादशाङ्गं सिद्धान्तं सेवे।

(२–५) सेव इति– 'उद्यत्सकलमुनिजनप्रार्थिताऽमर्त्यरत्नम्' उद्यद्भिः यतमानैः प्रबलम् उद्यमं कुर्वद्भि र्वा सकलैः सर्वैः मुनिभिः श्रमणैः तैरेव जनैः लोकैः यद्वा तैश्च जनैश्च इति कर्मधारयो द्वन्द्वो वा प्रार्थितं याचितम् अमर्त्यानां देवानाम् अमर्त्यैः र्वा अधिष्ठितं रत्नं माणिक्यम् चिन्तामणितुल्यमित्यर्थः। 'गर्जद्वाचाटवादिद्विरदघनघटादर्पकण्ठीरवाभम्' गर्जन्तः उच्चैरुच्चारन्तः

मिथ्याज्ञानजनितगर्वेणाहं ज्ञानीति यत्रतत्रोद्घोषयन्तो वा ये वाचाटाः बहुगर्ह्यवाचः यद्वा तद्वा भाषिणः इत्यर्थः, 'स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाग्' इत्यमरः ( ३।१।३६ )। तादृशा ये वादिनः वादशीलाः त एव द्विरदाः हस्तिनः यथा द्विरदा मानाभिभूतास्तथैव वादिनोऽपि अहङ्कारपूर्णा एतत्तु सादृश्यम्, तेषां घना सान्द्रा या घटा संततिः "करिणां घटना घटा" इति हैमः (४।२८९)। तस्याः दर्पः गर्वः "दर्पोऽभिमानो ममतामानश्चित्तोन्नतिः स्मयः" इति हैमः ( २।२३१ )। तस्य विदारणे कण्ठीरवः कण्ठे रवः यस्य पृषोदरादित्वात्साधुः, सिंह इव आभाति अनुभवचक्षुषा दृश्यते तम् "कण्ठीरवो मृगरिपु मृगदृष्टिर्मृगाशनः" इत्यमरः ( २।५।१ )। 'मिथ्याधर्मान्धकारे'—मिथ्या वितथोऽज्ञानमयः यो धर्मः यज्ञयागादिलक्षणः आचारः स एव अन्धकारस्तमः यद्वा मिथ्याधर्मेण प्रसारितोऽन्धकारस्तस्मिन्। 'नो अल्पप्रभम्' नो नैव निषेधवाचकः अल्पा स्तोका मनाग् वा प्रभा कान्तिर्यस्य तम् किन्तु तादृशं नैव विरोधार्थस्त्विदम्—अतिकान्तिमन्तमित्यर्थः। 'स्फुटविकटकरादित्यम्' स्फुटाः व्यक्ताः प्रकाशिता वा विकटाः विस्तृताः प्रचण्डा वा "विकटः कराले पृथुरम्ययोः" इत्यनेकार्थः ( ३।१६० )। कराः किरणाः यस्य तादृश आदित्यः सूर्य इव तम्। 'अर्हद्वक्त्रप्रसूतम्' अर्हन्ति चतुस्त्रिंशदतिशयान् सुरेन्द्रादिकृतपूजामित्यर्हन्तः "अर्हन् स्यात् पूज्ये तीर्थंकरेपि च" इत्यनेकार्थः ( २।१५५ )। जिनेश्वरास्तेषां वक्त्रेभ्यः मुखेभ्योऽर्थतः प्रसूतं प्रादुर्भूतं प्रकटितं वा। 'गणधररचितम्' गणान् धरन्तीति गणधराः "आयुधादिभ्यो धृगोऽदण्डादेः" (सि.५।१।९४) इत्यच्, गणनायकाः तैः रचितम् आरब्धं सूत्रितं वा। 'विशालम्' महत्तमम्। 'द्वादशाङ्गम्' द्वाभ्याम् अधिका दश द्वादश तेषाम् आचारादीनां दृष्टिवादपर्यन्तानाम्

अङ्गानां समाहारस्तेषां नामानि त्विमानि—"आचाराङ्गं सूत्रकृतं स्थानाङ्गं समवाययुक् । पञ्चमं भगवत्यङ्गम् ज्ञाताधर्मकथापि च ॥ १५७ ॥ उपासकान्तकृदनुत्तरोपपातिकाद् दशाः । प्रश्नव्याकरणं चैव विपाकश्रुतमेव च ॥ १५८ ॥ इत्येकादश सोपाङ्गान्यङ्गानि द्वादशं पुनः । दृष्टिवादो द्वादशाङ्गी स्यात्" इति हैमः (२।१५७–१५८–१५९)। तादृशं 'सिद्धान्तम्' आगमम्। 'सेवे पर्युपासे उपासनां कुर्वे। एतत्पद्यद्वयं स्रग्धरावृत्तम् तल्लक्षणं तु पूर्वोक्तम् ।

અર્થ— ઉદ્યમ કરતા સમસ્ત મુનિલોકવડે અથવા... મુનિઓવડે અને લોકો વડે પ્રાર્થના કરાયેલ દેવોનાં રત્ન (ચિંતામણિરત્ન) સમાન, ગર્જના કરતા અને વાચાલ એવા વાદિઓરૂપી હાથીઓનાં ગાઢ સમૂહના અહંકારને દૂર કરનાર સિંહ સરખા, ખોટા ધર્મરૂપી અંધકારને વિષે અલ્પ પ્રભા નથી જેની એવા (અત્યંત પ્રભાવાળા) પ્રકાશિત અને વિસ્તાર પામેલા છે કિરણો જેના એવા સૂર્ય સમાન, અરિહંતપ્રભુનાં મુખથી જન્મ પામેલ,. ગણધરદેવ વડે રચાયેલ, વિશાલ, દ્વાદશાંગીરૂપ સિદ્ધાંતને હું સેવું છું...

समास—

**उद्यत्सकलमुनिजनप्रार्थितामर्त्यरत्नम्** :—मुनिश्चासौ जनश्च—मुनिजनः, (वि. पू. क.) सकलः मुनिजनः—सकलमुनिजनः, (वि. पू. क.) उद्यंश्चायं सकलमुनिजनश्च—उद्यत्सकलमुनिजनः, (वि. पू. क.) उद्यत्सकलमुनिजनेन प्रार्थितम्—उद्यत्सकलमुनिजनप्रार्थितम्, (तृ. त. पु.) अमर्त्यैन अधिष्ठितम्—अमर्त्याधिष्ठितम्, (तृ. त. पु.) अमर्त्याधिष्ठितं रत्नम्—अमर्त्यरत्नम्, (म. प. लो. क.) उद्यत्सकलमुनिजनप्रार्थितम् अमर्त्यरत्नम्—उद्यत्सकलमुनिजनप्रार्थितामर्त्यरत्नम्, तद्—उद्यत्सकलमुनिजनप्रार्थितामर्त्यरत्नम् । (वि.पू.क.)

**गर्जद्वाचाटवादिद्विरदघनघटादर्पकण्ठीरवाभम्** :—कुत्सिता वाग् येषां ते—वाचाटाः, "वाच आलाटौ" ७।२।२४....आट, गर्जन्तश्च ते वाचाटाश्च—गर्जद्वाचाटाः, ( वि. उभ. क. ) गर्जद्वाचाटाः वादिनः—गर्जद्वाचाटवादिनः, (वि. पू. क.) गर्जद्वाचाटवादिनः एव द्विरदाः—गर्जद्वाचाटवादिद्विरदाः, (अव. पू. क.) घना घटा—घनघटा, (वि.पू.क.) गर्जद्वाचाटवादिद्विरदानां घनघटा—गर्जद्वाचाटवादिद्विरदघनघटा, (ष. त. पु.) गर्जद्वाचाटवादिद्विरदघनघटायाः दर्पः—गर्जद्वाचाटवादिद्विरदघनघटादर्पः, (ष.त.पु.) गर्जद्वाचाटवादिद्विरदघनघटादर्पं विदारयतीति—गर्जद्वाचाटवादिद्विरदघनघटादर्पविदारकः, ( उप. त. पु. ) " णकतृचौ " ५।१।४८...णक, कण्ठे रवः यस्य सः—कण्ठीरवः, (व्य.ब.व्री.) गर्जद्वाचाटवादिद्विरदघनघटादर्पविदारकः कण्ठीरवः—गर्जद्वाचाटवादिद्विरदघनघटादर्पकण्ठीरवः, ( म. प. लो.क.) गर्जद्वाचाटवादिद्विरदघनघटादर्पकण्ठीरवस्य आभा इव आभा यस्य सः—गर्जद्वाचाटवादिद्विरदघनघटादर्पकण्ठीरवाभः, तम्—गर्जद्वाचाटवादिद्विरदघनघटादर्पकण्ठीरवाभम् । ( उपमानोपमेय० ब. व्री. )

**मिथ्याधर्मान्धकारे**:—मिथ्या धर्मः—मिथ्याधर्मः, ( वि. पू. क. ) मिथ्याधर्म एव अन्धकारः—मिथ्याधर्मान्धकारः, तस्मिन्—मिथ्याधर्मान्धकारे । (अव. पू. क. )

**स्फुटविकटकरादित्यम्** :—स्फुटाः विकटाः कराः यस्य सः—स्फुटविकटकरः, ( स. ब. ब. व्री. ) स्फुटविकटकरः आदित्यः—स्फुटविकटकरादित्यः, तम्—स्फुटविकटकरादित्यम् । ( वि. पू. क. )

**अल्पप्रभम्** :—अल्पा प्रभा यस्य सः—अल्पप्रभः, तम्—अल्पप्रभम् । ( स. ब. व्री. )

अर्हद्वक्त्रप्रसूतम् :—अर्हतः वक्त्रम्—अर्हद्वक्त्रम्, (ष.त.पु.) अर्हद्वक्त्रेभ्यः प्रसूतम्—अर्हद्वक्त्रप्रसूतम्, तद्—अर्हद्वक्त्रप्रसूतम्। (पं. त. पु.)

गणधररचितम् :—गणान् धरन्तीति—गणधराः, (उप. त. पु.) गणधरैः रचितम्—गणधररचितम्, तद्—गणधररचितम्। (तृ. त. पु.)

द्वादशाङ्गम् :—द्वादशानाम्, अङ्गानां समाहारः—द्वादशाङ्गम्, तद्—द्वादशाङ्गम्। (द्विगु. क.)

सर्वानुभूतियक्षस्य स्वरूपम्—

**दक्षो यक्षाधिराजो महिमगुणनिधिश्चण्डदोर्दण्डधारी'**
**सर्वं सर्वानुभूति र्विदलयतु मुदा सङ्घविघ्नं महौजाः।**
**अध्यारूढो द्विपेन्द्रं वरभवनगतः स्तम्भहस्तोत्कटाऽऽस्यम्,**
**निष्पङ्कव्योमनीलद्युतिमलसदृशं बालचन्द्राभदंष्ट्रम् ॥४॥**

अन्वय—

दक्षः, यक्षाधिराजः, महिमगुणनिधिः, चण्डदोर्दण्डधारी, महौजाः, स्तम्भहस्तोत्कटाऽऽस्यं निष्पङ्कव्योमनीलद्युतिम् अलसदृशं बालचन्द्राभदंष्ट्रं द्विपेन्द्रम् अध्यारूढः, वरभवनगतः, सर्वानुभूतिः सर्वं सङ्घविघ्नं मुदा विदलयतु।

दक्ष इति—'दक्षः' निपुणः विघ्नहरणपटु र्वा। "दक्षो पटौ हरवृषे ताम्रचूडे प्रजापतौ। मुनिभेदे द्रुमे वह्नौ दक्षो दक्षा भुवि स्मृता॥ इति विश्वः (१८२।४)। 'यक्षाधिराजः' यक्षाणां तन्नामव्यन्तरविशेषाणाम् अधिराजः स्वामी यक्षाधिपतिरित्यर्थः। अष्टविधा व्यन्तरास्तेषु यक्षाऽऽह्वयो भेदः। "स्युः पिशाचा भूता यक्षा राक्षसाः किन्नरा अपि। किंपुरुषा महोरगा

गन्धर्वा व्यन्तरा अमी" ॥९१॥ इति हैमः (२।९०)। 'महिमगुणनिधिः' महिमा प्रभुत्वं च गुणाः शौर्यादयः सम्यग्दृशां विघ्नहरणत्वपरोपकाररसिकत्वप्रभृतयो वा च निधीयन्ते स्थाप्यन्ते यत्र महत्तागुणपात्रमित्यर्थः। यद्वा महिमा महत्त्वमेव गुणो निधीयतेऽत्र प्रभुतागुणमय इत्यर्थः। 'चण्डदोर्दण्डधारी' चण्डौ अतिबलवन्तौ "चण्डस्तु यमदासेऽतिकोपने। तीव्रे दैत्यविशेषे च" इत्यनेकार्थः (२।११५)। दोषौ हस्तौ "दो दोषा च भुजो बाहुः पाणिर्हस्तः करस्तथा" इति धनञ्जयः, तौ एव दण्डो यष्टिरायुधविशेषस्तं धरतीति.... प्रचण्डभुजाबलीत्यर्थः। 'महौजाः' महद् गुरुतमम् ओजः तेजो बलं वा यस्य, परमतेजस्वी अतिपराक्रमी वा। "ओजो दीप्तावष्टम्भे प्रकाश—बलयोरपि" इति मेदिनी (१७१।२०)। 'स्तम्भहस्तोत्कटास्यम्' स्तम्भः स्थूणः "स्तम्भः स्थूणाङ्गजाड्ययोः इत्यनेकार्थः" (२।३०७)। तद्वत् दृढत्वात् स्थूलत्वाच्च हस्तः करिकरः शुण्डा वा "हस्तः करे करिकरे सप्रकोष्ठकरेऽपि च ॥७५॥ ऋक्षे केशात्परो व्राते" इति मेदिनी (५९।७५।७६)। तेन उत्कटं विकरालम् आस्यं मुखं यस्य तम्। "निष्पङ्कव्योमनीलद्युतिम्" निर्गतानि दूरीभूतानि पङ्कानि मलानि यस्मात् तादृशं व्योम गगनम् "व्योम वारिणि चाकाशे भास्करस्यार्चनाश्रये।" इति मेदिनी (९२।३६)। तद्वत् नीला श्यामा द्युतिः कान्तिः यस्य तम्। 'अलसदृशम्' अलसे मुग्धे दृशौ दृष्टी लोचने वा यस्य तम्। 'बालचन्द्राभदंष्ट्रम्' बालः शिशुवयस्थ उद्यन् सन् वा यश्चन्द्र इन्दुस्तमिव आभातः दृश्येते तुल्ये वा दंष्ट्रे दन्तौ यस्य तम्। 'द्विपेन्द्रम्' द्विपानां द्वाभ्यां पिबन्ति तेषां हस्तिनाम् इन्द्रः स्वामी तम्। 'अध्यारूढः' आसीनः। 'वरभवनगतः' वरं श्रेष्ठं भवनं निकेतनं गतः स्थितः

सुन्दरमन्दिरवासीत्यर्थः। 'सर्वानुभूतिः' तन्नामयक्षविशेषः। 'सर्वम्' समस्तं। संङ्घविघ्नम्' सङ्घस्य साधुसाध्वीश्रावकश्राविकालक्षणस्य विघ्नम् अपायं देवमनुजतिर्यक्कृतकर्मजन्यदुःखं वा। 'मुदा' हर्षेण। विदलयतु नाशयतु दूरीकरोतु वेत्यर्थः।

**અર્થ**— પ્રવીણ, યક્ષોનો અધિપતિ, મહિમા અને ગુણોનો ભંડાર, પ્રચંડ એવા બાહુરૂપી દંડને ધારણ કરનાર, મહાન્ બલ (તેજ) વાળો, સ્તમ્ભ જેવી સુંઢવડે વિકરાળ છે મુખ જેનું એવા, અને મલ (વાદળા) વગરના આકાશ જેવી નીલ કાંતિવાળા, મદભરેલી દૃષ્ટિવાળા, બાલચન્દ્ર જેવી છે દાઢા જેની એવા, ઐરાવણ હાથી ઉપર બેઠેલા, સુંદર ભવનમાં રહેલા, એવા સર્વાનુભૂતિ યક્ષ સર્વ સંઘનાં વિઘ્નનો હર્ષથી નાશ કરો...

**समास—**

**यक्षाधिराजः**—अधिकः राजा—अधिराजः, 'राजन्सखेः' ७।३।१०६....अट् (प्रादि.कर्म.) यक्षेषु अधिराजः,—यक्षाधिराजः, (स.त.पु.) यक्षाणाम् अधिराजः—यक्षाधिराजः। (ष. त. पु.)

**महिमगुणनिधिः**—महिमा च गुणाश्च—महिमगुणाः, (इ. द्व.) महिमगुणानां निधिः—महिमगुणनिधिः। (ष. त. पु.)

**चण्डदोर्दण्डधारी**—चण्डौ च तौ दोषौ च—चण्डदोषौ, (वि.पू.क.) चण्डदोषौ एव दण्डम्—चण्डदोर्दण्डम्, (अव. पू. क.) चण्डदोर्दण्डम् धारयतीति—चण्डदोर्दण्डधारी। 'अजातेःशीले' ५।१।१५४....णिन् (उप. त. पु.)

**सङ्घविघ्नम्**:—सङ्घस्य विघ्नः-सङ्घविघ्नः, तम्—सङ्घविघ्नम्। (ष.त.पु.)

**महौजाः**—महद् ओजः यस्य सः—महौजाः। (स. ब. व्री.)

**द्विपेन्द्रम्**:—द्विपानाम् इन्द्रः—द्विपेन्द्रः, तम्—द्विपेन्द्रम्। (ष.त.पु.)

**वरभवनगतः**—वरं भवनम्—वरभवनम्, (वि. पू. क.) वरभवनं गतः—वरभवनगतः। ( द्वि. त. पु. )

**स्तम्भहस्तोत्कटास्यम् :**—स्तम्भवत् हस्तः—स्तम्भहस्तः, ( उप. पू. क. ) उत्कटम् आस्यम्—उत्कटास्यम्, ( वि. पू. क. ) स्तम्भहस्तेन उत्कटास्यम् यस्य सः—स्तम्भहस्तोत्कटास्यः, तम्—स्तम्भहस्तोत्कटास्यम्। ( व्य. ब. व्री. )

**निष्पङ्कव्योमनीलद्युतिम् :** —निर्गतानि पङ्कानि यस्मात् तद्—निष्पङ्कम्, (प्रादि. ब. व्री.) निष्पङ्कं व्योम—निष्पङ्कव्योम, (वि. पू. क.) नीला चासौ द्युतिश्च—नीलद्युतिः, (वि.पू.क.) निष्पङ्कव्योमवत् नीलद्युतिः यस्य सः—निष्पङ्कव्योमनीलद्युतिः, तम्—निष्पङ्कव्योमनीलद्युतिम्। (उप. ब. व्री.)

**अलसदृशम् :**—अलसे दृशौ यस्य सः—अलसदृक्, तम्—अलसदृशम्। ( स. ब. व्री. )

**बालचन्द्राभदंष्ट्रम् :**—बालः चन्द्रः—बाल चन्द्रः, (वि. पू. क.) बालचन्द्रस्य आभानि—बालचन्द्राभानि, ( ष. त. पु. ) बालचन्द्राभानि दंष्ट्राणि यस्य सः—बालचन्द्राभदंष्ट्रः, तम्—बालचन्द्राभदंष्ट्रम्। ( स. ब. व्री. )

---

## संसारदावापादपूर्तिश्रीवीरजिनस्तुतिः

( इन्द्रवज्रा )

श्रीसिद्धार्थसंस्तवनम्—

नम्रेन्द्रमौलिप्रपतत्पराग—
पुञ्जस्फुरत्कर्बुरितक्रमाब्जम्।
वीरं भजे निर्जितमोहवीरं,
संसारदावानलदाहनीरम् ॥१॥

अन्वयः—

निर्जितमोहवीरं, संसारदावानलदाहनीरं, नम्रेन्द्रमौलिप्रपतत्-परागपुञ्जस्फुरत्कर्बुरितक्रमाब्जं, वीरं भजे।

नम्रेन्द्रेतिः 'निर्जितमोहवीरम्' निर्जितः निःशेषेण अपुनरुत्थानत्वेन जितः पराभूतः मोहः तन्नामकर्म एव वीरः भटः येन तम्। "वीरो जिने भटे श्रेष्ठे" इत्यनेकार्थः (२।४४६)। परास्त-मोहमहाभटम् इत्यर्थः। 'संसारदावानलदाहनीरम्' संसारः कर्मोपेतजीवानां निवास एव दावानलः—दावाद् अरण्याद् उद्भवो दावो वनवह्निरेव अनलः अग्निः, दावानलेन देहमात्रं दह्यते आधिव्याध्युपाधिमय—संसारो देहमनसी दहतीति संसारो दावानल एवेत्युक्तम्। "दवदावौतु वनवह्नौ वनेप्युभौ" इति मेदिनी (१५८।१०)। "अनलो वसुभेदेऽग्नौ इति मेदिनी (१४९।५७)। तस्य यो दाहः ज्वलनं तस्य प्रशमने नीरं जलमिव। 'नम्रेन्द्र-मौलिप्रपतत्परागपुञ्जस्फुरत्कर्बुरितक्रमाब्जम्' नम्राणां नमनशीलानां चरणविलग्नानां वा इन्द्राणां शक्राणां ये मौलयः मुकुटाः, पुष्पं विना परागः कथं भवेद्यतोऽत्र पुष्पबद्धा मुकुटा गृह्यन्ते, तेभ्यः प्रपतन् प्रसरन् यः परागाणां पुष्परसानां "परागः कौसुमे रेणौ स्नानीयादौ रजस्यपि।" इत्यमरः (३।३।२१)। पुञ्जः राशिः "पुञ्जराशी तूत्करः कूटमस्त्रियाम् ॥४२॥ इत्यमरः (२।५।४२)। तेन स्फुरन्तौ दीप्यमानौ कर्बुरितौ कर्बुरः शबलः चित्रविचित्रं वा सञ्जातः ययोस्तौ तारकादित्वादितः नानावर्णितौ पुष्पाणामनेकविधत्वाद् "कर्बुरं सलिले हेम्नि कर्बुरः पापरक्षसोः। कर्बुरा कृष्णवृन्तायां शबले पुनरन्यवत्॥ इति मेदिनी (१३१।१२२)। क्रमौ चरणौ एव अब्जे कमले यस्य तम्। "क्रमः कल्पांह्रि—शक्तिषु। पारिपाट्यामित्यनेकार्थः (२।३१०)। 'वीरम्' श्रीमहावीरदेवम्।

'भजे' सेवे। इदं पद्यम् इन्द्रवज्रावृत्तम्, तल्लक्षणम्–"स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति छन्दोमञ्जर्याम्।

**અર્થ:**–પરાભૂત કરાયો છે મોહરૂપી ભટ જેનાવડે એવા સંસારરૂપી દાવાનલનાં દાહને પ્રશાંત કરનારા જલ સમા, નમવાના સ્વભાવવાળા એવા ઇન્દ્રોનાં મુકુટોથી પ્રસરતાં પરાગનાં સમૂહવડે દેદીપ્યમાન, ચિત્રવિચિત્ર થયેલ ચરણરૂપી કમળવાળા મહાવીરસ્વામિ ભગવંતને હું સેવું છું.

**समासः**–

**नम्रेन्द्रमौलिप्रपतत्परागपुञ्जस्फुरत्कर्बुरितक्रमाब्जम्**–नमन्ति, इत्येवंशीलाः–नम्राः, नम्राश्चामी इन्द्राश्च–नम्रेन्द्राः, (वि. पू. क.) नम्रेन्द्राणां मौलयः–नम्रेन्द्रमौलयः, (ष. त. पु.) परागाणां पुञ्जः–परागपुञ्जः, (ष. त. पु.) प्रपतन् परागपुञ्जः–प्रपतत्परागपुञ्जः, (वि. पू. क.) नम्रेन्द्रमौलिभ्यः प्रपतत्परागपुञ्जः–(नम्रेन्द्रमौलिप्रपतत्परागपुञ्जः, (पं. त. पु.) स्फुरती कर्बुरिते–स्फुरत्कर्बुरिते, (वि. उभ. क.) नम्रेन्द्रमौलिप्रपतत्परागपुञ्जेन (कृते) स्फुरत्कर्बुरिते–नम्रेन्द्रमौलिप्रपतत्परागपुञ्जस्फुरत्कर्बुरिते, 'तृतीया०' ३।१।६५ (तृ. त. पु.) क्रमौ एव अब्जे–क्रमाब्जे, (अव. पू. क.) नम्रेन्द्रमौलिप्रपतत्परागपुञ्जस्फुरत्कर्बुरिते क्रमाब्जे यस्य सः–नम्रेन्द्रमौलिप्रपतत्परागपुञ्जस्फुरत्कर्बुरितक्रमाब्जः, तम्–नम्रेन्द्रमौलिप्रपतत्परागपुञ्जस्फुरत्कर्बुरितक्रमाब्जम्। (स. ब. व्री.)

**निर्जितमोहवीरम्**–मोह एव वीरः–मोहवीरः, (अव. पू. क.) निर्जितः मोहवीरः येन सः–निर्जितमोहवीरः, तम् निर्जितमोहवीरम् (स. ब. व्री.)

**संसारदावानलदाहनीरम्**–दाव एव अनलः–दावानलः, (अव. पू. क.) संसारः एव दावानलः–संसारदावानलः, (अव. पू. क.) संसारदावानलस्य दाहः–संसारदावानलदाहः, (ष. त. पु.) संसारदावानलदाहं

प्रशाम्यतीति—संसारदावानलदाहप्रशामकम् , ( उप. त. पु. ) 'णकतृचौ' ५।१।४८...णक, संसारदावानलदाहप्रशामकं नीरम्—संसारदावानलदाहनीरम् , तद्—संसारदावानलदाहनीरम् । ( म. प. लो. क. )

( वसन्ततिलकावृत्तम् )

**परमात्मपादपद्मप्रणमनम्...**

पुष्पौघपद्मदलसौरभगुण्ठितानि,
स्वर्णाम्बुजैः सुरकृतैः परिमण्डितानि ।
वन्देऽर्हतां वरपदानि नतान्यजेन,
भावावनामसुरदानवमानवेन ॥२॥

अन्वयः—

सुरकृतैः स्वर्णाम्बुजैः परिमण्डितानि, पुष्पौघपद्मदलसौरभगुण्ठितानि, भावावनामसुरदानवमानवेन अजेन नतानि अर्हतां वरपदानि वन्दे ।

पुष्पौघेति—'सुरकृतैः' सुरैः अमरैः व्यन्तरनिकायदेवैः कृतैः निर्मितैः । 'स्वर्णाम्बुजैः' स्वर्णाद् हेम्नः निर्मितैः स्वर्णस्य काञ्चनस्य वा अम्बुजैः सरोजैः कनकमयकमलैरित्यर्थः । 'परिमण्डितानि' परितः सम्पूर्णतया मण्डितानि भूषितानि । "मण्डितः । प्रसाधितोऽलङ्कृतश्च भूषितश्च परिष्कृतः । ॥ १०० ॥ इत्यमरः ( १।६।१०० ) । 'पुष्पौघपद्मदलसौरभगुण्ठितानि' पुष्पाणां मल्लिकामालत्यादिकुसुमानाम् ओघः समुदायस्तेन युक्तानि, यद्वा स च पद्मानाम् अनेकविधकमलानां यानि दलानि पर्णानि च तेषां सौरभेण सुगन्धेन गुण्ठितानि वासितानि । "पुष्पं विकासि-कुसुम स्त्रीरजःसु नपुंसकम्" ॥ इति मेदिनी । ( १०२।८ ) दलं शस्त्रीच्छेदेऽर्द्धपर्णयोः ॥४८१॥ उत्सेधवद्वस्तुनि च" इत्यनेकार्थः ( २।४८१।२ ) । अर्हच्चरणपतितानां देवदानवमानवानां कण्ठेषु विविधपुष्परचितमालाः

शोभन्तेऽतश्चरणविलग्नमालानां यानि पुष्पाणि तेषां सुरभिणा अर्हच्चरणाः सुवासिता इत्यर्थः। 'भावावनामसुरदानवमानवेन' भावेन आन्तरिकीरत्या भक्तिपूर्णहृदयत्वाद् अवनामाः निम्नकृतमूर्धानः नमस्कारं कुर्वन्तो वा सुरा देवाः दानवा असुराः मानवा मनुष्याश्च यस्य यस्मै वा तेन। "भावः सत्तास्वभावऽभिप्राय–चेष्टात्मजन्मसु। क्रियालीलापदार्थेषु बुधजन्तुविभूतिषु ॥२०॥ उत्पादौ च" इति मेदिनी (१५९।२०–२१)। 'अजेन' न जायते स्म, 'क्वचित्' (सि०५।१।१७१) इति डः, पुनर्जन्म न गृह्णाति सः। सामान्यतोऽत्र केवलिभगवान् गृह्यते। (यदि ब्रह्मा विष्णुरित्यर्थो गृह्येत तर्हि भावावनाम० इति विशेषणं न घटतेऽत एव रूढयर्थः त्यक्त्वाऽत्र यौगिकार्थो गृहीतः) तेन। 'नतानि' नमस्कृतानि। 'अर्हताम्' जिनेश्वराणाम्। 'वरपदानि' वराणि श्रेष्ठानि अमरासुरनरेश्वरार्चितत्वात् पदानि चरणान्। 'वन्दे' प्रणमामि नमस्कारं कुर्वे। अस्मिन् पद्ये वसन्ततिलकावृत्तम्, पूर्वोक्तम् तु तल्लक्षणम्।

અર્થ- દેવોવડે કરાયેલ સુવર્ણનાં કમલોથી સુશોભિત, પુષ્પોનાં સમૂહથી યુક્ત કમલોની પાંદડીઓની સુગન્ધથી સુવાસિત થયેલ, ભાવથી નમેલાં છે દેવ દાનવ અને માનવો જેને એવા, સામાન્ય કેવલિભગવંતવડે નમાએલાં, અરિહંત પરમાત્માનાં સુંદર ચરણોને હું નમન કરું છું.

समासः–

पुष्पौघपद्मदलसौरभगुण्ठितानि–पुष्पाणाम् ओघः,–पुष्पौघः, (ष. त. पु.) पद्मानां दलानि–पद्मदलानि, (ष. त. पु.) पुष्पौघेन युक्तानि–पुष्पौघयुक्तानि, (तृ. त. पु.) पुष्पौघयुक्तानि पद्मदलानि–पुष्पौघपद्मदलानि, (म. प. लो. क.) पुष्पौघपद्मदलानां सौरभः–पुष्पौघपद्मदलसौरभः, (ष. त. पु.) पुष्पौघपद्मदलसौरभेण गुण्ठितानि–पुष्पौघपद्मदलसौरभगुण्ठितानि, तानि–पुष्पौघपद्मदलसौरभगुण्ठितानि। (तृ. त. पु.)

**स्वर्णाम्बुजैः**—अम्बुनि जातानि—अम्बुजानि, (उप. त. पु.) स्वर्णस्य अम्बुजानि—स्वर्णाम्बुजानि (ष. त. पु.) अथवा स्वर्णाद् निर्मितानि—स्वर्णनिर्मितानि, (पं. त. पु.) स्वर्णनिर्मितानि अम्बुजानि—स्वर्णाम्बुजानि, तैः—स्वर्णाम्बुजैः । (म. प. लो. क.)

**सुरकृतै**—सुरैः कृतानि—सुरकृतानि, तैः—सुरकृतैः । (तृ.त.पु.)

**वरपदानि**—वराणि च तानि पदानि च—वरपदानि, तानि—वरपदानि । (वि, पू. क.)

**अजेन**—न जायते स्म—अजः, तेन—अजेन । (उप. त. पु.)

**भावावनामसुरदानवमानवेन**—भावेन (कृताः) अवनामाः—भावावनामाः, 'तृतीया तत्कृतैः' ३।१।६५ (तृ. त. पु.) सुराश्च दानवाश्च मानवाश्च—सुरदानवमानवाः, (इ. द्व.) भावावनामाः सुरदानवमानवाः यस्य यस्मै वा सः—भावावनामसुरदानवमानवः, तेन—भावावनामसुरदानवमानवेन । (स. ब. व्री.)

(मन्दाक्रान्तावृत्तम्)

आर्हतागमो रत्नाकर एवेति वर्ण्यते

**नानारत्नैः सुभगमतुलप्रौढसादृश्यपाठैः ।**
**विज्ञज्ञातैर्बहुनयभरैः सत्तरङ्गैरुपेतम् ॥**
**युक्त्या जैनं समयमुदधिं कीर्तयाम्यस्मि कामम् ।**
**बोधागाधं सुपदपदवीनीरपूराभिरामम् ॥ ३ ॥**

अन्वय—

अस्मि अतुलप्रौढसादृश्यपाठैः नानारत्नैः सुभगम्, विज्ञज्ञातैः बहुनयभरैः, सत्तरङ्गैः उपेतं, बोधागाधं, सुपदपदवीनीरपूराभिरामं, जैनं, समयम् उदधिं युक्त्या कामं कीर्त्तयामि ।

नानारत्नैरिति...'अस्मि' अहमर्थद्योतकमिदमव्ययम् 'विभक्तिथमन्त०' ( सि०१।१।३३ ) कर्ता स्वयमित्यर्थः। 'अतुलप्रौढसादृश्यपाठैः' नास्ति तुला उपमा सादृश्यं वा येषाम् अनुपमा असमाना वा—अनेकान्तधर्मार्पितत्वाद् वीतरागप्रणीतत्वाद् वा प्रौढाः प्रकर्षेण ऊह्यन्ते स्म प्रतिभाशालिनः "प्रौढस्तु प्रगल्भः प्रतिभान्वितः॥ इति हैमः (३४३)। यद्वा प्रौढाः प्रवृद्धा अतिशयिता वाऽन्योन्यतः "प्रवृद्धमेधितं प्रौढं" इति हैमः ( १४९५ ) सदृशा एव सादृश्याः भेषजादित्वात् ट्यण्, समानाः पाठाः शब्दमयसूत्राणि वर्णरचना वा तैः "पाठश्च पठने ख्यातो विद्धपर्ण्यां तु योषिति" इति मेदिनी (३९।७)। 'नानारत्नैः' नाना विविधैः रत्नैः वैडूर्यादिभिः ( कृतं )। 'सुभगम्' शोभनं भगम् ऐश्वर्यं लक्ष्मी वा यस्य तम् श्रेष्ठविभूतिमन्तमित्यर्थः। "भगं श्रीयोनिवीर्येच्छाज्ञान—वैराग्य—कीर्तिषु। माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षेऽथ ना रवौ"॥ १२॥ इति मेदिनी ( २२।१२ )। 'विज्ञज्ञातैः' विशेषेण विशेषं वा जानन्ति विज्ञाः बुधाः तैः ज्ञातैः विदितैः। "कुशलश्चतुरोऽभिज्ञ—विज्ञ—वैज्ञानिकाः पटुः" इति हैमः (३४३)। 'बहुनयभरैः' बहूनां प्रभूतानां एकशब्दस्याऽपि अनेकार्थत्वेन नयानां नैगमसंग्रहव्यवहारर्जुसूत्रशब्दसमभिरूढैवम्भूतलक्षणानां "नयः स्यान्नैगमादिषु। नीतिद्यूतभिदोः" इत्यनेकार्थः ( २।३६० )। भरैः अतिशयैः समूहैः वा "भरोऽतिशयभारयोः" इत्यनेकार्थः ( २।४३३ )। 'सत्तरङ्गैः' सद्भिः विद्यमानैः प्रशस्तैः वा तरङ्गैः ऊर्मिभिः। "भङ्गस्तरङ्ग ऊर्मि र्वा स्त्रियां वीचिः" इत्यमरः ( १।१०।५ )। 'उपेतम्' युक्तम्। 'बोधागाधम्' बोधैः ज्ञानैः अगाधम्—नास्ति गाधः स्थितिर्यत्रातिनिम्नस्तम् अतलस्पर्शमित्यर्थः। "अगाधमतलस्पर्शे" इत्यमरः ( १।१०।१५ )।

'सुपदपदवीनीरपूराभिरामम्' शोभनानि पदानि शब्दा वाक्यानि वा तेषां पदवी रचना वर्ण–शब्द–पद–वाक्य–सूत्ररचनेत्यर्थः। सैव नीरस्य जलस्य पूरेण प्रवाहेण अभिरामम् मनोहरम्। 'जैनम्' जिनानां वीतरागाणामयम् जिनैर्वा रागद्वेषविजेतृभिः प्रोक्तस्तम् "तस्येदम्" (सि० ६।३।१६०) इति, "तेन प्रोक्ते (सि–६।३।१८१) इति वा सूचितः "प्राग् जितादण्" (सि० ६।१।१३) इत्यनेनाण्, जिनेश्वरोक्तमित्यर्थः। 'समयम्' सिद्धान्तम्। "समयः शपथे भाषासंपदोः कालसंविदोः ॥५०२॥ सिद्धान्ताचार–संकेत –नियमावसरेषु च। क्रियाकारे च निर्देशे" इत्यनेकार्थः (३।५०२।३)। तमेव उदधिम् समुद्रम् युक्त्या नीत्या आगमोक्तरीत्या वा। "युक्तिर्न्याये योजने च इत्यनेकार्थः (२।१८६)। कामं–हर्षपूर्वकं साभिलाषं वा। कीर्त्तयामि–संस्तुवे। अस्मिन् पद्ये मन्दाक्रान्ताच्छन्दो वर्तते तल्लक्षणम्। "मन्दाक्रान्ता जलधिषडगैम्भौं नतौ ताद्गुरुश्चेत्" इति छन्दोमञ्जर्याम्।

અર્થ—હું અનુપમ, સુંદરતર્કોવાળા સરખાં પાઠોરૂપી વિવિધ પ્રકારનાં રત્નોવડે કરીને અત્યંત ઐશ્વર્યવાળો, વિદ્વાનોવડે જણાયેલ, બહુ પ્રકારનાં નયોનાં સમૂહરૂપી સુંદર તરંગોથી યુક્ત, જ્ઞાનવડે કરીને અગાધ, સરસ પદોની રચનારૂપી પાણીનાં પૂરવડે મનોહર એવા જિનેશ્વરદેવનાં સિદ્ધાન્તરૂપી સમુદ્રની યુક્તિથી હર્ષપૂર્વક સ્તવના કરૂં છું.

समास—

नानारत्नैः—नाना च तानि रत्नानि च—नानारत्नानि, तैः—नानारत्नैः। (वि. पू. क.)

सुभगम्—शोभनं भगं यस्य सः—सुभगः, तम्—सुभगम्। (अव्यय. ब. व्री.)

**अतुलप्रौढसादृश्यपाठैः**—न तुलाः—अतुलाः, (न. त. पु.) प्रकृष्टाः ऊढाः येषु ते—प्रौढाः, ( प्रादि. ब. व्री. ) अतुलाश्चामी प्रौढाश्च—अतुलप्रौढाः, ( वि. उभ. क. ) सादृश्याश्चामी पाठाश्च—सादृश्यपाठाः, ( वि. पू. क. ) अतुलप्रौढाश्चामी सादृश्यपाठाश्च—अतुलप्रौढसादृश्यपाठाः, तैः—अतुलप्रौढसादृश्यपाठैः । ( वि. पू. क. )

**विज्ञज्ञातैः**—विशेषेण जानन्ति—विज्ञाः, 'नाम्युपान्त्य०' ५।१।५४ ....क, (उप.त.पु.) विज्ञैः ज्ञाताः—विज्ञज्ञाताः, तैः—विज्ञज्ञातैः। (तृ.त.पु.)

**बहुनयभरैः**—बहवश्चामी नयाश्च—बहुनयाः, ( वि. पू. क. ) बहुनयानां भराः—बहुनयभराः, तैः—बहुनयभरैः । ( ष. त. पु. )

**सत्तरङ्गैः**—सन्तश्चामी तरङ्गाश्च—सत्तरङ्गाः, तैः—सत्तरङ्गैः। (वि.पू.क.)

**बोधगाधम्**—बोधेन ( कृतः ) अगाधः—बोधागाधः, तम्–बोधागाधम् । 'तृतीया तत्कृतैः' ३।१।६५ (तृ. त. पु. )

**सुपदपदवीनीरपूराभिरामम्**—शोभनानि पदानि—सुपदानि, ( सु. पू. त. पु. ) सुपदानां पदवी–सुपदपदवी, ( ष. त. पु. ) सुपदपदवी एव नीरम्—सुपदपदवीनीरम्, ( अव. पू. क. ) सुपदपदवीनीरस्य पूरम्—सुपदपदवीनीरपूरम्, ( ष. त. पु. ) सुपदपदवीनीरपूरेण ( कृतः ) अभिरामः—सुपदपदवीनीरपूराभिरामः, तम्—सुपदपदवीनीरपूराभिरामम् । 'तृतीया तत्कृतैः' ३।१।६५ ( तृ. त. पु. )

( स्रग्धरावृत्तम् )

श्रीसिद्धायिकास्वरूपमाह....

**श्रीमद्वीरक्रमाम्भोरुहरसिकमना राजहंसीव रम्या,**
**सिद्धा सिद्धाविरुद्धा विशदगुणलसद्भक्तहृत्पद्मरुद्धा ॥**
**या धत्ते स्वीयकण्ठे घनसुरभिरसां पुष्पमालां विशालाम्,**
**आमूलालोलधूलीबहुलपरिमलालीढलोलालिमालाम्॥४॥**

अन्वय—

या राजहंसी इव रम्या श्रीमद्वीरक्रमाम्भोरुहरसिकमनाः सिद्धाविरुद्धा विशदगुणलसद्भक्तहृत्पद्मरुद्धा सिद्धा स्वीयकण्ठे घनसुरभिरसाम् आमूलालोलधूलीबहुलपरिमलालीढलोलालिमालां विशालां पुष्पमालां धत्ते।....

श्रीमद्वीरेति....'या' अनन्तरकथयिष्यद्रूपा स्तुत्यविषया वा 'राजहंसी' हंसानां तन्नामपक्षिविशेषाणां राजा सम्राट् राजहंसस्तस्य भार्या राजहंसी श्रेष्ठश्वेतपक्षिणी, राजदन्तादित्वाद् राजशब्दस्य पूर्वनिपातः, राज्ञी चासौ हंसी चेति विशेषणोत्तरपदकर्मधारयो वा। 'इव' उपमानार्थे सदृशीत्यर्थः। 'रम्या' मनोहरा लावण्योपेता वा। "रम्यश्चम्पकहृद्ययोः" ॥ ३६८॥ इत्यनेकार्थः (२।३६८)। 'श्रीमद्वीरक्रमाम्भोरुहरसिकमनाः' श्रीः समवसरणादिशोभा विद्यते यस्य—श्रीमान्—आर्हतीलक्ष्मीवान् यो वीरश्चरमतीर्थपतिस्तस्य क्रमौ चरणौ एव अम्भोरुहे अम्भसि रोहत इति मूलविभुजादित्वात्कः, अम्भोरुहे कमले तयोरेव रसिकं सेवाकरणपरं मनश्चित्तं यस्याः सा। 'सिद्धाविरूद्धा' सिद्धैः सज्जनैरविरुद्धा अनिन्दिता प्रशस्ता वा योगिजनैः सहानुकूलचरणा वेत्यर्थः। 'विशदगुणलसद्भक्तहृत्पद्मरुद्धा' विशदा निर्मला ये गुणाः प्रशमादयः तैः (कृताः) लसन्तः शोभमानाः ये भक्ताः सेवकास्तेषां हन्दि हृदयानि स्वान्तानि वा तानि एव पद्मानि कमलानि तेषु रुद्धा आवृता। 'सिद्धा' सिद्धायिका देवी 'भीमो भीमसेन' इति न्यायात् चरमशासनपतिसेविकेत्यर्थः। 'स्वीयकण्ठे' स्वस्य आत्मनोऽयम् स्वीयः आत्मीयः कण्ठः गलस्तस्मिन्। "कण्ठो गलः" इत्यमरः (२।६।८८)। 'घनसुरभिरसाम्' घनः सान्द्रः अत्यन्तो वा सुरभिः सुगन्धः रसः पुष्पमकरन्दश्च यस्यां सा....ताम् अतिसुवासितां बहुपरिमला—

मित्यर्थः। "घनं सान्द्रं घनं वाद्यं घनो मुस्तो घनाम्बुदः। घनः काठिन्य संघातो विस्तारो लोहमुद्गरौ इति धरणिः। "शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः" इत्यमरः (३।३।२२७)। 'आमूलालोलधूलीबहुलपरिमलालीढलोलालिमालाम्' आ अभिव्याप्त्यर्थे "आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे" इत्यमरः (३।३।२३९) मूलात् प्रथमभागतः "मूलं पार्श्वाद्ययोरुडौ। निकुञ्ज–शिकयोः" इत्यनेकार्थः (२।४९५)। आलोला दोलायमानाऽस्थिरा वा धूलीनां पांशूनां परागकणानां वा "रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयो रजः" ॥ ९८ ॥ इत्यमरः (२।८।९८)। बहुलः अत्यन्तो विपुलो वा परिमलः पुष्पसुगन्धः तस्मिन् "परिमलो विमर्दोत्थहृद्यगन्धे विमर्दने।" इत्यनेकार्थः (४।२९२)। आलीढा आसक्ता लोलानां चञ्चलानां सुमनसः सुमनसि भ्रमतां वा अलीनां भ्रमराणां माला श्रेणी यस्यां ताम् मनोहरमालामित्यर्थः। "लोलश्चले सतृष्णे च" इत्यनेकार्थः (२।४९७)। "अलिः सुरापुष्पलिहोः" इति मेदिनी (१४५।२)। 'विशालाम्' महतीम्। 'पुष्पमालाम्' पुष्पाणां सुमनसां पुष्पैः जातिमालत्याद्यनेकविधैः निर्मितां वा मालां स्रजम्। 'धत्ते' दधाति। अत्र पद्ये स्रग्धरावृत्तम्, उक्तन्तु तल्लक्षणम्।

અર્થ—જેણી રાજહંસી જેવી સુંદર, શ્રીમાન્ મહાવીરપ્રભુનાં ચરણરૂપી કમલને વિષે રસિક છે મન જેણીનું એવી, સજ્જન પુરુષો વડે સ્તવાયેલી, નિર્મલગુણોવડે શોભતાં એવા ભક્તજનોનાં હ્રદયરૂપી કમલમાં રહેલી, સિદ્ધાયિકાદેવી પોતાના કંઠને વિષે–અત્યંત સુગન્ધ અને પરાગરસ છે જેમાં એવી મૂલથી જ ડોલતી અને પરાગકણોની અત્યંત સુગંધમાં આસક્ત થયેલી છે ચપલ ભમરાઓની શ્રેણિ જેમાં એવી વિશાલ પુષ્પમાલાને ધારણ કરે છે....

**समास–**

**श्रीमद्वीरक्रमाम्भोरुहरसिकमनाः**–श्रियः सन्ति यस्य–श्रीमान्, 'तदस्या०' ७।२।१....मतु, श्रीमांश्चासौ वीरश्च–श्रीमद्वीरः, (वि. पू. क.) श्रीमद्वीरस्य क्रमौ–श्रीमद्वीरक्रमौ, (ष. त. पु.) अम्भसि रोहतः–अम्भोरुहे, 'मूलविभुजादयः' ५।१।१४४...क, (उ.त.पु.) श्रीमद्वीरक्रमौ एव अम्भोरुहे–श्रीमद्वीरक्रमाम्भोरुहे, (अव. पू. क.) रसिकं मनः–रसिकमनः, (वि. पू. क.) श्रीमद्वीरक्रमाम्भोरुहयोः रसिकमनः यस्याः सा–श्रीमद्वीरक्रमाम्भोरुहरसिकमनाः । (व्य. ब. व्री.)

**राजहंसी**–राज्ञीचासौ हंसी च–राजहंसी । (वि. पू. क.)

**सिद्धाविरुद्धा**–न विरुद्धा–अविरुद्धा, (न. त. पु.) सिद्धैः अविरुद्धा–सिद्धाविरुद्धा । (तृ. त. पु.)

**विशदगुणलसद्भक्तहृत्पद्मरुद्धा**–विशदा गुणाः–विशदगुणाः, (वि. पू. क.) लसन्तः भक्ताः–लसद्भक्ताः, (वि. पू. क.) विशदगुणैः (कृताः) लसद्भक्ताः–विशदगुणलसद्भक्ताः, 'तृतीया०'....३।१।६५ (तृ. त. पु.) विशदगुणलसद्भक्तानाम् हृन्दि–विशदगुणलसद्भक्तहृन्दि, (ष.त.पु.) विशदगुणलसद्भक्तहृन्दि एव पद्मानि–विशदगुणलसद्भक्तहृत्पद्मानि, (अव. पू. क.) विशदगुणलसद्भक्तहृत्पद्मेषु रुद्धा–विशदगुणलसद्भक्तहृत्पद्मरुद्धा । "क्तेन" ३।१।९२...(स. त. पु.)

**स्वीयकण्ठे**–स्वस्य अयम्–स्वीयः "तस्येदम्" ३।१।१६०ना कथनथी "दोरीयः" ६।३।३२...ईय, स्वीयश्चासौ कण्ठश्च–स्वीयकण्ठः तस्मिन्–स्वीयकण्ठे । (वि. पू. क.)

**घनसुरभिरसाम्**–घनः सुरभिः रसः यस्यां सा–घनसुरभिरसा, ताम्–घनसुरभिरसाम् । (स. ब. ब. व्री.)

**पुष्पमालाम्**–पुष्पाणां माला–पुष्पमाला, ताम्–पुष्पमालाम् । ( ष. त पु. )

**आमूलालोलधूलीबहुलपरिमलालीढलोलालिमालाम्**–आ मूलात् –आमुलम्, " पर्यपाङ्बहि० " ३।१।३२ ( अव्ययी भाव. स. ) आमूलेन आलोला–आमूलालोला, ( तृ. त. पु. ) बहुलाश्च ते परिमलाश्च–बहुलपरिमलाः, ( वि. पू. क. ) धूलीनां बहुलपरिमलाः–धूलीबहुलपरिमलाः, ( ष. त. पु. ) धूलीबहुलपरिमलेषु आलीढा–धूलीबहुलपरिमलालीढा, " क्तेन " ३।१।९२ ( स. त. पु. ) लोलाश्चामी अलयश्च–लोलालयः, (वि. पू. क.) लोलालीनां माला–लोलालिमाला, (ष. त. पु.) धूलीबहुलपरिमलालीढा लोलालिमाला यस्यां सा–धूलीबहुलपरिमलालीढलोलालिमाला, ( स. ब. व्री. ) आमूलालोला धूलीबहुलपरिमलालीढलोलालिमाला–आमूलालोलधूलीबहुलपरिमलालीढलोलालिमाला, ताम्–आमूलालोलधूलीबहुलपरिमलालीढलोलालिमालाम् । ( वि. पू. क. )

### भक्तामरपादपूर्तिश्रीऋषभदेवस्तुतिः
( वसन्ततिलकावृत्तम् )

श्री ऋषभदेवचरणकमलसंस्तवना....

**भक्तामरप्रणतमौलिमणिप्रभाणा–,**
**मुद्दीपकं जिन ! पदाम्बुजयामलं ते ।**
**स्तोष्ये मुदाहमनिशं किल मारुदेव !,**
**दुष्टाष्टकर्मरिपुमण्डलभित्सुधीर ! ॥ १ ॥**

अन्वय—

दुष्टाष्टकर्मरिपुमण्डलभित् ! सुधीर ! मारुदेव ! जिन ! किल अहं ते भक्तामरप्रणतमौलिमणिप्रभाणाम् उद्दीपकं पदाम्बुजयामलम् अनिशं मुदा स्तोष्ये

भक्तामरेति... 'दुष्टाष्टकर्मरिपुमण्डलभित्' दुष्टानि दुष्यते मलीनीक्रियते आत्मा एभिः कृच्छ्राणि दुःखदायकत्वाद् अष्टौ कर्माणि ज्ञानावरणीयादिलक्षणानि तानि एव रिपवः शत्रवः आत्मनोऽन्तरङ्गगुणसंपदावारकत्वात् "रिपौ वैरि–सपत्नारि–द्विषद् –द्वेषण–दुर्हृदः ॥१०॥ इत्यमरः (२।८।१०)। तेषां मण्डलं चक्रं समूहं वा भिनत्तीति प्रणाशक इत्यर्थः। "स्यान्मण्डलं द्वादश-राजके च देशे च बिम्बे च कदम्बके च। कुष्ठप्रभेदेऽप्युपसूर्यकेऽपि भुजङ्गभेदे शुनि मण्डलः ॥८१॥ इति विश्वः (१५५।८१)। 'सुधीर !' शोभनः सर्वोत्कृष्टत्वात्, धीरः धियं राति–धीरः, 'आतो डो ऽह्वा०' (सि. ५।१।७६)....डः, धियमीरयति धीरः, "नाम्युपान्त्यः" (सि. ५।१।५४)....कः, धैर्यान्वितः प्राज्ञो वा तदामन्त्रणम् ! "धीरो धैर्यान्विते स्वैरे बुधे क्लीबं तु कुङ्कुमे। इति मेदिनी (१२६।५१)। 'मारुदेव !' मरुदेव्याः अपत्यं "ङसोऽपत्ये" (सि. ६।१।२८) सूचितः 'प्राग्जितादण्' (सि. ६।१।१३)....अण्, ऋषभदेवस्तदामन्त्रणम् !। 'जिन' ! रागद्वेषविजेता प्रभुस्तदामन्त्रणम् ! 'किल' अत्र सम्भावनार्थे "किलशब्दस्तुवार्तायां संभाव्यानुनयार्थयोः" इति विश्वः (१९१।६१) निम्नोक्तस्वरूपि चरणयुगलं स्तोतुमक्षमोऽपि त्वत्कृपयैव स्तवनार्थं क्षमीभवेयमिति सम्भाव्यते कर्त्रा। 'अहम्' कर्ता स्वयम्। 'ते' तव। 'भक्ता-मरप्रणतमौलिमणिप्रभाणाम्' भक्ताः सेवकाः जिनेश्वरानुरागिणः,

अमराः देवास्तेषां प्रणताः कृतनमस्कारत्वात् नम्रीभूताः–चरणविलग्ना ये मौलयः मुकुटाः "मौलिः किरीटे धम्मिले चूडाकङ्केलिमूर्द्धसु" इत्यनेकार्थः (२।४९६)। तेषु विलसन्तो ये मणयः वैडूर्यादिरत्नानि तेषां याः प्रभाः कान्तयस्तासाम् उद्दीपकम् उद्दु प्रबलतया प्रभोः नखद्युतिसम्मिलितत्वात् दीप्यते प्रोज्ज्वालकं कान्ति द्विगुणां कुर्वदित्यर्थः। 'पदाम्बुजयामलम्' पदौ चरणौ एव अम्बुजे कमले तयोः यामलं युगलं। "युगं द्वंतं यमं द्वन्द्वं युग्मं यमलयामले' इति हैमः (१४२४)। 'अनिशं' सततम् अप्रमत्तभावत्वेन। 'मुदा' हर्षेण। 'स्तोष्ये' स्तुतिविषयं करिष्ये। इदं श्लोकचतुष्कं वसन्ततिलकावृत्तम् तल्लक्षणत्विदम् "उक्ता वसन्ततिलका तभजा जगौ गः"।

**અર્થ**–દુષ્ટ એવા આઠ કર્મરૂપી શત્રુનાં સમૂહને ભેદી નાખનાર, સુંદર ધૈર્યવાળા, એવા હે મરૂદેવી માતાનાં પુત્ર! (ઋષભદેવ) જિનેશ્વર ભગવંત! ખરેખર હું તારા ભક્ત એવા દેવોનાં પ્રણામ કરાયેલાં એવા મુગુટોનાં મણિઓની કાંતિને વિશેષ તેજસ્વી કરનારા ચરણરૂપી કમલનાં યુગલની હંમેશા હર્ષથી સ્તુતિ કરીશ...

समास–

**भक्तामरप्रणतमौलिमणिप्रभाणाम्**–भक्ताश्चामी अमराश्च–भक्तामराः, (वि. पू. क.) प्रणताः मौलयः–प्रणतमौलयः, (वि. पू. क.) भक्तामराणां प्रणतमौलयः–भक्तामरप्रणतमौलयः, (ष. त. पु.) भक्तामरप्रणतमौलीनां मणयः–भक्तामरप्रणतमौलिमणयः, (ष. त. पु.) भक्तामरप्रणतमौलिमणीनां प्रभाः–भक्तामरप्रणतमौलिमणिप्रभाः, तासाम्, भक्तामरप्रणतमौलिमणिप्रभाणाम्। (ष. त. पु.)

पदाम्बुजयामलम्—अम्बुनि जाते—अम्बुजे, 'सप्तम्याः' ५।१।१६९....ड, ( उप. त. पु. ) पदौ एव अम्बुजे—पदाम्बुजे, (अव. पू. क.) पदाम्बुजयोः यामलम्—पदाम्बुजयामलम्, तद्—पदाम्बुजयामलम् । (ष.त.पु.)

मारुदेव !—मरुदेव्याः अपत्यम्—मारुदेवः, तत्संबोधनम्—मारुदेव !

दुष्टाष्टकर्मरिपुमण्डलभित्—अष्टानां कर्मणां समाहारः—अष्टकर्म, ( द्वि. क. ) दुष्टम् अष्टकर्म—दुष्टाष्टकर्म, ( वि. पू. क. ) रिपोः मण्डलम्—रिपुमण्डलम्, ( ष. त. पु. ) दुष्टाष्टकर्म एव रिपुमण्डलम्–दुष्टाष्टकर्मरिपुमण्डलम्, ( अव.पू.क. ) दुष्टाष्टकर्मरिपुमण्डलं भिनत्तीति–दुष्टाष्टकर्मरिपुमण्डलभिद्, तत्संबोधनम्–दुष्टाष्टकर्मरिपुमण्डलभिद् ! ( उप. त. पु. ) 'क्विप्' ५।१।१४८....क्विप् ।

सुधीर !–शोभनः धीरः–सुधीरः, तत्संबोधनम्–सुधीर ! । (सु.पू.त.पु.)

श्री देवाधिदेवस्यातिशयचतुष्कगर्भिता स्तुतिः

**श्रीमज्जिनेश्वरकलापमहं त्रिलोक्या–,**
**मुद्योतकं दलितपापतमोवितानम् ।**
**भव्याम्बुजातदिननाथनिभं स्तवीमि,**
**भक्त्या नमस्कृतममर्त्यनराधिराजैः ॥ २ ॥**

अन्वय–

अहं दलितपापतमोवितानं, त्रिलोक्याम् उद्योतकं, भव्याम्बुजातदिननाथनिभम्, अमर्त्यनराधिराजैः ( भक्त्या ) नमस्कृतं, श्रीमज्जिनेश्वरकलापं भक्त्या स्तवीमि....

श्रीमज्जिनेश्वरेति....'अहं' स्तुतिकारकः । 'दलितपापतमोवितानम्' दलितं दलं खण्डं कृतं चूर्णितं पापानि अज्ञानानि कर्माणि वा तान्येव तमांसि अन्धकारास्तेषां वितानं विस्तरणं येन

स तम्। "वितानं कदके यज्ञे, विस्तारे क्रतुकर्मणि। तुच्छे मन्दे वृत्तभेदे, शून्यावसरयोरपि" ॥४०६॥ इत्यनेकार्थः (३।४०६)। अथ आवारकस्य ज्ञानावरणीयादेः दूरीकृतत्वात् 'त्रिलोक्याम्' त्रयाणां उर्ध्व–तिर्यगधोलक्षणानां लोकानां जगतां समाहारस्तस्याम्। "लोको विश्वे जने" इत्यनेकार्थः ( २।१६ )। 'उद्योतकम्' प्रकाशकं प्राप्तकेवलज्ञानदर्शनत्वात्। एतेन पदद्वयेन प्रभोः ज्ञानातिशयोऽवबोध्यः । 'भव्याम्बुजातदिननाथनिभम्' भव्याः आसन्नमोक्षगामिणः त एव अम्बुजातानि अम्बुनि जले जायन्ते स्म उत्पन्नानि कमलानि तेषां विकाशने देशनादानेन वैराग्यप्रकटीकरणे दिननाथस्य दिनस्य दिवसस्य नाथः स्वामी तस्य सूर्यस्य निभः सदृक् तम्। "निभः स्यात्सदृशे व्याजे" इत्यनेकार्थः (२।३०६)। वैराग्यमयोपदेशदायकत्वेन भविककमलविकाशनं करोति। उपदेशं तु वचनं विना कुतः? अतः एतत्पदं वचनातिशयज्ञायकं ज्ञेयम्। 'अमर्त्यनराधिराजैः' अमर्त्याः देवाश्च नराः मानवाश्च तेषाम् अधिकाः राजानः स्वामिनः शक्रा नृपा इत्यर्थस्तैः। 'भक्त्या' हार्दिकानुरागेण। 'नमस्कृतम्' प्रणतं प्रणमनं कृतस्तम्। प्रभोस्त्रिजगदीश्वरत्वात्सर्वेऽपि तस्मै नमस्यन्ति एतत्पदेन तु पूजातिशयः सूच्यते। 'श्रीमज्जिनेश्वरकलापम्' श्रीः अष्टमहाप्रातिहार्यात्मिका अतिशयचतुष्किका वा लक्ष्मीर्येषां तेषां श्रीमन्तः जिनानां वीतरागाणाम् ईश्वरः प्रभवः तेषां कलापः समूहस्तम्। "कलापः संहतौ बर्हे काञ्च्यां भूषणतूणयोः" इत्यजयः। 'भक्त्या' जिनेश्वरं प्रति प्रीतिभावेन। 'स्तवीमि' स्तौमि । 'दलितपापतमोवितानम्'

**अज्ञानस्य अन्धत्वमेव महारिपुः—महापायः, तत्तु दूरीकृतमेवातः एतद्विशेषणेन अपायापगमातिशयोऽवगम्यः । इति अतिशयचतुष्कघटना ।**

અર્થ—હું–દલન કરાયો છે પાપરૂપી અંધકારનો વિસ્તાર જેના વડે એવા, ત્રણે લોકને વિષે પ્રકાશ કરનાર, ભવ્યજીવોરૂપી કમલને વિકસિત કરનાર સૂર્ય સમાન, દેવ અને મનુષ્યોનાં રાજાઓ વડે (ભક્તિથી) નમસ્કાર કરાયેલા, શોભાવાળા શ્રી જિનેશ્વરદેવોનાં સમૂહની ભક્તિથી સ્તુતિ કરૂ છું...

**समास—**

**श्रीमज्जिनेश्वरकलापम्—** श्रियः सन्ति येषाम्—श्रीमन्तः, 'तदस्या०' ७।२।१....मतु, जिनानाम् ईश्वराः—जिनेश्वराः, (ष.त.पु.) श्रीमन्तः जिनेश्वराः—श्रीमज्जिनेश्वराः, (वि. पू. क.)। श्रीमज्जिनेश्वराणां कलापः—श्रीमज्जिनेश्वरकलापः, तम्—श्रीमज्जिनेश्वरकलापम् । (ष.त.पु.)

**त्रिलोक्याम्—**त्रयाणां लोकानां समाहारः—त्रिलोकी, तस्याम्—त्रिलोक्याम् । (द्विगु. क.)

**दलितपापतमोवितानम्—**पापमेव तमः—पापतमः, (अव.पू.क.) पापतमसः वितानम्—पापतमोवितानम्, "कृति" ३।१।७७.... (ष. त. पु.) दलितं पापतमोवितानं येन सः—दलितपापतमोवितानः, तम्—दलितपापतमोवितानम् । (स. ब. व्री.)

**भव्याम्बुजातदिननाथनिभम्—** अम्बुनि जातानि—अम्बुजातानि, "क्तेन" ३।१।९२ (स. त. पु.) भव्याः एव अम्बुजातानि—भव्याम्बुजातानि, (अव. पू. क.) दिनस्य नाथः—दिननाथः, (ष.त.पु.) भव्याम्बुजातानि विकाशयतीति—भव्याम्बुजातविकाशकः, 'णकतृचौ०'

५।१।४८...णक, ( उप. त. पु. ) भव्याम्बुजातविकाशकः दिननाथः—भव्याम्बुजातदिननाथः, ( म. प. लो. क. ) भव्याम्बुजातदिननाथस्य निभः —भव्याम्बुजातदिननाथनिभः, तम्—भव्याम्बुजातदिननाथनिभम् । (ष.त.पु.)

अमर्त्यनराधिराजैः—न मर्त्याः—अमर्त्याः, ( न. त. पु. ) अमर्त्याश्च नराश्च—अमर्त्यनराः, ( इ. द्व. ) अधिकः राजानः—अधिराजाः, ( प्रा. क. ) "राजन्सखेः" ७।३।१०६.... अट्, अमर्त्यनराणाम् अधिराजाः—अमर्त्यनराधिराजाः, तैः—अमर्त्यनराधिराजैः । (ष.त.पु.)

श्री जिनभारतीप्राकट्यम्....

**वर्यां जिनक्षितिपतेस्त्रिपदीमवाप्य,**
**गच्छेश्वरैः प्रकटिता किल वाग् मुदा या ।**
**सम्यक् प्रणम्य जिनपादयुगं युगादा—**
**वाढ्या शुभार्थनिकरैर्भुवि साऽस्तु लक्ष्म्यै ॥ ३ ॥**

अन्वय—

युगादौ जिनपादयुगं सम्यक् प्रणम्य, जिनक्षितिपतेः वर्यां त्रिपदीम् अवाप्य, गच्छेश्वरैः मुदा या प्रकटिता शुभार्थनिकरैः आढ्या सा वाग् किल भुवि लक्ष्म्यै अस्तु । ....

वर्यामिति....' युगादौ ' युगस्य कालविशेषस्य अत्र तु धर्मप्रवर्तनकालस्य आदौ प्रारम्भे । " युगं हस्तचतुष्कं स्याद्रथाद्यङ्गे कृतादिके । वृद्धिनामौषधे युग्मे ' इत्यनेकार्थः ( २।४२ ) । ' जिनपादयुगम् ' जिनस्य प्रभोः पादयोः चरणयोः युगं युग्मं द्विकं वा ।

'सम्यक्' शोभनत्वेन आन्तरिकानुरागस्य विद्यमानत्वात् । 'प्रणम्य' प्रकर्षेण आगमोक्तविधिना नत्वा नमस्कृत्य । 'जिनक्षितिपतेः' जिनानां सामान्यकेवलिभगवतां क्षितिपतिः राजेव तस्मात् जिनेन्द्रात् तीर्थंकृत्सकाशादित्यर्थः । 'वर्याम्' श्रेष्ठां मुख्यां वा । "मुख्यवर्यवरेण्याश्च प्रवर्हानवगर्ध्यवत् ॥ ५७ ॥ इत्यमरः ( ३।१।५७ ) । 'त्रिपदीम्' त्रयाणां पदानां चरणानां समाहारः, त्रयः पादाः यस्यां वा' ध्रौव्योत्पादव्ययात्मिका ताम् 'उपन्नेइ वा विगमेइ वा धुवेइ वा' इति लक्षणाम् । 'अवाप्य' गृहीत्वा । 'गच्छेश्वरैः' गच्छानां नियुक्तमुनिवृन्दानाम् ईश्वरैः स्वामिभिः गणाधिपतिभिरित्यर्थः । 'मुदा' हर्षेण । 'या' निम्नोक्तलक्षणा वाणी । 'प्रकटिता' प्रकाशिता प्रादुष्कृता वा । 'शुभार्थनिकरैः' शुभानाम् उत्तमानां वीतरागविहितत्वाच्च अर्थाणां हेतुवाच्यविषयाणां निकरैः समूहैः । 'आढ्या' पूर्णा संपन्ना वा सर्वज्ञत्वेन ज्ञानविषयीभूतत्वाद् । 'सा' प्रकटितरूपा । 'वाग्' गीः जिनेश्वरदेववचनम् वा । 'भुवि' जगति । 'लक्ष्म्यै' मोक्षप्राप्तिस्वरूपायै सर्वदेशविरतिलक्षणान्तरिकीविभूतये स्वर्ग–सुखादिबाह्यसंपदे वा । 'अस्तु' भवतु ।

અર્થ—( ધર્મ ) યુગની આદિમાં જિનેશ્વરદેવનાં ચરણયુગલને સારી રીતે પ્રણામ કરીને, જિનરાજ પાસેથી સુંદર એવી ત્રિપદીને પ્રાપ્ત કરીને, ગણધરદેવોવડે હર્ષથી જે પ્રગટ કરાઈ, સારા અર્થના સમૂહવડે પૂર્ણ એવી તે વાણી ખરેખર પૃથ્વીને વિષે લક્ષ્મીને માટે થાઓ...

समास—

**जिनक्षितिपतेः**—क्षित्याः पतिः–क्षितिपतिः, ( ष. त. पु. ) जिनानां क्षितिपतिः–जिनक्षितिपतिः, तस्मात्–जिनक्षितिपतेः । (ष.त.पु.)

**त्रिपदीम्**—त्रयाणां पदानां समाहारः-त्रिपदी, ताम्–त्रिपदीम्। ( द्विगु. क. ) "द्विगोः समाहारात्०" २।४।२२...ङी,

**गच्छेश्वरैः**—गच्छस्य ईश्वराः—गच्छेश्वराः, तैः – गच्छेश्वरैः। ( ष. त. पु. )

**प्रणम्य**—प्रकर्षेण नत्वा—प्रणम्य। ( गति. त. पु. ).

**जिनपादयुगम्**—जिनस्य पादौ—जिनपादौ, ( ष. त. पु. ) जिनपादयोः युगम्—जिनपादयुगम्, तद्–जिनपादयुगम्। ( ष. त. पु. )

**युगादौ**—युगस्य आदिः-युगादिः, तस्मिन्–युगादौ। (ष.त.पु.)

**शुभार्थनिकरैः**—शुभाश्चामी अर्थाश्च-शुभार्थाः, ( वि. पू. क. ) शुभार्थानां निकरा—शुभार्थनिकराः, तैः—शुभार्थनिकरैः। (ष.त.पु.)

**गोमुखयक्षगुणगानम्**

**यक्षेश्वरस्तव जिनेश्वर! गोमुखाह्वः,**
**सेवां व्यधत्त कुशलक्षितिभृत्पयोदः।**
**त्वत्पादपङ्कजमधुव्रततां दधानो–,**
**ऽवालम्बनं भवजले पततां जनानाम्॥ ४॥**

**अन्वय—**

जिनेश्वर! कुशलक्षितिभृत्पयोदः, भवजले पततां जनानाम् अवालम्बनं, त्वत्पादपङ्कजमधुव्रततां दधानः, गोमुखाह्वः, यक्षेश्वरः तव सेवां व्यधत्त....

यक्षेश्वर इति...'जिनेश्वर!' जिनानां वीतरागाणाम् ईश्वरः स्वामी तत्संबोधनम्। 'कुशलक्षितिभृत्पयोदः' कुशलं पुण्यं मङ्गलं वा तदेव क्षितिभृद् क्षितिं पृथ्वीं बिभर्ति धारयतीति क्षितिभृत् पर्वतस्तस्योल्लासने यद्वा क्षितौ मह्यां बिभर्ति पुष्णाति इति वृक्षस्तस्य

विकाशने पयोदः पयो जलं ददाति प्रयच्छतीति अम्भोधरः मेघो वा तस्येव....पर्वतमेघयोः सख्यतासम्बन्धत्वाद्, अद्रेः उन्नतत्वाद् सहचारि–सम्बन्धेन सख्यता ज्ञेया। 'भवजले' भवः संसारः एव जलं पानीयं तस्मिन्। 'पतताम्' निमज्जताम्। 'जनानाम्' लोकानाम्। 'अवालम्बनम् आलम्बनभूतः सम्यग्दृष्टिसेवातत्परतादि-गुणनिधित्वात्। 'त्वत्पादपङ्कजमधुव्रतताम्' तव श्रीऋषभजिनेश्वरस्य पादौ चरणौ एव पङ्कजे पङ्कात् पङ्के कर्दमात् कर्दमे वा जातं कमलं तस्मिन् मधुव्रततां–मधु पुष्परसमेव भक्ष्यं व्रतं यस्य षट्पदस्तस्य भावस्ताम् भ्रमरतामित्यर्थः। "मधुव्रतो मधुकरो मधुलिण्मधुपालिनः। द्विरेफ–पुष्पलिड्–भृङ्गषट्पदभ्रमरालयः ॥२९॥ इत्यमरः (२।५।२९)। 'गोमुखाह्वः' गोमुखः गोमुखमिवमुखमस्य प्रतिमायां, तन्नामयक्षाधिपतिः आह्वा अभिधानं यस्य श्रीऋषभदेवशासनरक्षकविशेषः। 'यक्षेश्वरः' यक्षाणाम् तज्जातीयदेवानाम् ईश्वरः प्रभुः। 'तव' श्रीऋषभजिनेश्वरस्य। 'सेवाम्' भक्तिम् उपासनां वा। 'व्यधत्त' अकार्षीत्।

અર્થ:-હે જિનેશ્વરદેવ! કુશલરૂપી પર્વતને ઉલ્લસિત કરનાર મેઘસમાન, તમારા ચરણરૂપી કમલને વિષે ભ્રમરપણાને ધારણ કરતો, સંસારજલમાં પડતાં માણસોને આલંબન સ્વરૂપ એવો ગોમુખ નામનો યક્ષરાજ તમારી સેવા કરી રહ્યો છે.

समास–

यक्षेश्वरः–यक्षाणाम् ईश्वरः–यक्षेश्वरः। (ष.त.पु.)

जिनेश्वर!–जिनानाम् ईश्वरः–जिनेश्वरः, तत्संबोधनम्–जिनेश्वर!। (ष. त. पु.)

**गोमुखाह्वः**—गोमुखः आह्वः यस्य सः—गोमुखाह्वः । (स.ब.व्री.)

**कुशलक्षितिभृत्पयोदः**—क्षितिं बिभर्ति—क्षितिभृद् "क्विप्" ५।१।१४८...क्विप्, (उप.त.पु.) कुशलमेव क्षितिभृद्—कुशलक्षितिभृद्, (अव. पू. क.) पयो ददातीति...पयोदः, (उप. त. पु.) "आतोडो०" ५।१।७६...ड, कुशलक्षितिभृतम् उल्लासयतीति....कुशलक्षितिभृदुल्लासकः, ( उप. त. पु. ) कुशलक्षितिभृदुल्लासकः पयोदः—कुशलक्षितिभृत्पयोदः ( म. प. लो. क. )

**त्वत्पादपङ्कजमधुव्रतताम्** —तव पादौ—त्वत्पादौ, (ष. त. पु.) पङ्के जायेते स्म—पङ्कजे, "सप्तम्या०" ५।१।१६९....ड, त्वत्पादौ एव पङ्कजे—त्वत्पादपङ्कजे । (अव.पू.क.) मधुनः मधुनि वा व्रतम् यस्य सः—मधुव्रतः, (व्य.ब.व्री.) मधुव्रतस्य भावः—मधुव्रतता, "भावे त्वतल्" ७।१।५०.... तल्, त्वत्पादपङ्कजयोः मधुव्रतता—त्वत्पादपङ्कजमधुव्रतता, ताम्—त्वत्पादपङ्कजमधुव्रतताम् । ( स. त. पु. )

**भवजले**—भवः एव जलम्—भवजलम् , तस्मिन्—भवजले । ( अव. पू. क. )

---

## श्रीकल्याणमन्दिरपादपूर्तिश्रीवीरजिनस्तुतिः।

( वसन्ततिलकावृत्तम् )

श्रीसिद्धार्थसुतसंस्तवनम्...

**कल्याणमन्दिरमुदारमवद्यभेदि,**
**दुष्कर्मवारणविदारणपञ्चवक्त्रम् ।**
**यत्पादपद्मयुगलं प्रणमन्ति शक्राः,**
**स्तोष्ये मुदा जिनवरं जिनत्रैशलेयम् ॥ १ ॥**

---

१. छंदो भंग थाय छे.

अन्वय—

शक्राः अवद्यभेदि यत्पादपद्मयुगलं प्रणमन्ति कल्याणमन्दिरम्, उदारं, दुष्कर्मवारणविदारणपञ्चवक्त्रं, जिनवरं, जिनत्रैशलेयं मुदा, स्तोष्ये।

कल्याणमन्दिरमिति....'शक्राः' इन्द्राः। 'अवद्यभेदि' अवद्यानि पापानि कर्माणि वा भिनत्ति नाशं करोतीति पापघातीत्यर्थः। 'यत्पादपद्मयुगलम्' यस्य श्रीमहावीरजिनेन्द्रस्य पादौ चरणौ एव पद्मे कमले तयोः युगलं द्विकम्। 'प्रणमन्ति' वन्दन्ते नमनं कुर्वन्ति वा। 'कल्याणमन्दिरम्' कल्याणस्य मङ्गलस्य सुखस्य वा मन्दिरं धाम। 'उदारम्' महन्तं दातारं वा सेवकजनाय स्वीयस्थान-समर्पकत्वात्। "उदारो दक्षिणो महान् ॥१५८॥ दाता" इत्यनेकार्थः (३।१५८।१५९)। 'दुष्कर्मवारणविदारणपञ्चवक्त्रम्' दुष्टानि कृच्छ्राणि कर्माणि पापानि ज्ञानावरणीयादिरूपाणि वा तान्येव वारणः हस्ती तस्य विदारणे विनाशने पञ्च चतुष्पादमेकश्च मुखं पञ्चानि विस्तृतानि वा वक्त्राणि मुखानि यस्य तम् सिंहमिव। 'जिनवरम्' जिनेषु वीतरागेषु वरम् उत्तमम्। 'जिनत्रैशलेयम्' जिनो वीतरागश्चासौ त्रैशलेयः त्रिशलायाः सिद्धार्थपत्न्याः अपत्यं वीरनामतीर्थपतिश्च तम्। 'मुदा' हर्षेण। 'स्तोष्ये' स्तुतिं करिष्ये। इदं पद्यचतुष्कं वसन्त-तिलकावृत्तम् तल्लक्षणन्तु प्रागुक्तम्।

અર્થ:-ઇન્દ્રો પાપને ભેદનાર એવા જેનાં ચરણકમલનાં યુગલને નમસ્કાર કરે છે કલ્યાણનાં ધામસમા, મહાન્, દુષ્કર્મરૂપી હાથીને વિદારવામાં સિંહ સરખાં, વીતરાગ એવા ત્રિશલાદેવીના પુત્ર (શ્રીવર્ધમાન) જિનેશ્વરદેવની હું હર્ષથી સ્તુતિ કરીશ.

समास—

कल्याणमन्दिरम् :—कल्याणस्य मन्दिरम्—कल्याणमन्दिरम्, तद्—कल्याणमन्दिरम्। (ष. त. पु.)

**अवद्यभेदि**—अवद्यानि भिनत्ति—अवद्यभेदि, तद्-अवद्यभेदि। 'अजातेः शीले ५।१।१५४...णिन्, (उप. त. पु.)

**दुष्कर्मवारणविदारणपञ्चवक्त्रम्** – दुष्टानि कर्माणि—दुष्कर्माणि, "दुर्निन्दाकृच्छ्रे" ३।१।४३ (प्रादि. क.) दुष्कर्माणि एव वारणः—दुष्कर्मवारणः, (अव. पू. क.) दुष्कर्मवारणस्य विदारणम्—दुष्कर्मवारण-विदारणम् "कृति" ३।१।७७ (ष. त. पु.) पञ्च वक्त्राणि यस्य सः—पञ्चवक्त्रः, (स.ब.व्री.) दुष्कर्मवारणविदारणे पञ्चवक्त्रः इव—दुष्कर्मवारण-विदारणपञ्चवक्त्रः,तम्—दुष्कर्मवारणविदारणपञ्चवक्त्रम्। "सिंहाद्यैः पूजायाम्" ३।१।८९ (स. त. पु.)

**यत्पादपद्मयुगलम्** –यस्य पादौ—यत्पादौ, (ष. त. पु.) यत्पादौ एव पद्मे—यत्पादपद्मे, (अव.पू.क.) यत्पादपद्मयोः युगलम्—यत्पादपद्मयुग-लम्, तद्—यत्पादपद्मयुगलम्। (ष. त. पु.)

**जिनवरम्** –जिनेषु वरः—जिनवरः, तम्—जिनवरम। (स. त. पु.)

**जिनत्रैशलेयम्** –त्रिशलायाः अपत्यम्—त्रैशलेयः, "ङ्याप्त्यूङः" ६।१।७०...एयण्, जिनश्चासौ त्रैशलेयश्च—जिनत्रैशलेयः, तम्—जिन-त्रैशलेयम। (वि. पू. क.)

**प्रभोः पादपद्मप्रणमनम्**—

**क्षीणाष्टकर्मनिकरस्य नमोऽस्तु नित्यम्,**<br>
**भीताभयप्रदमनिन्दितमङ्घ्रिपद्मम्।**<br>
**इष्टार्थमण्डलसुसर्जनदेववृक्षम्,**<br>
**नित्योदयं दलिततीव्रकषायमुच्चैः ॥२॥**

**अन्वय**—

क्षीणाष्टकर्मनिकरस्य भीताभयप्रदम्, उच्चैः अनिन्दितम्, इष्टार्थ-

मण्डलसुसर्जनद्रेवव्रृक्षं, दलिततीव्रकषायं, नित्योदयम्, अङ्घ्रिपद्मं नित्यं नमः अस्तु ।....

क्षीणाष्टेति....'क्षीणाष्टकर्मनिकरस्य' क्षीणानि विनष्टानि अष्टौ कर्माणि ज्ञानावरणीयादिलक्षणानि येषां जिनेश्वरदेवास्तेषां निकरस्य समूहस्य । 'भीताभयप्रदम्' भीतानां कातराणां जन्मजरामरणादिभयेन देवमनुजतिर्यक्कृतोपद्रवरूपभिया वा विह्वलीभूतानां वा अभयं निर्भीरुत्वं प्रददाति प्रयच्छतीति नामस्मरणस्यापि भयहारित्वात्, यदुक्तं शक्रस्तवे 'अभयदयाणं' इति....''अथ कातरः । दरितश्चकितो भीतोभीरु –भीरुक–भीलुकाः ॥३६५॥ इति हैमः । 'उच्चैः' ऊर्ध्वस्वरेण 'अनिन्दितम्' न निन्दितं नैव विगीतम् अपि तु प्रशस्तं त्रिलोक–पूज्यत्वात् सुरासुरनरेन्द्रैः संस्तुतमित्यर्थः । 'इष्टार्थमण्डलसुसर्जनदेवव्रृक्षम्' इष्टानां वाञ्छितानाम् अर्थानां वस्तूनां मण्डलस्य समूहस्य सुसर्जने सम्यक् विरचने पूरणे वा संतुष्टिदायकत्वाद् देवव्रृक्षं देवानां सुराणां देवैः अमरैः अधिष्ठितं वा व्रृक्षः पादपस्तमिव कामितकल्पद्रूमसममित्यर्थः । 'दलिततीव्रकषायम्' दलिताः विनाशिताश्चूर्णीकृता वा तीव्राः कटवः दारुणदुःखदायित्वात् कषायाः क्रोधमानमायालोभरूपाः येन तद् । 'नित्योदयम्' नित्यं सततम्–उदय उन्नतिः ऐश्वर्यवृद्धि र्वा यस्य तद् । "उदयः पर्वतोन्नत्योः" इत्यनेकार्थः (३।४७४)। 'अङ्घ्रिपद्मम्' अङ्घ्री चरणौ एव पद्मं कमलम् । 'नित्यम्' सदैव । 'नमः' नमस्कारं वन्दनं वा । 'अस्तु' भवतु ।

અર્થ :–નાશ કર્યો છે આઠ કર્મનો જેમણે એવા (જિનેશ્વરદેવ)નાં સમૂહનાં–બીક પામેલાને અભય આપનાર, અત્યંત પ્રશંસા પામેલ, ઇચ્છિત પદાર્થના સમૂહને સર્જન કરવામાં કલ્પવૃક્ષ સમાન, દલન કરાયો છે તીવ્ર કષાય જેમણે એવા, નિત્ય ઉદય છે જેનો એવા ચરણકમલને હંમેશા નમસ્કાર થાઓ...

समास–

**क्षीणाष्टकर्मनिकरस्य**–क्षीणानि अष्ट कर्माणि येषां ते–क्षीणाष्टकर्माणः ( स. ब. ब. व्री ) क्षीणाष्टकर्मणां निकरः–क्षीणाष्टकर्मनिकरः, तस्य–क्षीणाष्टकर्मनिकरस्य । ( ष. त. पु. )

**भीताभयप्रदम्** –अभयं प्रददाति–अभयप्रदम्, ( उप. त. पु. ) "प्राज्ज्ञश्च" ५।१।७९...ड, भीतानाम् अभयप्रदम्–भीताभयप्रदम्, तद्–भीताभयप्रदम् । "कृति" ३।१।७७...( ष. त. पु. )

**अनिन्दितम्** –न निन्दितम्–अनिन्दितम्, तद्–अनिन्दितम् । ( न. तः पु. )

**अङ्घ्रिपद्मम्** –अङ्घ्री एव पद्मम्–अङ्घ्रिपद्मम्, तद्–अङ्घ्रिपद्मम् । ( अव. पू. क. )

**इष्टार्थमण्डलसुसर्जनदेववृक्षम्** –इष्टाः अर्थाः–इष्टार्थाः,(वि.पू.क.) इष्टार्थानां मण्डलम्–इष्टार्थमण्डलम्, (ष.त.पु.) इष्टार्थमण्डलस्य सुसर्जनम्–इष्टार्थमण्डलसुसर्जनम्, "कृति" ३।१।७७ (ष. त. पु.) देवैः अधिष्ठितः–देवाधिष्ठितः, (तृ. त. पु.) देवाधिष्ठितः वृक्षः–देववृक्षः, (म. प. लो. क.) इष्टार्थमण्डलसुसर्जने देववृक्षः इव–इष्टार्थमण्डलसुसर्जनदेववृक्षः, तम्–इष्टार्थमण्डलसुसर्जनदेववृक्षम् । "सिंहाद्यैः पूजायाम्" ३।१।८९...(स.त.पु.)

**नित्योदयम्** –नित्यम् उदयः यस्य तद्–नित्योदयम्, तद्–नित्योदयम् । ( स. ब. व्री. )

**दलिततीव्रकषायम्** –दलिताः तीव्राः कषायाः येन तद्–दलिततीव्रकषायम्, तद्–दलिततीव्रकषायम् । ( स. ब. ब. व्री. )

श्रीसिद्धान्तप्राप्त्यै प्रभोः प्रार्थना–

**जैनागमं दिशतु सर्वसुखैकद्वारम्,**
**श्रीनन्दनक्षितिजहव्यहतिप्रकारम् ।**

---

१. छंदो भंग थाय छे.

संसारसागरनिमज्जदशेषजन्तु–
बोहित्थसन्निभमभीष्टदमाशु मुग्धम् ॥३॥

अन्वय–

संसारसागरनिमज्जदशेषजन्तुबोहित्थसन्निभं, श्रीनन्दनक्षिति-जहव्यहतिप्रकारं, मुग्धम् , अभीष्टदम्, सर्वसुखैकद्वारं, जैनागमम् आशु दिशतु ।

जैनागममिति...'संसारसागरनिमज्जदशेषजन्तुबोहित्थसन्निभम्' संसरन्ति कर्मवशतो जीवा यस्मिन् संसारः प्राणिनिवासः एव सागरः समुद्रस्तस्मिन् निमज्जन्तः निपतन्तः अशेषाः समस्ताः क्षुद्रातिक्षुद्र-जन्तुभ्यः आरभ्य अनुत्तरवासिसुराः इति यावत् जन्तवः प्राणिनः तेषां तारणे बोहित्थस्य प्रवहणस्य सन्निभं सदृशं तुल्यमित्यर्थः । "यानपात्रं वहित्रकम् ॥८७५॥ बोहित्थं वहनं पोतः" इति हैमः । तारकतामात्रं नैव तदग्रेऽपि–'श्रीनन्दनक्षितिजहव्यहतिप्रकारम्' श्रियः लक्ष्म्यः अत्र ज्ञानलक्ष्मीः अध्याहार्या आगमस्तुतित्वात् तासां यद् नन्दनं मेरुगिरिमध्ये आगतं तन्नामकं वनं तस्य ये क्षितिजाः क्षितौ पृथिव्यां जाताः वृक्षाः तेषामुल्लासने विकाशने वा हव्यहतिः हूयते बलियोग्यद्रव्यं यस्मिन् अग्निस्तस्य हतिः विनाशः यत्र मेघ-स्तस्य प्रकारं सदृशम्, ज्ञानसंपत्तिमयनन्दनवनस्थवृक्षविकाशने वारिद-तुल्यमित्यर्थः । "अथ नन्दनम् । इन्द्रोद्याने नन्दनस्तु तनये हर्ष-कारिणि" ॥ ३७७ ॥ इत्यनेकार्थः (३।३७७) "प्रकारौ भेद-सादृश्ये" इत्यमरः (३।३।१६२) । 'मुग्धम्' मुह्यतेऽनेन जगत् मनोहरम् अद्वितीयानेकान्तमार्गदर्शकत्वात् । 'अभीष्टदम्' अभीष्टानि वाञ्छितानि ददाति प्रयच्छतीति मनःकल्पितदायकमित्यर्थः । अत एव 'सर्वसुखैकद्वारम्' सर्वं संपूर्णं सुखम् आनन्दः निर्वाणसुख-

मित्यर्थः, कर्मजनितसुखस्य दुःखदायित्वात् तस्य एकम् अद्वितीयम् अन्यत्र क्वापि अदृष्टत्वात् द्वारं प्रवेशस्थानं, ज्ञानं विना प्रवृत्तेः, प्रवृत्तिं विना प्राप्तेस्तु अशक्यत्वेन एष जैनागमः मोक्षमन्दिरस्य प्रवेशद्वारमिति यथार्थम्। 'जैनागमम्' जिनेन प्रोक्तः जिनस्य वा वीतरागस्यायं जैनः आगमः सिद्धान्तस्तम्। 'आशु' शीघ्रम्। 'दिशतु' विलोकयतु वितरतु वेति। हे जिनेश्वरभगवन्! नः अस्मभ्य-ञ्चेत्यध्याहार्यम्।

समास–

**जैनागमम्** –जिनैः प्रोक्तः–जैनः, जैनश्चासौ आगमश्च–जैनागमः, तम्–जैनागमम्। ( वि. पू. क. )

**सर्वसुखैकद्वारम्**–सर्वं सुखम्–सर्वसुखम्, "पूर्वकालैक" ३।१।९७ (वि. पू. क.) एकं च तद् द्वारं च–एकद्वारम्, पूर्वकालैक०" ३।१।९७ (वि. पू. क.) सर्वसुखस्य एकद्वारम्–सर्वसुखैकद्वारम्, तद्–सर्वसुखैकद्वारम्। ( ष. त. पु. )

**श्रीनन्दनक्षितिजहृव्यहतिप्रकारम्**–श्रीः एव नन्दनम्–श्रीनन्दनम्, (अव.पू.क.) क्षितौ जायन्ते स्म–क्षितिजाः, "सप्तम्याः" ५।१।१६९ ड, ( उप. त. पु. ) श्रीनन्दनस्य क्षितिजाः–श्रीनन्दनक्षितिजाः, ( ष. त. पु. ) श्रीनन्दनक्षितिजान् विकाशयति–श्रीनन्दनक्षितिजविकाशकः, (उप.त.पु.) 'णकतृचौ' ५।१।४८....णक, श्रीनन्दनक्षितिजविकाशकः हृव्यहतिः–श्रीनन्दनक्षितिजहृव्यहतिः, (म.प.लो.क.) श्रीनन्दनक्षितिजहृव्यहतेः प्रकारः–श्रीनन्दनक्षितिजहृव्यहतिप्रकारः, तम्–श्रीनन्दनक्षितिजहृव्यहतिप्रकारम्। ( ष. त. पु. )

**संसारसागरनिमज्जदशेषजन्तुबोहित्थसन्निभम्** –संसारः एव सागरः–संसारसागरः, (अव.पू.क.) संसारसागरे निमज्जन्तः–संसारसागर–

निमज्जन्तः, (स. त. पु.) अशेषाः जन्तवः—अशेषजन्तवः, (वि. पू. क.) संसारसागरनिमज्जन्तः अशेषजन्तवः—संसारसागरनिमज्जदशेषजन्तवः, (वि. पू. क.) संसारसागरनिमज्जदशेषजन्तून् उत्तारयति—संसारसागरनिमज्जदशेषजन्तूत्तारकम् 'णकतृचौ' ५।१।४८....णक, (उप. त. पु.) संसासागरनिमज्जदशेषजन्तूत्तारकम् बोहित्थम्—संसारसागरनिमज्जदशेषजन्तुबोहित्थम्, (म. प. लो. क.) संसारसागरनिमज्जदशेषजन्तुबोहित्थेन सन्निभः—संसारसागरनिमज्जदशेषजन्तुबोहित्थसन्निभः, तम्—संसारसागरनिमज्जदशेषजन्तुबोहित्थसन्निभम्। 'ऊनार्थपूर्वाद्यैः' ३।१।६५ (तृ. त. पु.)

अभीष्टदम्—अभीष्टानि ददाति—अभीष्टदः, तम्—अभीष्टदम्। 'आतोडोऽह्वा०' ५।१।७६...ड, (उप. त. पु.)

श्रीमातङ्गयक्षस्य जिनेन्द्रभक्तिः—

**मातङ्गयक्षरमलां प्रकरोति सेवां,**
**पूर्वान्तमारसमभीप्सितदं विशालम्।**
**उत्पत्तिविस्तरनदीशपतज्जनानां,**
**पोतायमानमभिनम्य जिनेश्वरस्य ॥ ४ ॥**

**अन्वय—**

मातङ्गयक्षः आरसम्, अभीप्सितदं, विशालम्, उत्पत्तिविस्तरनदीशपतज्जनानां पोतायमानं, जिनेश्वरस्य पूर्वान्तम्, अभिनम्य अमलां सेवां प्रकरोति—

मातङ्गयक्ष इति....'मातङ्गयक्षः' मातङ्ग इव महाबलत्वात् मातङ्गयक्षस्तन्नामव्यन्तरनिकायिदेवविशेषः वीरप्रभोः शासनसेवक इत्यर्थः। 'आरसम्' आरम् अरीणां समूहः "षष्ठ्याः समूहे" (सि०६-२-९) इति सूचितः 'प्राग् जितादण्' (सि०६।१।१३)

इति विहितोऽण्, तद्-शत्रुसमूहं स्यति नाशयतीतितम् आरसम् । "आतोडोऽह्वा०" ( सि०५।१।७६ ) इति डः, बाह्यान्तरङ्गरिपु-नाशकमित्यर्थः । 'अभीप्सितदम्' अभितः सर्वतः ईप्सितम् अभि-लषितं यद् वस्तु तद् ददाति प्रयच्छतीतितम्....सर्वसत्त्वसुखकारत्वेन, यदुक्तमन्यत्र—"दर्शनात् दुरितध्वंसी वन्दनात् वाञ्छितप्रदः। पूजनात् पूरकः श्रीणां, जिनः साक्षात् सुरद्रुमः ॥ १ ॥" वाञ्छितदायक-मित्यर्थः। 'विशालम्' महत्तमम्। 'उत्पत्तिविस्तरनदीशपतज्जनानाम्' उत्पत्तिः जन्म तस्य यो विस्तरः व्यासः परम्परा वा तन्मयः यो नदीशः—नदीनां सरिताम् ईशः स्वामी समुद्रः उपलक्षणादत्र संसारो गृह्यते जन्मसन्तानमयसंसारसागरस्तस्मिन पततां निमज्जतां जनानां लोकानाम् । "जनुर्जनन–जन्मानि जनिरुत्पत्तिरुद्भवः" इत्यमरः ( १।४।३० ) । 'पोतायमानम्' 'पोतः प्रवहणः इवाचरन् पोतायमानस्तम् प्रवहणसदृशमित्यर्थः । 'जिनेश्वरस्य' जिनेषु वीतरागेषु ईश्वरस्य स्वामिनः तीर्थकृद्भगवत इत्यर्थः। 'पूर्वान्तिम्' पूर्वतः प्रथमतः तीर्थकृतः इत्यध्याहार्यम् प्रथमजिनपतेः अन्तम् चरमं जिनेश्वरमित्यर्थः, 'अभिनम्य' अभितः सर्वतः मनोवाक्कायत्वेन नत्वा प्रणमनं कृत्वा। 'अमलाम्' न विद्यते मलम् अशुद्धाशयो यस्यां शुद्धाम् वीतरागता-प्राप्त्यै क्रियमाणत्वाद्। 'सेवाम्' पर्युपासनाम्। 'प्रकरोति' प्रकर्षेण आन्तरिकाऽनुरागेण करोति विधत्ते।

**અર્થ** :—માતંગયક્ષ—શત્રુઓનાં સમૂહનો નાશ કરનાર, ઇચ્છિતને આપનાર, મહાન્, જન્મની પરંપરા છે જેમાં એવા ( સંસાર ) સાગરમાં પડતાં માણસોને પાર ઉતારનાર વહાણ સરખાં, તીર્થંકર-ભગવંતોનાં પૂર્વથી અન્તે રહેલાં પ્રભુ (મહાવીરપરમાત્મા)ને નમસ્કાર કરીને નિર્મલ સેવા કરે છે.

समास–

**मातङ्गयक्षः** –मातङ्गः नाम यस्य सः–मातङ्गनामा, (ए. ब. व्री.) मातङ्गनामा यक्षः–मातङ्गयक्षः। ( म. प. लो. क. )

**अमलाम्** –न विद्यते मलम् यस्यां सा–अमला, ताम्–अमलाम्। ( न. ब. व्री. )

**पूर्वान्तम्**–पूर्वात् अन्तः–पूर्वान्तः, तम्–पूर्वान्तम् । ( पं. त. पु. )

**आरसम्** –आरं स्यति–आरसः, तम्–आरसम्। "आतोडोऽह्वा०" ५।१।७६...ड ( उप. त. पु. )

**अभीप्सितदम्** – अभीप्सितं ददाति–अभीप्सितदः, तम्–अभीप्सितदम्। "आतोडोऽह्वा०" ५।१।७६...ड, ( उप. त. पु. )

**उत्पत्तिविस्तरनदीशपतज्जनानाम्** –उत्पत्तीनां विस्तरः यस्मिन् सः–उत्पत्तिविस्तरः, ( व्य. ब. व्री. ) नदीनाम् ईशः–नदीशः, ( ष. त. पु. ) उत्पत्तिविस्तर एव नदीशः–उत्पत्तिविस्तरनदीशः, ( अव. पू. क. ) पतन्तः जनाः–पतज्जनाः, ( वि. पू. क. ) उत्पत्तिविस्तरनदीशे पतज्जनाः–उत्पत्तिविस्तरनदीशपतज्जनाः, तेषाम्–उत्पत्तिविस्तरनदीशपतज्जनानाम्। (स.त.पु.)

**जिनेश्वरस्य** –जिनानाम् ईश्वरः–जिनेश्वरः, तस्य–जिनेश्वरस्य । (ष. त. पु.)

---

## सकलकुशलवल्लीपादपूर्तिश्रीशान्तिजिनस्तुतिः –

( मालिनी )

श्रीशान्तिनाथस्वामिनं संस्तुवन्नाह–

सकलकुशलवल्ली–पुष्करावर्तमेघो,
मदनसदृशरूपः पूर्णराकेन्दुवक्त्रः ।
प्रथयतु मृगलक्ष्मा शान्तिनाथो जनानां,
प्रसृतभुवनकीर्तिः, कामितं कम्रकान्तिः ॥१॥

अन्वय–

सकलकुशलवल्लीपुष्करावर्तमेघः, मदनसदृशरूपः, पूर्णराकेन्दुवक्त्रः, कम्रकान्तिः, मृगलक्ष्मा, प्रसृतभुवनकीर्तिः, शान्तिनाथः जनानां कामितं प्रथयतु.... ।

सकलकुशलेति....' सकलकुशलवल्लीपुष्करावर्तमेघः ' सकलं संपूर्णं जन्मरोगजरामृत्युरूपाऽकुशलनिवृतत्वेन मोक्षजन्यं वा, यद्वा सकलानां समस्तानाम् अध्याहारात् सर्वसंसारिसत्त्वानां कुशलं मङ्गलमेव वल्ली लता तस्याः विकाशने पुष्पितफलितकरणे वा पुष्करावर्तः पुष्करं जलम् आवर्तयति भ्राम्यति यत्र यद्वा पुष्कराणां नीराणाम् आवर्त्ता भ्रमा (जायन्ते) यस्मिन् स इति तन्नामोत्तमप्रकारमेघः, स एव मेघः घनः इव "पुष्करं पङ्कजे व्योम्नि पयः करिकराग्रयोः। औषधीद्वीपविहगतीर्थराजोरगान्तरे ॥१५३॥ पुष्करं तूर्यवक्त्रे च काण्डे खड्गफलेऽपि च" इति विश्वः (१३७।१५३–४)। "स्यादावर्तोऽम्भसां भ्रमः" इत्यमरः (१।१०।६)। 'मदनसदृशरूपः ' मदनः कामदेवस्तस्य सदृशं समानं रूपं वपुर्वर्णं यस्य स्मरस्वरूपीत्यर्थः।

"मदनः सिक्थके स्मरे। राठे वसन्ते धत्तुरे" इत्यनेकार्थः (३।३८९)। 'पूर्णराकेन्दुवक्त्रः' पूर्णः कृत्स्नकलाकलितः राकायाः पूर्णिमायाः इन्दुश्चन्द्रमास्तद्वद् वक्त्रम् आननं यस्य संपूर्णशशिसममुखीत्यर्थः। "राका नद्यन्तरे कच्छ्वां नवजातरजःस्त्रियाम्। संपूर्णेन्दुतिथौ" इति मेदिनी (३।३२)। 'कम्रकान्तिः' कम्रा मनोहरा दर्शनतः एव प्राणिनयनहारित्वाद् कान्तिः प्रभा देहतेजो वा यस्य रम्यदीप्तिमानित्यर्थः। 'मृगलक्ष्मा' मृगः हरिणः लक्ष्म चिह्नं जङ्घामध्ये चित्रस्वरूपेण स्थितत्वाद् यस्य सः। "लक्ष्म चिह्न प्रधानयोः" इत्यमरः (३।३।१२४)। 'प्रसृतभुवनकीर्त्तिः' प्रसृता विस्तृता भुवनेषु लोकेषु स्वर्गमृत्युपाताललक्षणेषु कीर्त्तिः यशः यस्य सः। "भुवनं लोकखाम्बुषु" ॥३८८॥ इत्यनेकार्थः (३।३।८८)। 'शान्तिनाथः' शम्यात् दूरीक्रियात् पूर्वोत्पन्नमारिलक्षणरुग् यज्जन्मतः एव स शान्तिः तन्नामा षोडशतीर्थपतिः, स चासौ नाथः स्वामी चेति। 'जनानाम्' लोकानाम्। 'कामितम्' वाञ्छितम्। 'प्रथयतु' विस्तारयतु। इदं पद्यचतुष्कं मालिनीवृत्तम्, तल्लक्षणन्तु "ननमयययुतेयं मालिनी भोगिलोकैः" इति छन्दोऽमृतरसे।

**અર્થ**:—સમસ્ત કુશલરૂપી વેલડીને વિકસ્વર કરવામાં પુષ્કરાવર્તના મેઘ જેવાં, કામદેવ સરખાં રૂપવાળા, સંપૂર્ણ પૂર્ણિમાનાં ચંદ્ર જેવાં મુખવાળા, મનોહર કાન્તિવાળા, હરણનાં ચિહ્નવાળા, વિસ્તાર પામી છે ભુવનને વિષે કીર્ત્તિ જેની એવા, શાન્તિનાથ જિનેશ્વર માણસોનાં ઇચ્છિતને વિસ્તારો...

**समास**—

**सकलकुशलवल्लीपुष्करावर्तमेघः**—सकलं च तद् कुशलं च—सकलकुशलम्, (वि. पू. क.) सकलकुशलम् एव वल्ली—सकलकुशलवल्ली, (अव. पू क.) सकलकुशलवल्लीं विकाशयति—सकलकुशलवल्लीविकाशकः,

" णकतृचौ " ५।१।४८...णक, ( उप.त.पु. ) पुष्करावर्त्तः नाम यस्य सः–पुष्करावर्त्तनामा, (स. ब. व्री.) पुष्करावर्त्तनामा मेघः–पुष्करावर्त्तमेघः, (म.प.लो.क.) सकलकुशलवल्लीविकाशकः पुष्करावर्त्तमेघः–सकलकुशलवल्ली-पुष्करावर्त्तमेघः । ( म. प. लो. क. )

**मदनसदृशरूपः**–मदनस्य सदृशम्–मदनसदृशम्, (ष. त. पु.) मदन-सदृशं रूपं यस्य सः–मदनसदृशरूपः । ( स. ब. व्री. )

**पूर्णराकेन्दुवक्त्रः**–राकायाः इन्दुः–राकेन्दुः, ( ष. त. पु. ) पूर्णः राकेन्दुः–पूर्णराकेन्दुः, ( वि. पू. क. ) पूर्णराकेन्दुवत् वक्त्रं यस्य सः–पूर्णराकेन्दुवक्त्रः । ( उप. ब. व्री. )

**मृगलक्ष्मा**–मृगः लक्ष्म यस्य सः–मृगलक्ष्मा । ( स. ब. व्री. )

**शान्तिनाथः**–शान्तिः नाम यस्य सः–शान्तिनामा, (स. ब. व्री.) शान्तिनामा नाथः–शान्तिनाथः । (म.प.लो.क.)

**प्रसृतभुवनकीर्तिः**–भुवनेषु कीर्तिः–भुवनकीर्तिः, (स.त.पु.) प्रसृता भुवनकीर्तिः यस्य सः–प्रसृतभुवनकीर्तिः । (स. ब. व्री.)

**कम्रकान्तिः**–कम्रा कान्तिः यस्य सः–कम्रकान्तिः । (स. ब. व्री.)

**प्रभुपङ्क्तिप्रशस्तिः**

जिनपतिसमुदायो दायकोऽभीप्सितानाम् ,
दुरिततिमिरभानुः कल्पवृक्षोपमानः ।
रचयतु शिवशान्तिं प्रातिहार्यश्रियं यो,
त्रिकटविषयभूमीजातहेतिं बिभर्ति ॥ २ ॥

**अन्वय–**

यः त्रिकटविषयभूमीजातहेतिं प्रातिहार्यश्रियं बिभर्ति (सः) अभीप्सितानां दायकः, कल्पवृक्षोपमानः, दुरिततिमिरभानुः, जिन-पतिसमुदायः शिवशान्तिं रचयतु ।...

जिनपतिसमुदाय इति...' यः ' वक्ष्यमाणलक्षणो जिनेश्वर-समूहः । ' विकटविषयभूमीजातहेतिम् ' विकटाः करालाः इहलोके शक्तिदुर्व्यय--दैन्यादिदायकत्वाद् परलोके दुर्गतिपतनप्रभृतिनिबन्धनत्वाद् ये विषयाः इन्द्रियभोग्यवस्तूनि-शब्दरूपरसस्पर्शगन्धाख्याः । " विषयो यस्य यो ज्ञातस्तत्र गोचरदेशयोः ॥४९७॥ शब्दादौ जनपदे च" इत्यनेकार्थः ( ३।४९७–९८ ) त एव भूम्यां पृथिव्यां जाताः प्रादुर्भूताः वृक्षाः रूढार्थत्वाद्, तेषां प्रज्वलने उच्छेदने वा हेतिः अग्निज्वाला आयुधविशेषो वा इव ताम्, भयङ्करभोग्यपदार्थ-स्वरूपवृक्षाणाम् विदहने वह्निज्वालासमां, विच्छेदने वा सीमदृशीमित्यर्थः। "हेतिः स्यादायुधज्वाला-सूर्यतेजःसु योषिति ।" इति मेदिनी (५९-७६) । 'प्रातिहार्यश्रियम् ' प्रतिहरन्ति अनुसरन्ति प्रतिहाराः तेषां भावः कर्म वा–राजादित्वात् ट्यण प्रातिहार्याणि अशोकवृक्षादीनि यदुक्तम्-"अशोकवृक्षः सुरपुष्पवृष्टिर्दिव्यध्वनिश्चामरमासनञ्च। भामण्डलं दुन्दुभिरातपत्रं सत्प्रातिहार्याणि जिनेश्वराणाम ॥" तेषां श्रियं लक्ष्मी-मैश्वर्यं वा । 'बिभर्ति' धारयति । (सः) 'अभीप्सितानाम् ' वाञ्छितानां भक्तैरीहितानां वा । ' दायकः ' अर्पयिता । अत एव प्रोक्तं हि ' कल्पवृक्षोपमानः ' कल्पः संकल्पितोऽर्थस्तस्य वृक्षः, जन्यजनकभाव-सम्बन्धे षष्ठी. कल्पानां' वाञ्छितानां पूरकः तदधिष्ठायकदेवद्वारेण वृक्षः, यद्वा कल्पश्चासौ वृक्षश्च, तस्योपमानं सादृश्यं यस्य सः । "कल्पो विकल्पे कल्पद्रौ संवर्ते ब्रह्मवासरे । शास्त्रे न्याये विधौ" इत्यनेकार्थः (२।२८८) । ' दुरिततिमिरभानुः ' दुरितं-दुःखेन इतं गमनमनेन अज्ञानं पापं वा तदेव तिमिरम् अन्धकारस्तदपहरणे भानुः सूर्यः इव अज्ञानान्धकारापहरणे अर्कतुल्यः इत्यर्थः । 'जिनपतिसमुदायः जिनानां सामान्यकेवलिपर्यन्तभगवतां पतयः स्वामिनस्तेषां समुदायः समूहः । ' शिवशान्तिम् ' शिवस्य मोक्षस्य शान्तिं कर्मणः पुन-

रुत्थानाभावत्वेन शमम् । “ शमथस्तु शमः शान्तिः ” इत्यमरः (३।२।३)। 'रचयतु' विदधातु करोतु वा ।

**અર્થ** :—જે વિકટ વિષયોરૂપી વૃક્ષોને બાળવામાં અગ્નિ જ્વાલા જેવી અથવા કાપવામાં શસ્ત્ર જેવી પ્રાતિહાર્યની લક્ષ્મીને ધારણ કરે છે તે ઇચ્છિતને આપનાર, કલ્પવૃક્ષની ઉપમાવાળો, અજ્ઞાનરૂપી અંધકારને દૂર કરનાર સૂર્ય જેવો, જિનેશ્વર ભગવાનનો સમુદાય મોક્ષની શાન્તિને કરો....

**समास–**

**जिनपतिसमुदायः** –जिनानां पतयः-जिनपतयः, ( ष. त. पु. ) जिनपतीनां समुदायः–जिनपतिसमुदायः । (ष.त.पु.)

**दुरिततिमिरभानुः**–दुरितम् एव तिमिरम्–दुरिततिमिरम् , ( अव. पू. क. ) दुरिततिमिरम् अपहरति–दुरिततिमिरापहारकः ' णकतृचौ ' ५।१।४८...णक, (उप.त.पु.) दुरिततिमिरापहारकः भानुः–दुरिततिमिरभानुः । (म. प. लो. क.)

**कल्पवृक्षोपमानः** –कल्पान् पूरयति–कल्पपूरकः, ' णकतृचौ ' ५।१।४८...णक, (उप.त.पु.) कल्पपूरकः वृक्षः–कल्पवृक्षः, (म.प.लो.क.) कल्पवृक्षस्य उपमानं यस्य सः–कल्पवृक्षोपमानः । (व्य.ब.व्री.)

**शिवशान्तिम्** –शिवस्य शान्तिः–शिवशान्तिः, ताम्- शिवशान्तिम्। ( ष. त. पु. )

**प्रातिहार्यश्रियम्** –प्रातिहार्याणां श्रीः–प्रातिहार्यश्रीः, ताम्–प्रातिहार्यश्रियम् । (ष.त.पु.)

**विकटविषयभूमीजातहेतिम्** –विकटाः विषयाः–विकटविषयाः, (वि. पू. क.) भूम्यां जाताः–भूमीजाताः, 'क्तेन' ३।१।९२...(स. त. पु.) विकटविषयाः एव भूमीजाताः–विकटविषयभूमीजाताः, ( अव. पू. क. )

विकटविषयभूमीजातान् दहति-विकटविषयभूमीजातदाहिका 'णकतृचौ' ५।१।४८...णकं, (उप.त.पु.) विकटविषयभूमीजातदाहिका हेतिः-विकटविषयभूमीजातहेतिः, ताम्-विकटविषयभूमीजातहेतिम् । (म. प. लो. क.)

आगममहिमागानम्

**प्रथयतु भविकानां ज्ञानसंपत्समूहं,**
**समय इह जगत्यामाप्तवक्त्रप्रसूतः ।**
**भवजलनिधिपोतः सर्वसम्पत्तिहेतुः,**
**प्रथितघनघटायां सूर्यकान्तप्रकाशः ॥ २ ॥**

अन्वय-

इह जगत्याम् भवजलनिधिपोतः, सर्वसम्पत्तिहेतुः, प्रथितघनघटायां सूर्यकान्तप्रकाशः, आप्तवक्त्रप्रसूतः, समयः भविकानां ज्ञानसम्पत्समूहं प्रथयतु... ।

प्रथयत्विति .. 'इह' अस्याम् दृश्यमानायाम् । 'जगत्याम्' विश्वे । 'भवजलनिधिपोतः' भवः भवति सत्त्वानां जन्मजरामरणादिः यत्र संसारः एव जलनिधिः समुद्रस्तस्य तारणे पोतः प्रवहणः इव, संसारसागरोत्तारणे यानपात्रतुल्य इत्यर्थः । "पोतः शिशौ वहित्रे च गृहस्थाने च वाससि" इति मेदिनी (५६।३८) । 'सर्वसम्पत्तिहेतुः' सर्वासां समस्तानां बाह्याभ्यन्तरलक्षणानां सम्पत्तीनां लक्ष्मीणां हेतुः निमित्तः, समस्तसम्पत्कारीत्यर्थः । 'प्रथितघनघटायाम्' प्रथिता विस्तृता अनादिकालयोगत्वेन घना सान्द्रा अज्ञानानामिति अध्याहार्यम् घटा संघातः, विस्तृताज्ञानजन्या या सान्द्रसंहतिस्तस्याम् । 'सूर्यकान्तप्रकाशः' सूर्यस्य रवेः कान्तः मनोहरः अज्ञानान्धकारस्य

नैरन्तर्योच्छेत्तृत्वात् प्रकाशः तेजः इव। 'आप्तवक्त्रप्रसूतः' आप्तानां परमपुरुषाणां हितोपदेशकत्वाद् वीतरागाणां वा वक्त्रात् मुखात् प्रसूतः प्रादुर्भूतः प्रकटितो वा, । "देवाधिदेव–बोधिद–पुरुषोत्तम, वीतरागाप्ताः इति हैमः (१।२५)। 'समयः' सिद्धान्तः । 'भविकानाम्' भावुकानां संसारिणां वा । 'ज्ञानसम्पत्समूहम्' ज्ञानं सम्यग्बोधनं तत्त्वपरिणतिरूपं वा उपलक्षणात् श्रद्धाचरणादिज्ञेयम्, तान्येव सम्पदः विभूतयः सत्त्वपरमानन्दकारित्वाद् तासां समूहं समुदायं । 'प्रथयतु' विस्तारयतु ।

**અર્થ**–આ જગતને વિષે સંસારરૂપી સમુદ્રને તારવામાં વહાણ સમાન, સર્વસંપત્તિના કારણભૂત, વિસ્તાર પામેલી ગાઢ (અજ્ઞાનની) ઘટામાં સૂર્યનાં જેવાં મનોહર પ્રકાશસમાન, મુખ્ય પુરુષના મુખથી નીકળેલો સિદ્ધાંત ભવિકોની જ્ઞાનસમ્પત્તિના સમૂહને વિસ્તારો....

**समास–**

**ज्ञानसम्पत्समूहम्**–ज्ञानस्य सम्पदः–ज्ञानसम्पदः, (ष. त. पु.) ज्ञानसम्पदां समूहः–ज्ञानसम्पत्समूहः, तम्–ज्ञानसम्पत्समूहम्। (ष. त. पु.)

**आप्तवक्त्रप्रसूतः**–आप्तानां वक्त्राणि–आप्तवक्त्राणि, (ष. त. पु.) आप्तवक्त्रेभ्यः प्रसूतः–आप्तवक्त्रप्रसूतः । (पं. त. पु.)

**भवजलनिधिपोतः**–जलानि निधीयन्ते यत्र–जलनिधिः, (उप. त.पु.) व्याप्यादाधारे....५।३।८८...कि, भवः एव जलनिधिः–भवजलनिधिः, (अव. पू. क.) भवजलनिधिम् तारयति भवजलनिधितारकः, 'णकतृचौ' ५।१।४८....णक, (उप. त. पु.) भवजलनिधितारकः पोतः–भवजलनिधिपोतः (म. प. लो. क.)

**सर्वसम्पत्तिहेतुः**–सर्वा सम्पत्तिः–सर्वसम्पत्तिः, 'पूर्वकालैक' ३।१।९७ (वि. पू. क.) सर्वसम्पत्तीनां हेतुः–सर्वसम्पत्तिहेतुः । (ष. त. पु.)

**प्रथितघनघटायाम्** –घना घटा–घनघटा, (वि. पू. क.) प्रथिता घनघटा–प्रथितघनघटा, तस्याम् –प्रथितघनघटायाम् । (वि. पू. क.)

**सूर्यकान्तप्रकाशः**–कान्तः प्रकाशः–कान्तप्रकाशः, (वि. पू. क.) सूर्यस्य कान्तप्रकाशः–सूर्यकान्तप्रकाशः, (ष. त. पु.)

**ब्रह्मशान्तियक्षस्तुतिः**

**जयविजयमनीषा–मन्दिरं ब्रह्मशान्तिः,**
**सुरगिरिसमधीरः, पूजितो न्यक्षयक्षैः ।**
**हरतु सकलविघ्नं यो जनैश्चिन्त्यमानः,**
**स भवतु सततं वः श्रेयसे शान्तिनाथः ॥ ४ ॥**

अन्वय–

यः जयविजयमनीषामन्दिरं, सुरगिरिसमधीरः, न्यक्षयक्षैः पूजितः, जनैः चिन्त्यमानः, शान्तिनाथः, सः ब्रह्मशान्तिः वः सकलविघ्नं हरतु श्रेयसे भवतु ।...

जयविजयेति... 'यः' वक्ष्यमाणलक्षणव्यक्तिविशेषः । 'जयविजयमनीषामन्दिरम्' जयः परपराभवः स्वक्षेत्रविषयिशत्रुविनाशरूपो वा, विजयः परक्षेत्रविषयिरिपुसंक्षयस्वरूपः, मनीषा बुद्धिः सदसत्कृत्याकृत्यविवेकपूर्णा तासां मन्दिरं धाम इव सत्त्वसद्बुद्धिनिधिरित्यर्थः । 'सुरगिरिसमधीरः' सुराणाम् अमराणां गिरिः पर्वतः मन्दराद्रिस्तस्य समः सदृग् धीरः स्थिरः निश्चलो वा । 'न्यक्षयक्षैः' न्यक्षाः समस्ताः ये यक्षाः व्यन्तरनिकायदेवविशेषास्तैः । विश्वाशेषाऽखण्ड–कृत्स्न–न्यक्षाणि निखिलाऽखिले "इति हैमः (६।६१) । 'पूजितः' अर्चितः सन्मानितो वा । 'जनैः' लोकैः । 'चिन्त्यमानः'

ध्यायमानः ईहितपूरकत्वात् । 'शान्तिनाथः' शान्तिः षोडशतीर्थपतिः नाथः स्वामी यस्य सः शान्तिनाथसेवकः इत्यर्थः । 'सः' पूर्ववर्णितस्वरूपी । 'ब्रह्मशान्तिः' तन्नामयक्षविशेषः तत्स्वरूपं तु प्राक् कथितम् (१६।४) । 'वः' युष्माकम् । 'सकलविघ्नम्' सकलं समस्तं विघ्नं देवादिकृतोपद्रवम् । 'हरतु' दूरीकरोतु । 'श्रेयसे कल्याणाय । 'भवतु' अस्तु स्ताद् वेत्यर्थः।

અર્થ:—જે જય, વિજય અને બુદ્ધિનાં ધામ સમાન, મેરૂપર્વત સમાન ધીર, સમસ્ત યક્ષોવડે પૂજાયેલો, માણુસોવડે ચિંતાયેલો (ધ્યાન કરાયેલો) શાન્તિનાથ જિનેશ્વર છે સ્વામિ જેના એવો (છે.) તે બ્રહ્મશાન્તિ યક્ષ તમારા સકલવિઘ્નને દૂર કરો—કલ્યાણને માટે થાઓ...

समास

**जयविजयमनीषामन्दिरम्**—जयश्च विजयश्च मनीषा च—जयविजयमनीषाः, (इ. द्व.) जयविजयमनीषाणां मन्दिरम्—जयविजयमनीषामन्दिरम् । (ष. त. पु.)

**सुरगिरिसमधीरः**—सुराणाम् गिरिः सुरगिरिः, (ष. त. पु.) सुरगिरेः समः—सुरगिरिसमः, (ष. त. पु.) सुरगिरिसमः धीरः—सुरगिरिसमधीरः । (वि. पू. क.)

**न्यक्षयक्षैः**—न्यक्षाः यक्षाः—न्यक्षयक्षाः, तैः न्यक्षयक्षैः । (वि.पू.क.)

**सकलविघ्नम्**—सकलं च तद् विघ्नं च सकलविघ्नम्, तद्—सकलविघ्नम् । (वि. पू. क.)

**शान्तिनाथः**—शान्तिः नाथः यस्य सः शान्तिनाथः । (स. ब. व्री.)

## श्रेय:श्रियामिति-पादपूर्तिश्रीपार्श्वजिनस्तुतिः ।

( इन्द्रवज्रा=वृत्तम् )

श्री चिन्तामणिपार्श्वप्रभोः प्रार्थनम्

**श्रेय:श्रियां मङ्गलकेलिसद्म !**
**श्रीयुक्तचिन्तामणिपार्श्वनाथ ! ।**
**दुर्वारसंसारभयाच्च रक्ष,**
**मोक्षस्य मार्गे वरसार्थवाह ! ॥ ४ ॥**

अन्वय–

श्रेयःश्रियां मङ्गलकेलिसद्म ! मोक्षस्य च मार्गे वरसार्थवाह ! श्रीयुक्तचिन्तामणिपार्श्वनाथ ! दुर्वारसंसारभयाद् रक्ष... ।

श्रेयःश्रियामिति... श्रेयः कल्याणं निर्वाणं पुण्यं वा तदेव श्रियः लक्ष्म्यस्तासाम् । 'मङ्गलकेलिसद्म !' मङ्गलम् उत्तमम् केल्याः क्रीडायाः सद्म धाम स्थानं वा तदामन्त्रणम् । "केलिर्द्रवः परीहासः क्रीडा लीला च नर्म च ॥ ५५५ ॥ इतिहैमः (५५५)। 'मोक्षस्य' निर्वाणस्य सर्वकर्मक्षयजनितस्थानस्य । 'कृत्स्नकर्मक्षयो मोक्षः' इति वचनात् । 'चः' समुच्चये । 'मार्गे' पथि । 'वरसार्थवाह !' वरः उत्तमः स्वगन्तव्यस्थाने सुखेन नायकत्वात् दूरीकृतसंसारारण्याटनत्वाच्च सार्थवाहः सार्थः सङ्घः सार्थान्–सरतो वा पान्थान् वहति नयति स्वस्थानं प्रति इति सार्थवाहः 'कर्मणोऽण्' ५।१।७२ इत्यण्, तत्संबोधनम्–त्राणक्षमस्वामिन्नित्यर्थः । "वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक्" इत्यमरः (२।९।७८)। 'श्रीयुक्तचिन्तामणिपार्श्वनाथ ! श्रिया तीर्थकृल्लक्ष्म्या युक्तः समेतः चिन्तामणिः–चिन्तायाः आधिव्याध्युपाधिजनितदुःखस्य हारको मणिः रत्नम्, तादृशः

पार्श्वः त्रयोविंशतितमः जिनपतिश्चासौ नाथः स्वामी च तन्निमन्त्रणम् । 'दुर्वारसंसारभयाद्' दुःखेन कष्टेन वार्यते रुध्यते इति "दुःस्वीषतः कृच्छ्र०" (सि. ५।३।१३९) इत्यल्, दुःखेन दूरीकार्यं संसारात् जन्मजरामरणभयस्थानात् यद् भयं भीतिस्तस्मात् । 'रक्ष' त्रायस्व त्राणं कुरुष्वेत्यर्थः । इदं पद्यं इन्द्रवज्रावृत्तम्, प्रागुक्तं तु तल्लक्षणम् ।

**અર્થ**-કલ્યાણરૂપી લક્ષ્મીનાં ઉત્તમક્રીડાગૃહ સમા, મોક્ષના માર્ગને વિષે શ્રેષ્ઠ સાર્થવાહ સરખાં, લક્ષ્મી (શોભા)થી યુક્ત એવા હે ચિન્તામણિપાર્શ્વપ્રભુ! દુઃખે કરીને વારી શકાય એવા સંસારનાં ભયથી (અમારું) રક્ષણ કરો...

**समास**—

**श्रेयःश्रियाम्**—श्रेयः एव श्रियः-श्रेयःश्रियः, तासाम्—श्रेयः-श्रियाम् ! (अव. पू. क.)

**मङ्गलकेलिसद्म !**—केल्याः सद्म—केलिसद्म, (ष. त. पु.) मङ्गलञ्चेदं केलिसद्म च—मङ्गलकेलिसद्म, तत्संबोधनम्—मङ्गलकेलिसद्म ! । (वि.पू.क.)

**श्रीयुक्तचिन्तामणिपार्श्वनाथ !**—श्रिया युक्तः—श्रीयुक्तः, (तृ.त.पु.) चिन्तां हरति—चिन्ताहरः, "हृगो वयोऽनुद्यमे" ५।१।९५.... अच्, (उप. त. पु.) चिन्ताहरः मणिः—चिन्तामणिः, (म. प. लो. क.) चिन्तामणिः नाम यस्य सः—चिन्तामणिनामा, (स. ब. व्री.) पार्श्वश्चासौ नाथश्च—पार्श्वनाथः, (वि. पू. क.) चिन्तामणिनामा पार्श्वनाथः—चिन्तामणिपार्श्वनाथः, (म. प. लो. क.) श्रीयुक्तश्चासौ [illegible] णिपार्श्वनाथश्च—श्रीयुक्तचिन्तामणि-पार्श्वनाथः, तत्संबोधनम्—श्रीयुक्तचिन्तामणिपार्श्वनाथ ! । (वि. पू. क.)

**दुर्वारसंसारभयात्**—दुःखेन वार्यते—दुर्वारः, (उप.त.पु.) दुर्वारः संसारः—दुर्वारसंसारः, (वि.पू.क.) दुर्वारसंसारात् भयम्—दुर्वारसंसारभयम्, तस्मात्—दुर्वारसंसारभयात् । (पं. त. पु.)

वरसार्थवाह :—सार्थं वाहयति—सार्थवाहः, (उप.त.पु.) "कर्मणोऽण्" ५।१।७२...अण्, वरः सार्थवाहः—वरसार्थवाहः, तदामन्त्रणम्—वरसार्थवाह !। (वि. पू. क.)

(उपजातिः)

श्रीजिनकदम्बकस्तवनम्

**जिनेश्वराणां निकर ! क्षमायां,**
**नरेन्द्रदेवेन्द्रनतांह्रिपद्म ! ।**
**कुरुष्व निर्वाणसुखं क्षमाभृत्,**
**सत्केवलज्ञानरमां दधान ! ॥ २ ॥**

अन्वय—

नरेन्द्रदेवेन्द्रनतांह्रिपद्म ! क्षमाभृद् ! सत्केवलज्ञानरमां दधान ! जिनेश्वराणां निकर ! क्षमायां निर्वाणसुखं कुरुष्व.... !

जिनेश्वराणामिति....नरेन्द्रदेवेन्द्रनतांह्रिपद्म !—नराणां मनुष्याणाम् इन्द्राः राजानः देवानां सुराणाम् इन्द्राः स्वामिनः, नृपाश्च शक्राश्चेत्यर्थः तैः नतौ वन्दितौ अंह्री चरणौ एव पद्मे कमले यस्य स तदामन्त्रणम् । 'क्षमाभृद्' क्षमां शमभावम् अपराधिन उपरिष्टादपि क्रोधाभावं बिभर्ति धरतीति क्षमाभृत् तत्संबोधनम् ।'सत्केवलज्ञानरमाम्' सत् श्रेष्ठम् अप्रतिपातित्वाद् केवलं संपूर्णम् आलोकितलोकालोकस्वरूपत्वात्, एकम् अद्वितीयं वा सूर्यप्रभावत् अप्रतिहतत्वाद् यद्वा तन्नामकं पञ्चमं ज्ञानं बोधस्वरूपम् तदेव रमां लक्ष्मीम् । दधान !' धारयन् ! केवलकमलाधारिन्नित्यर्थः । "निर्णिते केवलमिति त्रिलिङ्गं स्वेककृत्स्नयोः ॥२०३॥ इत्यमरः (३।३।२०३) । 'जिनेश्वराणाम्' जिनानां सामान्यकेवलिभगवताम् ईश्वराणां स्वामिनां तीर्थकृद्भगवत-

मित्यर्थः । 'निकर'! समूह ! । 'क्षमायाम्' पृथिव्याम् । "क्षमा क्षान्तौ क्षितौ" इत्यनेकार्थः (२।३११)। 'निर्वाणसुखम्' निर्वाणस्य मोक्षस्य सुखं सदानन्दावस्थाम् । 'कुरुष्व' विधेहि । एतद् पद्यत्रयम् उपजातिवृत्तम्, तल्लक्षणं तु इदम्....

"स्यादिन्द्रवज्रा यदि तौ जगौ गः,उपेन्द्रवज्रा प्रथमे लघौ सा।
अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥"

इति छन्दोमञ्जर्याम् ।

**અર્થઃ**–રાજાઓ અને દેવોનાં ઇન્દ્રોવડે નમાયેલાં છે ચરણકમલ જેનાં એવા, ક્ષમાને ધારણ કરનાર, સુંદર કેવલજ્ઞાનરૂપી લક્ષ્મીને ધારણ કરતો, એવો જિનેશ્વર દેવનો સમુદાય! પૃથ્વીને વિષે મુક્તિ–સુખને કરો......

समास–

**जिनेश्वराणाम्**–जिनानाम् ईश्वराः–जिनेश्वराः, तेषाम्–जिनेश्वराणाम् । (ष. त. पु.)

**नरेन्द्रदेवेन्द्रनतांहिपद्म !**–नराणाम् इन्द्राः–नरेन्द्राः, (ष.त.पु.) देवानाम् इन्द्राः–देवेन्द्राः, (ष. त. पु.) नरेन्द्राश्च देवेन्द्राश्च–नरेन्द्र देवेन्द्राः, (इ. द्व.) नरेन्द्रदेवेन्द्रैः नतम्–नरेन्द्रदेवेन्द्रनतम्, (तृ. त. पु.) अंह्रिः एव पद्मम्–अंह्रिपद्मम्, (अव. पू. क.) नरेन्द्रदेवेन्द्रनतम् अंह्रि–पद्मं यस्य सः–नरेन्द्रदेवेन्द्रनतांह्रिपद्मः, तत्संबोधनम्–नरेन्द्रदेवेन्द्रनतांह्रि–पद्म ! (स. ब. व्री.) ।

**निर्वाणसुखम्**–निर्वाणस्य सुखम्–निर्वाणसुखम्, तद्–निर्वाण–सुखम् । (ष. त. पु.)

**क्षमाभृत्**–क्षमां बिभर्ति–क्षमाभृत्, तत्संबोधनम्–क्षमाभृत् ! (उप. त. पु.) "क्विप्" ५।१।१४८ क्विप्.

सत्केवलज्ञानरमाम्—केवलं च तद् ज्ञानञ्च—केवलज्ञानम्, "पूर्वकालैक०" ३।१।९८....(वि. पू. क.) सत् केवलज्ञानम्—सत्केवलज्ञानम् "सन्महत् परमो०" ३।१।१०७ (वि. पू. क.) सत्केवलज्ञानम् एव रमा सत्केवलज्ञानरमा, ताम्—सत्केवलज्ञानरमाम् । (अव. पू. क.)

श्रीजिनभारत्यै प्रार्थनम्

**कैवल्यवामाहृदयैकहार !**
**क्षमासरस्वद्रजनीशतुल्य !**
**सर्वज्ञ ! सर्वातिशयप्रधान !**
**तनोतु ते वाग् जिनराज ! सौख्यम् ॥३॥**

अन्वय—

कैवल्यवामाहृदयैकहार ! क्षमासरस्वद्रजनीशतुल्य ! सर्वज्ञ ! सर्वातिशयप्रधान ! जिनराज ! ते वाग् सौख्यं तनोतु ।

कैवल्येति—'कैवल्यवामाहृदयैकहार !' कैवल्यम् केवलं तत्त्वात्मकं चराचरवस्तुगतानन्तानन्तपर्यायावबोधकं पञ्चमं ज्ञानम्, तदेव कैवल्यम् भेषज्यादित्वात् टयण् । तदेव वामा स्त्रीस्तस्याः हृदयस्य वक्षसः एकः श्रेष्ठः अपूर्वो वा हारः कण्ठाभरणविशेषः इव तदामन्त्रणम् । "वामा तु योषिति" इत्यनेकार्थः (२।३।२९)। 'क्षमासरस्वद्रजनीशतुल्य !' क्षमा क्षान्तिः कोपाभावो वा सैव सरस्वान्—सरांसि जलप्रसरणानि विद्यन्ते यस्य यत्र वा समुद्रः तस्योल्लासने रजनीशस्य—रजन्याः रात्र्याः ईशः स्वामी चन्द्रमाः इत्यर्थस्तस्य तुल्यः सदृक् तत्संबोधनम् ! चन्द्रस्य सागरसुतत्वेन प्रसिद्धत्वात्, आनन्दवर्धकः । "सरस्वन्तौ नदार्णवौ" इत्यमरः (३।३।५७) । 'सर्वज्ञ !' सर्वं संपूर्णजगत्स्वभावं जानाति

अवबोधयति केवलज्ञानदर्शनेनेति "आतोडोऽह्वा० (सि ५।१७६) इत्यनेन कः, तदामन्त्रणम् संपूर्णज्ञानिन्नित्यर्थः । 'सर्वातिशयप्रधान! सर्वे समस्ताः अतिशया अतिशय्यतेऽतिशयं क्रियते एभिः आत्मिकज्ञानातिशयादयः वाचिकपञ्चत्रिंशदतिशयाः शारीरिक चतुस्त्रिंशदतिशयाः, तैः प्रधानः मुख्यः परमात्मा वा तदामन्त्रणम् । "प्रधानं प्रकृतौ बुद्धावुत्तमे परमात्मनि । महामात्रे" इत्यनेकार्थः (३।३८०) । 'जिनराज!' जिनानां वीतरागाणां राजा प्रभुस्तदामन्त्रणम् तीर्थंकरभगवन्नित्यर्थः । 'ते' तव । 'वाग्' वाणी । 'सौख्यम्' सुखमेव सौख्यम्, भेषजादित्वात् ट्यण्, आनन्दं चित्तप्रसन्नतां वा । 'तनोतु' विस्तारयतु प्रथयताद् वेत्यर्थः ।

**અર્થ**:—કેવલજ્ઞાનરૂપી સ્રીના હૃદયને વિષે (અથવા–હૃદયના) અદ્વિતીય હાર સમા, ક્ષમારૂપી સમુદ્રને ઉલ્લાસ કરનાર ચંદ્રસમાન, સર્વને જાણનારા, સર્વ અતિશય વડે કરીને મુખ્ય, જિનેશ્વરદેવ! તારી વાણી સુખને વિસ્તારે....

**अन्वय**—

**कैवल्यवामाहृदयैकहार!**—कैवल्यम् एव वामा—कैवल्यवामा, (अव. पू. क.) कैवल्यवामायाः हृदयम्—कैवल्यवामाहृदयम्, (ष. त. पु.) एकश्चासौ हारश्च—एकहारः, (वि. पू. क.) "पूर्वकालैक" ३।१।९८ (वि. पू. क.) कैवल्यवामाहृदये एकहारः—कैवल्यवामाहृदयैकहारः, तत्संबोधनम् कैवल्यवामाहृदयैकहार! "सिहाद्यैः पूजायाम्" ३।१।८९ (स. त. पु.)

अथवा— कैवल्यवामाहृदयस्य एकहारः – कैवल्यवामाहृदयैकहारः तत्संबोधनम्—कैवल्यवामाहृदयैकहार! (स. त. पु.)

**क्षमासरस्वद्रजनीशतुल्य!**—सरांसि सन्ति यस्मिन्—सरस्वान् 'तदस्या.' ७।२।१...मतु, क्षमा एव सरस्वान्—क्षमासरस्वान्, (अव. पू. क.)

रजन्याः ईशः—रजनीशः, (ष. त. पु.) क्षमासरस्वन्तं उल्लसति—क्षमासरस्वदुल्लासी, (उप. त. पु.) "अजातेः शीले" ५।१।१५४....णिन्, क्षमासरस्वदुल्लासी रजनीशः—क्षमासरस्वद्रजनीशः, (म. प. लो. क.) क्षमासरस्वद्रजनीशस्य तुल्यः—क्षमासरस्वद्रजनीशतुल्यः, तत्संबोधनम्—क्षमासरस्वद्रजनीशतुल्य ! (ष. त. पु.)

**सर्वज्ञ !**—सर्वं जानाति—सर्वज्ञः, तत्संबोधनम्—सर्वज्ञ ! । (उप.त.पु.) "आतोडोऽह्वा०" ५।१।७६...ड, ।

**सर्वातिशयप्रधान !**—सर्वे चामी अतिशयाश्च सर्वातिशयाः, "पूर्वकालैक" ३।१।९८ (वि. पू. क.) । सर्वातिशयैः (कृतः) प्रधानः—सर्वातिशयप्रधानः, तत्संबोधनम्—सर्वातिशयप्रधान ! "तृतीया तत्कृतेः" ३।१।६५....(तृ. त. पु.)

**जिनराज !**—जिनानां राजा—जिनराजः, तत्संबोधनम्—जिनराज ! । (ष. त. पु.) "राजन्सखेः" ७।३।१०९....अट्,

**श्रीपार्श्वसेवकगरुडयक्षस्य वर्णनम्—**

श्रीपार्श्वनाथक्रमणाम्बुजात-
सारङ्गतुल्यः कलधौतकान्तिः ।
श्रीयक्षराजो गरुडाभिधानः,
चिरञ्जय ज्ञानकलानिधान ! ॥४॥

**अन्वय—**

ज्ञानकलानिधान ! चिरं जय श्रीपार्श्वनाथक्रमणाम्बुजातसारङ्गतुल्यः कलधौतकान्तिः गरुडाभिधानः श्रीयक्षराजः अस्ति ।

श्रीपार्श्वनाथेति—'ज्ञानकलानिधान !' ज्ञानानां मतिश्रुतावधिमनःपर्यायकेवललक्षणानां कलानां जनप्रतिबोधनादिकौशल्यानां च निधान ! पात्र ! जिनेश्वर ! पार्श्वप्रभो ! वेत्यध्याहार्यम् ।

'चिरं' दीर्घकालम्। 'जय' विजयं प्राप्नुतात्। 'पार्श्वनाथक्रमणाम्बुजातसारङ्गतुल्यः' श्रिया आर्हतीसंपदा युक्तः पार्श्वः स्पृशति जानाति सकलं ज्ञानेनेति पार्श्वः, पृषोदरादित्वात्साधुः, त्रयोविंशस्तीर्थपतिः नाथः स्वामी तस्य क्रमणौ चरणौ एव अम्बुनि जले जाते उत्पन्ने कमले तयोः सारङ्गस्य भ्रमरस्य तुल्यः सदृक्। "सारङ्गो विहगान्तरे ॥१२२॥ चातके चञ्चरीके च द्विपैणशबलेषु च। "इत्यनेकार्थः (३।१२२।२३)। 'कलधौतकान्तिः' कलधौतस्य सुवर्णस्य इव कान्तिः प्रभा यस्य सः स्वर्णदेहीत्यर्थः। 'श्रीयक्षराजः' श्रिया देवराजतुल्यैश्वर्येण युक्तः यक्षाणां व्यन्तराणां राजा नायकः, श्रीयक्षाधिपतिरित्यर्थः। 'गरुडाभिधानः!' 'गरुडः' तन्नामयक्षविशेषः अभिधानं नाम यस्य सः, तन्नामा पार्श्वप्रभोः सेवक इत्यर्थः। 'अस्ति' इत्यध्याहार्यम्।

**અર્થ**–જ્ઞાન અને કલાના નિધાન સરખાં હે જિનેશ્વરદેવ! લાંબાકાલ સુધી જય પામો શ્રી પાર્શ્વનાથનાં ચરણકમલના વિષે ભ્રમરસમાન, સુવર્ણ જેવી કાન્તિવાળા ગરુડનામવાળા શ્રીયક્ષરાજ છે.

**समास–**

**श्रीपार्श्वनाथक्रमणाम्बुजातसारङ्गतुल्यः**–पार्श्वश्चासौ नाथश्च–पार्श्वनाथः, (वि. पू. क.) श्रिया युक्तः–श्रीयुक्तः, (तृ. त. पु.) श्रीयुक्तः पार्श्वनाथः–श्रीपार्श्वनाथः, (म. प. लो. क.) श्रीपार्श्वनाथस्य क्रमणे–श्रीपार्श्वनाथक्रमणे, (ष. त. पु.) अम्बुनि जाते–अम्बुजाते, "क्तेन" ३।१।९७ (स. त. पु.) श्रीपार्श्वनाथक्रमणे एव अम्बुजाते–श्रीपार्श्वनाथक्रमणाम्बुजाते, (अव. पू. क.) श्रीपार्श्वनाथक्रमणाम्बुजातयोः सारङ्गः–श्रीपार्श्वनाथक्रमणाम्बुजातसारङ्गः, "सिंहाद्यैः" ३।१।८९ (स. त. पु.) श्रीपार्श्वनाथक्रमणाम्बुजातसारङ्गस्य तुल्यः–श्रीपार्श्वनाथक्रमणाम्बुजातसारङ्गतुल्यः। (ष. त. पु.)

**कलधौतकान्तिः**—कलधौतवत् कान्तिः यस्य सः—कलधौतकान्तिः। (उपमान ब. व्री.)

**श्रीयक्षराजः**—श्रिया युक्तः—श्रीयुक्तः, (तृ. त. पु.) यक्षाणां राजा—यक्षराजः, (ष. त. पु.) "राजन्सखेः" ७।३।१०९...अट्, श्रीयुक्तः यक्षराजः—श्रीयक्षराजः ( म. प. लो. क. )

**गरुडाभिधानः**—गरुडः अभिधानं यस्य सः—गरुडाभिधानः। (स. ब. व्री. )

**ज्ञानकलानिधान !**—ज्ञानं च कलाश्च—ज्ञानकलाः ( इ. द्व. ) ज्ञानकलानां निधानम्—ज्ञानकलानिधानम्, तत्संबोधनम्—ज्ञानकलानिधान ! 'कृति' ३।१।७७ ( ष. त. पु. )

## श्रीपर्युषणापर्वस्तुतिः

( शार्दूलविक्रीडितम् )

पर्वाधिराजः कथमराध्येत ? तद् वर्ण्यते...।

**भो भो भव्यजनाः ! सदा यदि शिवे वाञ्छा तदा पर्वणो,—**
**भक्त्या पर्युषणाभिधस्य कुरुत स्वाराधनं सादरम् ।**
**द्रव्यार्चां सुमचन्दनैः स्तुतिभरैः कृत्वा च भावार्चनाम् ।**
**मानुष्यं सफलं विधत्त सुमहैरर्हन्मतोल्लासकैः ॥ १ ॥**

**अन्वय—**

भोः ! भोः ! भव्यजनाः ! यदि शिवे वाञ्छा तदा पर्युषणाभिधस्य पर्वणः स्वाराधनं सादरं कुरुत। भक्त्या सुमचन्दनैः द्रव्यार्चां

स्तुतिभरैः च भावार्चनां कृत्वा अर्हन्मतोल्लासकैः सुमहैः मानुष्यं सफलं विधत्त ।

भो भो भव्यजना इति....भोः भोः आमन्त्रणार्थे...अन्यत्कार्यं त्यक्त्वा दत्तचित्तीभूय एतत् शृणुतेत्यर्थः । "आधिक्यानुपूर्व्ये" (सि०७।४।७५) इत्यनेन आधिक्यार्थे द्वित्वम् । 'भव्यजनाः' भव्याः मोक्षगमनयोग्याः मुक्तिप्राप्तितत्परा वा जनाः लोकाः तत्संबोधनम् । 'यदि' चेत् विकल्पार्थमिदमव्ययं वा "पक्षान्तरे चेद्यदि च" इत्यमरः । (३।४।१२) । 'शिवे' मोक्षे कल्याणे वा । 'वाञ्छा' इच्छा । "इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः" २७।। इत्यमरः (१।७।२७) 'तदा' तदानीं तस्मिन्काले वा । 'पर्युषणाभिधस्य' पर्युषणः परितः उषणं यस्मिन् अष्टाह्निकापर्वविशेषः इति अभिधा नाम यस्य तस्य । 'पर्वणः' आनन्दोत्सवस्य । 'स्वाराधनम्' शोभनम् अत्यन्तं वा आराधनम् उपासनाम् । 'सादरम्' आदरेण आन्तरिकीप्रीत्या सह वर्तते यद् तद् क्रियाविशेषणमेतद् अहोभावपूर्वकमित्यर्थः । 'कुरुत' विधत्त । 'भक्त्या' हार्दिकानुरागेण । 'सुमचन्दनैः' सुमैः पुष्पैश्च चन्दनैः गन्धसारैश्च । "प्रसूनं कुसुमं सुमम् ॥ ११२४ ॥ पुष्पं सूनं सुमनसः प्रसवश्च मणीवकम् । इति हैमः (११२४।२५) । "गन्धसारो मलयजो भद्रश्रीचन्दनोऽस्त्रियाम्" इत्यमरः (२।६।१३१) । 'द्रव्यार्चाम्' द्रव्यैः विशिष्टवस्तुभिः जलचन्दनकुसुमधूपदीपकाक्षतफलनैवेद्यादिभिः विधीयमानाम् अर्चां पूजां द्रव्यपूजामित्यर्थः । "पूजा नमस्यापचितिः सपर्यार्चार्हणाः समाः ॥३४॥ इत्यमरः (२।७।३४) 'स्तुतिभरैः' स्तुतीनां प्रभुगुणगणप्रशंसनरूपाणां स्वदोषवर्णनस्वरूपाणां वा स्तवनानां भरैः समूहैः । 'चः' समुच्चये द्रव्यपूजा–भावपूजयोः कृत्वा सह योजनार्थम् । 'भावार्चनाम्' भावेन आन्तरिकशुभाशयेन क्रियमाणाम्

अर्चनां पूजां भक्तिम् । 'कृत्वा' विधाय । 'अर्हन्मतोल्लासकैः' अर्हता अर्हति सुरेन्द्रादिकृतपूजाम् अष्टप्रातिहार्यचतुस्त्रिंशदतिशयादिकामिति...तेन मतं स्वीकृतम् अर्चितं वा जिनशासनमित्यर्थः, तस्य आर्हतशासनस्य उल्लासकैः प्रभावकैः एतज्जैनदर्शनं सर्वोपरीति ज्ञापकैः वा । 'सुमहैः' शोभनैः अत्यन्तैः वा महैः महोत्सवैः उद्यापन–सङ्घयात्रा–रथयात्रा–पूजादिलक्षणैः वा कृत्वा । 'मानुष्यम्' नरत्वम् । 'सफलम्' फलेन सह वर्तते यद् तद् सार्थकम् । 'विधत्त' समाचरत कुरुध्वमित्यर्थः । इदं पद्यचतुष्कं शार्दूलविक्रीडितवृत्तम् तल्लक्षणन्तु पूर्वोक्तम् ।

**અર્થ**:—હે ભવ્યજનો ! જો મોક્ષને વિષે ઇચ્છા છે તો પર્યુષણા નામનાં પર્વનું સુંદર આરાધન આદર સાથે કરો અને ભક્તિથી પુષ્પો અને ચંદનથી દ્રવ્યપૂજા તથા સ્તુતિનાં સમૂહવડે ભાવપૂજાને કરીને અરિહંતના શાસનને ઉલ્લસિત કરનાર સુંદર મહોત્સવોવડે મનુષ્યપણાને સફલ કરો.

**समास**—

**भव्यजनाः !**—भव्याश्चामी जनाश्च–भव्यजनाः, तत्संबोधनम्–भव्यजनाः । ( वि. पू. क. )

**पर्युषणाभिधस्य**—पर्युषणा अभिधा यस्य तद्–पर्युषणाभिधम्, तस्य–पर्युषणाभिधस्य । ( स. ब. व्री. )

**स्वाराधनम्**—शोभनम् आराधनम्–स्वाराधनम्, तद्–स्वाराधनम् । ( सु. पू. त. पु. )

**सादरम्**—आदरेण सह वर्तते यद् तद्–सादरम्, तद्–सादरम् । ( सहार्थ. ब. व्री. )

**द्रव्यार्चाम्**–द्रव्यैः क्रियमाणा–द्रव्यक्रियमाणा, ( तृ. त. पु. ) द्रव्य-क्रियमाणा अर्चा–द्रव्यार्चा, ताम्–द्रव्यार्चाम् । ( म. प. लो क. )

**सुमचन्दनैः**–सुमानि च चन्दनाश्च–सुमचन्दनाः, तैः–सुमचन्दनैः । ( इ. द्व. )

**स्तुतिभरैः**–स्तुतीनां भराः–स्तुतिभराः, तैः–स्तुतिभरैः । (ष.त.पु.)

**भावार्चनाम्**–भावैः विधीयमाना–भावविधीयमाना, ( तृ. त. पु. ) भावविधीयमाना अर्चना–भावार्चना, ताम्–भावार्चनाम् । (म.प.लो.क.)

**सुमहैः**–शोभना महाः–सुमहाः, तैः–सुमहैः । ( सु. पू. त. पु.)

**अर्हन्मतोल्लासकैः**–अर्हतः मतम्–अर्हन्मतम् , ( ष. त. पु. ) अर्हन्मतम् उल्लासयन्ति–अर्हन्मतोल्लासकाः, तैः–अर्हन्मतोल्लासकैः । 'णक-तृचौ' ५।१।४८...णक, ( उप. त. पु. )

**पर्युषणपर्वणि आचरणीयतपः उच्यते....**

**कृत्वामास्तिथिदिग्भगाब्धिवसुदिग्युग्मोपवासांञ्छुभान्,**
**रम्यार्चां च विधत्त भो भवहरां तीर्थंकराणां नवाम् ।**
**कृत्वा षष्ठतपोऽन्तिमेशितुरलं श्रुत्वा चरित्रं मुदा,**
**वीरेन्दो र्जनुरुत्सवे कुरुत सूलूलुध्वनिं भो जनाः ! ॥२॥**

अन्वय–भोः भोः जनाः ! शुभान् मास्तिथिदिग्भगाब्धिवसुदिग्युग्मोपवासान् कृत्वा तीर्थंकराणां च भवहरां नवां रम्यार्चां विधत्त. षष्ठतपः अलं कृत्वा अन्तिमेशितुः वीरेन्दोः चरित्रं मुदा श्रुत्वा जनुरुत्सवे सूलूलुध्वनिं कुरुत ।....

कृत्वेति....' भोः भोः ' सम्बोधनार्थे। ' जनाः ' लोकाः पर्वोत्सवकरणोद्यताः वा । एतत्तत्परता पूरणार्थं किं कर्तव्यमित्याह–शुभान् सुन्दरतमान् शुद्धाध्यवसायेन क्रियमाणत्वात् । ' मास्तिथि-

दिग्भगाब्धिवसुदिग्युग्मोपवासान्' माः मासः त्रिंशद्दिनप्रमाणमिति "मास्तु मासे निशाकरे" इत्यनेकार्थः (११६)। तिथयः प्रतिपदादिका अत्र तु पञ्चदशमानार्थाः 'पञ्चदश तिथ्यः' इत्यनेकार्थः। दिशः दिशाः दशसङ्ख्यकाः इत्यर्थः, भगाः लब्धयः अष्टौ, अब्धयः सागराः चत्वारः "चत्वारोऽब्धिश्रुतियुगकृताः" इत्यनेकार्थः, वसूनि–अष्टौ "तुरङ्गपर्वतौ चाऽष्टौ वसुसर्प–मतङ्गजाः।" इत्यनेकार्थः 'दिशः' दशलक्षणा, 'युग्मम्' द्विकं षष्ठतपो वा, उपर्युक्तसङ्ख्याः प्रमाणं येषां तान् उपवासान् तपोविशेषान्। 'कृत्वा' आचर्य। 'तीर्थंकराणाम्' तीर्थं कुर्वन्तीति तीर्थंकराः जिनेश्वरभगवन्तस्तेषाम्। 'भवहराम्' भवं संसारं हरति दूरीकरोतीति....ताम् संसारोच्छेदिनीमित्यर्थः। 'नवाम्' नूतनाम् सप्तदशादिप्रकारिकाम् वा। 'रम्यार्चाम्' रम्यां मनोहराम् अर्चां पूजाम्। 'विधत्त' कुरुत। 'षष्ठतपः' षष्ठं द्व्युपवासात्मकं तपः। 'अलम्' शक्तिपूर्वकम्। 'कृत्वा' विधाय। 'अन्तिमेशितुः' अन्तिमः अन्ते पश्चिमे भवः अन्तिमः चरमः ईशिता शासनपतिस्तस्य। वीरेन्दोः वीरेषु इन्दुश्चन्द्रमा इव वीरश्चासौ इन्दुश्चन्द्रश्चेति वा तस्य श्रीवीरविभोरित्यर्थः। 'चरित्रम्' वृतान्तम् श्रीवीरजिनादिकथानकं वा। 'मुदा' हर्षेण। श्रुत्वा मनोवाक्कायगोचरं कृत्वा। 'जनुरुत्सवे' जनु जन्म तन्निमित्तकः उत्सवः आनन्दव्यक्तीकरणावसरस्तस्मिन्। "जनु जननजन्मानि जनिरुत्पत्तिरुद्भवः" इत्यमरः (१।४।३०)। 'सूलुलुध्वनिम्' शोभनम् उलुलुं मङ्गलसूचकशब्दं ध्वनिं रवम्। "उलुलु मङ्गलध्वनिः" इति अभिधानचिन्तामणिनाममालाटीकायाम् (५१८)। "कुरुत" विधत्त।

અર્થ—હે માણસો! સુંદર માસક્ષમણ, પંદર, દશ, આઠ,

ચત્તારિ અટ્ઠ દશ દોય ઉપવાસોને કરીને અને તીર્થંકર ભગવંતોની સંસારને હરનારી નવી સુંદર પૂજાને કરો. ષષ્ઠતપ શક્તિપૂર્વક કરીને અન્તિમ જિનેશ્વર વીરપ્રભુનાં ચરિત્રને હર્ષપૂર્વક સાંભળીને જન્મોત્સવને વિષે મંગલધ્વનિ કરો....

**समास–**

**मास्तिथिदिग्भगाब्धिवसुदिग्युग्मोपवासान्**–माः तिथयः दिशः भगाः अब्धयः वसूनि दिशः युग्मे प्रमाणं येषां ते–मास्तिथिदिग्भगाब्धिवसुदिग्युग्मप्रमाणाः, (स. ब. ब. व्री.) मास्तिथिदिग्भगाब्धिवसुदिग्युग्मप्रमाणाः उपवासाः–मास्तिथिदिग्भगाब्धिवसुदिग्युग्मोपवासाः, तान्–मास्तिथिदिग्भगाब्धिवसुदिग्युग्मोपवासान् । ( म. प. लो. क. )

**रम्यार्चाम्**–रम्या अर्चा–रम्यार्चा, ताम्–रम्यार्चाम् । (वि. पू. क.)

**भवहराम्**–भवं हरतीति–भवहरा, ताम्–भवहराम् । "हृगो वयोऽनुद्यमे" ५।१।९५....अच, (उप. त. पु.)

**तीर्थंकराणाम्**–तीर्थं कुर्वन्तीति–तीर्थंकराः,तेषाम्–तीर्थंकराणाम् । "हेतुतच्छीलानुकूले" ५।१।१०३....ट, (उप. त. पु.)

**षष्ठतपः**–षष्ठस्य तपः–षष्ठतपः, तद्–षष्ठतपः । (ष. त. पु.)

**अन्तिमेशितुः**–अन्ते भवः-अन्तिमः, "पश्चादाद्यन्ता०"(६।३।७५) इम, अन्तिमः ईशिता–अन्तिमेशिता, तस्य–अन्तिमेशितुः । (वि.पू.क.)

**वीरेन्दोः**–वीरेषु इन्दुः इव–वीरेन्दुः, तस्य–वीरेन्दोः "सिंहाद्यैः०" ३।१।८९ (स. त. पु.)

**जनुरुत्सवे**–जनुसः उत्सवः-जनुरुत्सवः,तस्मिन्–जनुरुत्सवे । (ष.त.पु.)

**सूल्लुध्वनिम्**–उल्लुश्चासौ ध्वनिश्च–उल्लुध्वनिः, (वि.पू.क.) शोभनः उल्लुध्वनिः–सूल्लुध्वनिः, तम्–सूल्लुध्वनिम् । (सु. पू. त. पु.)

कार्यं श्राव्यं च किम्? तत्कथ्यते....

**जीवानामवनं विधत्त सुधियः! कृत्वाष्टमं, नागवद्,**
**भाव्या निर्मलभावना भविजनैः कैवल्यलक्ष्मीकृते ।**
**कल्याणानि जिनस्य भो गणभृतां वादं च पार्श्वप्रभु-**
**नेमाद्यन्तरकाणि भोः शृणुत सन्नाभेयवृत्तं तथा ॥३॥**

अन्वय—

भोः सुधियः! नागवद् अष्टमं कृत्वा जीवानाम् अवनं विधत्त, भविजनैः कैवल्यलक्ष्मीकृते निर्मलभावनाः भाव्याः, जिनस्य कल्याणानि गणभृतां च वादं पार्श्वप्रभुनेमाद्यन्तरकाणि तथा सन्नाभेयवृत्तं शृणुत....!

जीवानामिति....'भोः' कोमलामन्त्रणे। 'सुधियः' शोभना धियः येषां ते तन्निमन्त्रणम् हे सज्जनाः! भावुकाः! वा। 'नागवद्' नागकेतुकुमारवत्। 'अष्टमम्' त्र्युपवासम्। 'कृत्वा' आचर्य। 'जीवानाम्' एकेन्द्रियादिप्राणिनाम्। 'अवनम्' रक्षणम्। 'विधत्त' कुरुत! अमारिप्रवर्तनं कर्तव्यमित्यर्थः। अत एव अष्टमतपसा सह एतदपि करणीयम्। पुनः काः कार्याः? 'भविजनैः' भवः संसारोऽस्ति येषां भविनः सांसारिकाः मुक्तिवाञ्छकाः जनाः लोकास्तैः। 'कैवल्यलक्ष्मीकृते' कैवल्यं केवलं तन्नामपञ्चमज्ञानं तदेव लक्ष्मीः ऐश्वर्यं तस्याः कृते निमित्ते....पञ्चमज्ञानप्राप्त्यर्थमित्यर्थः। 'निर्मलभावनाः' निर्मला निर्गतानि मलानि स्वार्थं परगुणेर्ष्यादिलक्षणानि याभ्यस्ताः स्वच्छाः शुद्धाध्यवसायपरिणताः वा भावनाः शुभपरिणामाः। 'भाव्याः' चिन्तनीयाः। निर्मलभावनोद्भावनाय किं कर्तव्यमित्याह—'जिनस्य' अर्हतः श्रीवीर-

जिनादेः। 'कल्याणानि' कल्याणकानि च्यवनजन्मदीक्षाकेवलाप्तिमुक्तिगत्यादीनि। 'गणभृताम्' गणं स्वाध्यायरसिकमुनिवृन्दं बिभ्रति धारयन्ति गणधरास्तेषाम् इन्द्रभूत्यादिगणनायकानामित्यर्थः। 'चः' समुच्चये। 'वादम्' अन्योन्यं कृतं प्रश्नसमाधानम्। 'पार्श्वप्रभुनेमाद्यन्तरकाणि' पार्श्वप्रभुः त्रयोविंशतितमस्तीर्थपतिः नेमिः द्वाविंशस्तीर्थाधिपः आदौ प्रथमे येषां ते पार्श्वप्रभोः आरभ्य अजितनाथस्य इति यावत् इत्यर्थः। तेषां द्वाविंशतितीर्थकृताम् अन्तरकाणि अवकाशानि एक तीर्थकृतः पश्चाद् भाविद्वितीयतीर्थकृद् भवेत् तयोः मध्यमवर्तिकालः अन्तरं अन्तरकं वोच्यते तानि। 'तथा' एतच्छ्रवणस्य पश्चात्। 'सन्नाभेयवृत्तम्' सद् श्रेष्ठं भवनिस्तारित्वाद् अज्ञानपापहारित्वाच्च नाभेयस्य ऋषभप्रभोः वृत्तं चरित्रम्। 'शृणुत' कर्णगोचरं कुरुत।

**અર્થ**—હે સારી બુદ્ધિવાળા માણસો! નાગકુમારની જેમ અટ્ઠમતપ કરીને જીવોનું રક્ષણ કરો. ભવ્ય લોકોવડે કેવલજ્ઞાનરૂપી લક્ષ્મીને માટે નિર્મલ ભાવના ભાવવી જોઇએ જિનેશ્વર ભગવંતના કલ્યાણકો અને ગણધર ભગવંતનો વાદ પાર્શ્વપ્રભુ–નેમિપ્રભુ આદિના અન્તર (આંતરા) તથા સુંદર નાભિરાજાના પુત્ર ઋષભદેવ ભગવંતનું ચરિત્ર સાંભળો.

**समास**–

**सुधियः!**—शोभना धियः येषां ते—सुधियः, तत्संबोधनम्—सुधियः! (सु. पू. त. पु.)

**निर्मलभावनाः**—निर्गतं मलं याभ्यस्ताः—निर्मलाः, (प्रादि.ब.व्री.) निर्मलाः भावनाः—निर्मलभावनाः। (वि. पू. क.)

**भविजनैः**—भवः अस्ति येषां ते—भविनः, भविनश्चामी जनाश्च-भविजनाः, तैः—भविजनैः। (वि. पू. क.)

**कैवल्यलक्ष्मीकृते** :—केवलमेव—कैवल्यम्, "भेषजादिभ्यष्ट्यण्" ७।३।१६४...ट्यण, कैवल्यमेव लक्ष्मीः—कैवल्यलक्ष्मीः, (अव. पू. क.) कैवल्यलक्ष्म्याः कृते—कैवल्यलक्ष्मीकृते । (ष. त. पु.)

**गणभृताम्**—गणं बिभ्रति—गणभृतः, तेषाम्—गणभृताम् । (उप. त. पु.) "क्विप्" ५।१।१४७....क्विप् ।

**पार्श्वप्रभुनेम्याद्यन्तरकाणि**—पार्श्वः नाम यस्य सः—पार्श्वनामा, (स. ब. व्री.) पार्श्वनामा प्रभुः—पार्श्वप्रभुः, (म. प. लो. क.) पार्श्वप्रभुश्च नेमिश्च-पार्श्वप्रभुनेमी, (इ. द्व.) पार्श्वप्रभुनेमी आदौ येषां ते—पार्श्वप्रभुनेम्यादयः, (व्य. ब. व्री.) पार्श्वप्रभुनेम्यादीनाम् अन्तरकाणि—पार्श्वप्रभुनेम्याद्यन्तरकाणि, तानि—पार्श्वप्रभुनेम्याद्यन्तरकाणि (ष. त. पु.)

**सन्नाभेयवृत्तम्**—नाभेः अपत्यम्—नाभेयः, "इतोऽनिञः" ६।१।७२....एयण्, नाभेयस्य वृत्तम्—नाभेयवृत्तम्, (ष. त. पु.) सद् नाभेयवृत्तम्—सन्नाभेयवृत्तम्, तद्—सन्नाभेयवृत्तम्। "सन्महत्०" ३।१।१०७ (वि. पू. क.)

**वार्षिककतव्यानि वर्णयन्नाह—**

**साध्वाचारमखण्डितं पिबत सन्मौलं च सूत्रं श्रवैः,**
**चैत्यानां परिपाटिकां तनुत च स्वालोचनां वार्षिकीम् ।**
**जन्तून् क्षाम्यत वत्सलं कुरुत भोः साधर्मिकाणां मुदा,**
**विघ्नौघं चतुरस्य वा हरतु सा सङ्घस्य सिद्धायिका ॥४॥**

**अन्वय—**

भोः ! अखण्डितं साध्वाचारं सत् मौलं सूत्रं श्रवैः पिबत, चैत्यानांः च परिपाटिकां वार्षिकीं स्वालोचनां च तनुत, जन्तून्

क्षाम्यत, साधर्मिकाणां वत्सलं वा कुरुत, सा सिद्धायिका चतुरस्य सङ्घस्य विघ्नौघं मुदा हरतु।

साध्वाचारमिति....भोः सम्बोधनार्थे जनाः! इति अध्याहार्यम्। 'अखण्डितम्' न नैव खण्डितं त्रुटितं भिन्नपाठं शब्दरहितं वा संपूर्णमित्यर्थः। 'साध्वाचारम्' साधूनां मुनीनाम् आचारः जीवनविधिव्यवहाराः अचेलकादयः, ज्ञानादिपञ्चकानां अष्टाष्टादयो वा यस्मिन् तद्। 'सत्' श्रेष्ठम् श्रवणमात्रेण मोक्षप्रदत्वात्। 'मौलम्' मूले सूत्रस्वरूपे एव लब्धं श्रवणार्थं प्राप्तम्। यद्वा, मूलस्य सूत्ररूपस्यैव इदं प्राप्तश्रवणाधिकारं तद् मौलम् अर्थरहितम्। 'सूत्रं' शब्दमयम्। 'श्रवैः' कर्णैः। 'पिबत' पानं कुरुत शृणुतेत्यर्थः। "चैत्यानाम्" जिनालयानाम्। "चैत्यविहारौ जिनसद्मनि,' इति हैमः (९९४)। 'चः' भिन्नक्रियादर्शकः। 'परिपाटिकाम्' अनुक्रमेण गमनम् सर्वजिनमन्दिरदर्शनमित्यर्थः। 'वार्षिकीम्' वर्षस्य द्वादशमासप्रमाणकालस्य इयम् संवत्सरसम्बन्धिनी....ताम्। 'स्वालोचनाम्' स्वम् आत्मानम् आलोच्यते विचिन्त्यतेऽतिचारविशुद्ध्यर्थमिति स्वालोचना-आचारपालने या क्षतयोऽतिचारा वा भूतास्तासां गुरोः पार्श्वे प्रकटनात् पश्चात् गुरुदत्ततपस्स्वाध्यायादिदण्डविशेषः ताम्। 'चः' समुच्चये। 'तनुत' विकिरत कुरुतेत्यर्थः। 'जन्तून्' प्राणिनः। 'क्षाम्यत' परस्परं क्षमाभावं स्वीकुरुत। 'साधर्मिकाणाम्' समानः धर्मः येषां सधर्माणः तुल्यधर्मवन्तः त एव साधर्मिकाः "विनयादिभ्यः' (सि०७।२।१६९) इतीकण्, तेषाम्। 'वत्सलम्' स्नेहम्। 'वाः' यथार्थकमव्ययम् यस्य समीपे य उचितः तत्प्रकारेण औचित्येन वा। 'कुरुत' विधत्त। हार्दन्त्विदम् लघुषु वात्सल्यं समवयस्कान् प्रति प्रीतिभावं महत्सु आदरभावं विनयपूर्ण–

व्यवहारमिति यद्वा 'वाः' समुच्चये। 'सा' विघ्नहरणतत्परा। 'सिद्धायिका' तन्नामवीरजिनेश्वरशासनसेविका। 'चतुरस्य चत्वारः पुरुषार्थः धर्मार्थकाममोक्षलक्षणाः सन्ति यस्मिन् अभ्रादित्वात् अः, तस्य निपुणस्य कृत्याकृत्यादिविवेकपूर्णस्येत्यर्थः। 'सङ्घस्य' साधु-साध्वीश्रावकश्राविकालक्षणस्य समुदायस्य। 'विघ्नौघम्' विघ्नानाम् अपायानाम् ओघं समूहम्। 'मुदा' हर्षेण आन्तरिकीप्रीतित्वात्। 'हरतु विनाशयतु दूरीकरोतु वा।

અર્થ—હે માણસો! અખંડ, અને સાધુના આચારો છે જેમાં એવાં, સુંદર, મૂલથી પ્રાપ્ત થયેલાં સૂત્રનું કાનવડે કરીને પાન કરો અને જિનમંદિરોની પરિપાટી અને વર્ષ સંબંધી પોતાની આલોચનાને કરો. પ્રાણીઓને ક્ષમા આપો અને સાધર્મિકોને વાત્સલ્ય કરો. તે સિદ્ધાયિકા દેવી નિપુણ એવા સંઘનાં વિઘ્નોનાં સમૂહને હર્ષથી દૂર કરો.

**समास–**

**साध्वाचारम्**—साधूनाम् आचारः यस्मिन् तद्—साध्वाचारम्, तद्—साध्वाचारम्। (व्य. ब. व्री.)

**अखण्डितम्**—न खण्डितम्—अखण्डितम्, तद्—अखण्डितम्। (न. त. पु.)

**स्वालोचनाम्**—स्वस्य आलोचना—स्वालोचना, (ष.त.पु.) (अथवा शोभना आलोचना—स्वालोचना, (सु. पू. त. पु.) ताम्—स्वालोचनाम्।

**साधर्मिकाणाम्**—समानः धर्मः येषां ते—सधर्माणः (स. ब. व्री.) सधर्माणः एव—साधर्मिकाः, तेषाम्—साधर्मिकाणाम्।

**विघ्नौघम्**—विघ्नानाम् ओघः—विघ्नौघः, तम् विघ्नौघम्। (ष.त.पु.)

## श्रीसिद्धचक्रस्तुतिः

( मालिनी )

श्रीसिद्धचक्रसन्माहात्म्यं वर्णयन्नाह–

विपुलकुशलमाला–केलिगे(गृ)हं विशाला–
ऽसमविभवनिधानं, शुद्धमन्त्रप्रधानम् ।
सुरनरपतिसेव्यं, दिव्यमाहात्म्यभव्यम्,
निहतदुरितचक्रं, संस्तुवे सिद्धचक्रम् ॥१॥

अन्वय–

निहतदुरितचक्रम्, विपुलकुशलमालाकेलिगेहम्, शुद्धमन्त्रप्रधानम्, विशालासमविभवनिधानम्, सुरनरपतिसेव्यम्, दिव्यमाहात्म्यभव्यम्, सिद्धचक्रम् संस्तुवे ।

विपुलकुशलेति....'निहतदुरितचक्रम्' निहतं नितरां संपूर्णतया वा विनाशितं दुरितानां दुःखानां कर्मणां वा चक्रं मण्डलं येन तद् दुःखसमूहप्रणाशीत्यर्थः । दुःखाभावेऽकुशलं कुतः ? एतदेव ज्ञापयति 'विपुलकुशलमालाकेलिगेहम्' विपुलं महत्तमं श्रेष्ठं वा यद् कुशलं मङ्गलं निर्वाणमिति यावत् तस्य या माला श्रेणी तस्याः केल्यै क्रीडायै गेहम् सद्म मन्दिरं वेत्यर्थः । "गेहं गेहोदवसितं वेश्म सद्म निकेतनम्" ॥४॥ इत्यमरः (२।२।४) । 'शुद्धमन्त्रप्रधानम्' शुद्धाः निर्मलाः कर्ममलदूरीकरणशीलत्वात् शुभाध्यवसायजनकत्वाच्च ये मन्त्राः जपनीयवर्णविशेषाः ॐकारह्रींकारादिलक्षणाः तैः प्रधानं मुख्यं श्रेष्ठं वा अद्वितीयत्वाद् । "मन्त्रो वेदविशेषे स्याद् देवादीनां च साधने । गुह्यवादनेऽपि

च पुमान् '' इति मेदिनी (१२८।७४-७५)। मन्त्रा हि निधीन् आकृषन्ति अत एव यस्मिन् मन्त्रास्तस्मिन् निधयः सन्त्येवैतत् ज्ञापयन्नाह—'विशालासमविभवनिधानम्' विशाला महन्तः असमाः असाधारणाः ये विभवाः बाह्याभ्यन्तरसम्पदः तेषां निधानम् निधिमिव उत्तमाद्वितीयवैभवस्थानम् इत्यर्थः। सुखाभिलाषिणः सर्वेऽपि वैभवप्रियाः अतोऽग्रे उक्तम् ' सुरनरपतिसेव्यम् ' सुराणां देवानाम् नराणां मनुष्याणां च ये पतयः स्वामिनः शक्राः नृपाश्च तैः सेव्यम् भजनीयम् । इन्द्रैः नृपतिभिश्च सेवनीयत्वाद् अस्य महिमाऽपूर्वः तमेव वर्णयन्नाह 'दिव्यमाहात्म्यभव्यम्' दिवि स्वर्गे भवं दिव्यम् उपलक्षणात् त्रिलोक्यामपि श्रेष्ठं वेत्यर्थः "दिव्यं वल्गु-लवङ्गयोः ॥३५७॥ द्युभवे" इत्यनेकार्थः (२।३५७) माहात्म्यं महान् अतिशयः उदारो वा आत्मा स्वरूपं महात्मा तस्य भावः कर्म वा माहात्म्यम् "पतिराजान्तगुणाङ्गाद०" (सि०७।१।६०) इत्यनेन ट्यण्, महत्त्वं तेन भव्यं मनोहरम् । 'सिद्धचक्रम्' सिद्धं प्रसिद्धं श्रीपालमयणादौ तत्कालफलितत्वाद् चक्रं वलयाकारमण्डलम् इति यद्वा (२) संयमसाधनेनाचार्यादयोऽपि सिद्धत्वं प्राप्स्यन्तीति भाविनि भूतोपचाराद् तेऽपि सिद्धाः, सिद्धानां चक्रं वलयं तन्नामयन्त्रविशेषमिति यावत् । (३) सिद्धस्य' सिद्धपदस्य विनिर्मुक्तकर्मावस्थाया वा समर्पकं चक्रम् सिद्धचक्रम् । 'संस्तुवे' सम्यक्प्रकारेण शोभितमनोवाक्कायेन वा स्तुवे भजामि उपासनां कुर्वे वेत्यर्थः । अहं कर्ता इति अध्याहार्यम् । इदं पद्यचतुष्कम् मालिनीवृत्तम् । तल्लक्षणन्तु प्राक्कथितम् ।

**અર્થ**—સંપૂર્ણપણે હણાયો છે પાપોનો સમૂહ જેનાવડે એવા, શ્રેષ્ઠ એવા કુશલની શ્રેણિનાં ક્રીડાગૃહ સરખા, શુદ્ધ મંત્રોવડે પ્રધાન, વિશાલ અને અસાધારણ વૈભવોના સ્થાનભૂત, દેવેન્દ્રો અને

રાજાઓવડે સેવવા યોગ્ય, સુંદર મહિમા વડે કરીને શ્રેષ્ઠ એવા સિદ્ધચક્રને હું સ્તવું છું.

**समास–**

**विपुलकुशलमालाकेलिगेहम्**–विपुलानि कुशलानि–विपुलकुशलानि, (वि. पू. क.) विपुलकुशलानां माला–विपुलकुशलमाला, (ष. त. पु.) केल्यै गेहम्–केलिगेहम्, (च.त.पु.) विपुलकुशलमालायाः केलिगेहम्–विपुलकुशलमालाकेलिगेहम्, तद्–विपुलकुशलमालाकेलिगेहम् (ष.त.पु.)

**विशालासमविभवनिधानम्**–विशालाश्चामी असमाश्च–विशाला-समाः, (वि. उभ. क.) विशालासमाः विभवाः–विशालासमविभवाः, (वि. पू. क.) विशालासमविभवानां निधानम्–विशालासमविभवनिधानम्, तद्–विशालासमविभवनिधानम् ।'(ष. त. पु.)

**शुद्धमन्त्रप्रधानम्**–शुद्धाश्च ते मन्त्राश्च–शुद्धमन्त्राः, (वि. पू. क.) शुद्धमन्त्रैः (कृतं) प्रधानम्–शुद्धमन्त्रप्रधानम्, तद्–शुद्धमन्त्रप्रधानम् । "तृतीयातत्कृतैः" ३।१।६५ (तृ. त. पु.)

**सुरनरपतिसेव्यम्**–सुराश्च नराश्च–सुरनराः, (इ. द्व.) सुरनराणां पतयः–सुरनरपतयः, (ष. त. पु.) सुरनरपतिभिः सेव्यम्–सुरनरपतिसेव्यम् तद्–सुरनरपतिसेव्यम् । (तृ. त. पु.)

**दिव्यमाहात्म्यभव्यम्**–महान् आत्मा–महात्मा, (वि. पू. क.) महात्मनः भावः कर्म वा–माहात्म्यम्. दिव्यं च तद् माहात्म्यं च–दिव्यमाहात्म्यम्, (वि. पू. क.) दिव्यमाहात्म्येन (कृतं) भव्यम्–दिव्य-माहात्म्यभव्यम्, तद्–दिव्यमाहात्म्यभव्यम् । "तृतीया०" ३।१।६५.... (तृ. त. पु.)

**निहतदुरितचक्रम्**–दुरितानां चक्रम्–दुरितचक्रम्, (ष. त. पु.) निहतं दुरितचक्रं येन तद्–निहतदुरितचक्रम्, तद्–निहतदुरितचक्रम । (स. ब. व्री.)

श्रीसिद्धचक्राराधनफलमुच्यते....

दमितकरणवाहं भावतो यः कृताहं-
कृतिनिकृतिविनाशं पूरिताङ्गिव्रजाशम् ।
नमितजिनसमाजं सिद्धचक्रादिबीजम्
भजति सगुणराजिः सोऽनिशं सौख्यराजिः ॥२॥

अन्वय—

यः दमितकरणवाहं, कृताहंकृतिनिकृतिविनाशं, पूरिताङ्गिव्रजाशं, नमितजिनसमाजं, सिद्धचक्रादिबीजम् भावतः भजति सः अनिशं सगुणराजिः सौख्यराजिः ( भवति )।

दमितकरणवाहमिति—'यः' कश्चिद् भावुकः। 'दमितकरणवाहम्' दमिताः दान्ताः रोधिताः वा करणानि इन्द्रियाणि एव वाहाः अश्वाः येन तद् वशीकृतेन्द्रियाश्वमित्यर्थः। 'कृताहंकृतिनिकृतिविनाशम्' कृतः विहितः अहंकृतिः गर्वः निकृतिः माया परप्रतारणरूपा क्रिया वा तयोः विनाशः क्षयः येन तद् मानमायाक्षयकारीत्यर्थः। "निकृति र्भर्त्सने क्षेपे शठे शाठ्येऽपि च स्त्रियाम्।" इति विश्वमेदिन्यौ (६०।१६५) (७७।३५)। 'पूरिताङ्गिव्रजाशम्' पूरिताः पूर्णीकृताः अङ्गिनाम् अङ्गानि गात्राणि सन्ति येषाम्—अङ्गिनः प्राणिनस्तेषां व्रजः समुदायस्तस्य आशा अभिलाषाः येन तद् प्राणिगणवाञ्छितदायकमित्यर्थः। 'नमितजिनसमाजम्' नमितः वन्दितः जिनानां वीतरागाणाम् प्रमत्तगुणस्थानादारभ्यकेवलिपर्यन्तानां भगवतां वा समाजः वृन्दं येन तद्। "समाजस्त्वन्यदेहिनाम्" इति हैमः (१४१४)। 'सिद्धचक्रादिबीजम्' सिद्धचक्रस्य—सिद्धा विद्यासिद्धादयस्तेषां चक्रमिव चक्रं यन्त्रविशेषं तस्य आदि प्रधानं

बीजं तत्त्वाक्षरम्, स्वर्णसिद्धयादिमहासिद्धिहेतोः सिद्धचक्रस्य पञ्च बीजानि तेष्वाद्यक्षरमित्यर्थः। तेन स्वर्णसिद्धयादिमहासिद्धीनामिदं मूलहेतुरित्युक्तम्। अर्हमिति बीजाक्षरम्–उक्तं च श्री ऋषिमण्डलस्तवे–

अर्हमित्यक्षरं ब्रह्म वाचकं परमेष्ठिनः ।
सिद्धचक्रादिमं बीजं सर्वतः प्रणिदध्महे ॥३॥

'भावतः' भावात् शुभाध्यवसायात्। 'भजति' सेवते उपास्यते वा। 'सः' श्रीसिद्धचक्रसेवकः। 'अनिशम्' नित्यम्। 'सगुणराजिः' गुणानां प्रशमादिलक्षणानां राज्या पङ्क्त्या सह वर्तते यः सः गुणश्रेणीस्थानम्। सौख्यराजिः सुखमेव सौख्यम्, भेषजादित्वात् टयण्, चित्तप्रसन्नता तस्य राजी श्रेणी यस्य सः आह्लादवान्। 'भवति' इति क्रियापदमध्याहार्यम्।

**અર્થ**—જે દમન કરાયા છે ઇન્દ્રિયો રૂપી અશ્વો જેનાવડે એવા, વિનાશ કરાયો છે અહંકાર અને માયાનો જેનાવડે એવા, પૂર્ણ કરાઇ છે પ્રાણિઓના સમૂહની આશાઓ જેનાવડે એવા, નમન કરાયો છે જિનેશ્વરદેવનો સમૂહ જેનાવડે એવા, શ્રી સિદ્ધચક્રનાં આદિબીજને ભાવથી ભજે છે તે હંમેશા ગુણોની શ્રેણીથી યુક્ત અને સુખની શ્રેણીવાળો થાય છે.

**दमितकरणवाहम्**—करणानि एव वाहाः–करणवाहाः, (अव.पू.क.) दमिताः करणवाहाः येन–तद् दमितकरणवाहम्, तद्–दमितकरणवाहम्। (स. ब. व्री.)

**कृताहंकृतिनिकृतिविनाशम्**—अहंकृतिश्च निकृतिश्च–अहंकृतिनिकृती, (इ. द्व.) अहंकृतिनिकृत्योः विनाशः–अहंकृतिनिकृतिविनाशः, (ष.त.पु.) कृतः अहंकृतिनिकृतिविनाशः येन तद् कृताहंकृतिनिकृतिविनाशम्, तद्–कृताहंकृतिनिकृतिविनाशम्। (स. ब. व्री.)

**पूरिताङ्गिव्रजाशम्**—अङ्गानि सन्ति येषाम्—अङ्गिनः, "अतोऽनेक०" ७।२।६....इन्, अङ्गिनां व्रजः—अङ्गिव्रजः, (ष. त. पु.) अङ्गिव्रजस्य आशाः—अङ्गिव्रजाशाः, (ष. त. पु.) पूरिताः अङ्गिव्रजाशाः येन तद्—पूरिताङ्गिव्रजाशम्, तद्—पूरिताङ्गिव्रजाशम् । (स. ब. व्री.)

**नमितजिनसमाजम्**—जिनानां समाजः—जिनसमाजः, (ष. त. पु.) नमितः जिनसमाजः येन तद्—नमितजिनसमाजम्, तद्—नमितजिनसमाजम् । (स. ब. व्री.)

**सिद्धचक्रादिबीजम्**—आदि च तद् बीजम् च—आदिबीजम्, (वि. पू. क.) सिद्धचक्रस्य आदिबीजम्—सिद्धचक्रादिबीजम्, तद्—सिद्धचक्रादिबीजम् । (ष. त. पु.)

**सगुणराजिः**—गुणानां राजी—गुणराजी, (ष. त. पु.) गुणराज्या सह वर्तते यः सः—सगुणराजिः । (सहार्थ. ब. व्री.)

**सौख्यराजिः**—सुखमेव सौख्यम्, सौख्यानां राजी यस्य सः—सौख्यराजिः । (व्य. ब. व्री.)

आगमस्य तरुत्वं वर्ण्यते—

**विविधसुकृतशाखो, भङ्गपत्रौघशाली,**
**नयकुसुममनोज्ञः, प्रौढसम्पत्फलाली (ढ्यः) ।**
**हरतु विनुवतां श्री-सिद्धचक्रं जनानां,**
**तरुरिव भवतापा-नागमः श्रीजिनानाम् ॥३॥**

अन्वय–

विविधसुकृतशाखः, भङ्गपत्रौघशाली, नयकुसुममनोज्ञः, प्रौढसम्पत्फलाली (ढ्यः), श्रीजिनानाम् आगमः तरुः इव श्रीसिद्धचक्रं विनुवतां जनानां भवतापान् हरतु...!

विविधसुकृतेति (विविधसुकृतशाखः) विविधानि नानाप्रकाराणि दानशीलतपस्स्वाध्यायलक्षणानि सुकृतानि शोभनानि कर्मक्षयकारणत्वात् कृतानि क्रीयन्ते इति कार्याणि अनुष्ठानानि वा तान्येव शाखाः लताः यस्मिन् सः। "विविधस्तु बहुविधो नानारूपः पृथग्विधः" ॥१४६९॥ इत्यभिधानः। "शाखा द्रुमांशे वेदांशे भुजे पक्षान्तरेऽन्तिके"। इत्यनेकार्थः (२।२६)। शाखायाः पश्चात् पर्णानि प्रादुर्भवन्तीति कथ्यते....'भङ्गपत्रौघशाली' भङ्गाः भेदाः प्रभेदाश्च त एव पत्राणि पर्णानि तेषामोघः समूहस्तेन शालते राजते इत्येवंशीलः शोभमानः इत्यर्थः। "भङ्गस्तरङ्ग—भेदे च रुग्विशेषे पराजये। कौटिल्ये भयविच्छित्योः" इत्यनेकार्थः। (२।३७) "पत्रं तु वाहने पर्णे स्यात् पक्षे शरपक्षिणोः। इति मेदिनी (१२६।५५)। अनुपर्णं तु जायन्ते कुसुमानि यतश्चाग्रे उच्यते....'नयकुसुममनोज्ञः' नयाः नैगमादयस्त एव कुसुमानि पुष्पाणि तैः मनोज्ञः श्रेष्ठः सुन्दरस्वरूपीत्यर्थः। "कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ॥५२॥ इत्यमरः (३।१।५२)। पुष्पेभ्योऽनु फलानि प्रसुवन्ते.... 'प्रौढसम्पत्फलाली ढ्यः)' प्रकृष्टाः सुन्दरतमाः केनाऽपि अजेयत्वाद्....ऊढाः तर्कास्तेषां सम्पदः समृद्धयस्ता एव फलानि वृक्षस्य अन्तिमपरिणामविशेषाणि तैः अलते शोभते इत्येवंशीलः सम्यक्तर्कसमृद्धिफलविराजीत्यर्थः। यद्वा तैः एतादृशैः फलैः आढ्यः पूर्णः सुतर्कसम्पत्फलपूर्ण इत्यर्थः। 'श्रीजिनानाम्' श्रिया लक्ष्म्या बाह्याभ्यन्तरसम्पदा युक्ताः जिनाः वीतरागास्तेषां श्रीजिनेश्वरदेवानामित्यर्थः। 'आगमः' सिद्धान्तः। 'तरुः' वृक्षः। 'इव' उपमानार्थे। 'श्रीसिद्धचक्रम्' श्रिया लक्ष्म्या मन्त्रादिलक्षणया युक्तं सिद्धचक्रं नवपदमययन्त्रकम्। 'विनुवताम्' विशेषेण पूर्णाहोभावयुक्तहृदयत्वात सर्वोत्कृष्टरीत्या नुवतां स्तुतिं कुर्वाणानाम्। 'जनानाम्' भावुकानाम्।

'भवतापान्' भवस्य संसारस्य तापान् सन्तापान् आधिव्याध्युपाधिलक्षणान् । "तापः सन्तापे कृच्छ्रे च" इत्यनेकार्थः (२।२९१)। 'हरतु' विनाशयतु दूरीकरोतु वेत्यर्थः ।

**અર્થ**—અનેક પ્રકારનાં સત્કાર્યોરૂપી શાખાઓવાળો, ભાંગાઓરૂપી પાંદડાઓનાં સમૂહવડે શોભવાનાં સ્વભાવવાળો, નયો રૂપી પુષ્પોવડે મનોહર, પ્રકૃષ્ટતર્કોની સંપત્તિરૂપ ફલોવડે શોભતો (અથવા–ફલોથી પૂર્ણ) શ્રીજિનેશ્વરદેવોનો સિદ્ધાન્ત, વૃક્ષની જેમ શ્રીસિદ્ધચક્રની વિશેષ કરીને સ્તુતિ કરતાં માણસોના સંસારનાં તાપને હરો.

**समास–**

**विविधसुकृतशाखः**—शोभनानि कृतानि–सुकृतानि, (सु.पू.त.पु.) विविधानि च तानि सुकृतानि च—विविधसुकृतानि, (वि.पू.क.) विविधसुकृतानि एव शाखाः यस्य सः—विविधसुकृतशाखः । (उप. ब. व्री.)

**भङ्गपत्रौघशाली**—भङ्गाः एव पत्राणि—भङ्गपत्राणि, (अव.पू.क.) भङ्गपत्राणाम् ओघः—भङ्गपत्रौघः, (ष.त.पु.) भङ्गपत्रौघेन शालते इत्येवंशीलः भङ्गापत्रौघशाली । (उप.त.पु.) "अजातेः शीले" ५।१।१५४.... णिन् ।

**नयकुसुममनोज्ञः**—नयाः एव कुसुमानि—नयकुसुमानि, (अव.पू.क.) नयकुसुमैः (कृतः) मनोज्ञः—नयकुसुममनोज्ञः । "तृतीया०" ३।१।६५... (तृ. त. पु.)

**प्रौढसम्पत्फलाली** (ढ्यः)—प्रकृष्टाः ऊढाः—प्रौढाः, (प्रादि. कर्म.) प्रोढानां सम्पदः—प्रौढसम्पदः, (ष. त. पु.) प्रौढसम्पदः एव फलानि प्रौढसम्पत्फलानि, (अव. पू. क.) प्रौढसम्पत्फलैः अलते इत्येवंशीलः–प्रौढसम्पत्फलाली । 'अजातेः शीले' ५।१।१५४...णिन् (उप. त. पु.) अथवा—प्रौढसम्पत्फलैः (कृतः) आढ्यः—प्रौढसम्पत्फलाढ्यः । "तृतीया तत्कृतैः" ३।१।६५... (तृ.त.पु.)

श्रीसिद्धचक्रम्–श्रिया युक्तम्–श्रीयुक्तम्, (तृ.त.पु.) श्रीयुक्तम् सिद्धचक्रम्–श्रीसिद्धचक्रम्, तद्–श्रीसिद्धचक्रम् । (म. प. लो. क.)

भवतापान्–भवस्य तापाः–भवतापाः, तान्–भवतापान् ।(ष.त.पु.)

श्रीजिनानाम्–श्रिया युक्ताः–श्रीयुक्ताः, (तृ. त. पु.) श्रीयुक्ताः जिनाः–श्रीजिनाः, तेषाम्–श्रीजिनानाम् । (म. प. लो. कः)

श्रीरोहिण्यादिदेव्यै प्रार्थना....

**जिनपतिपदसेवा–सावधाना धुनाना–,**
**दुरितरिपुकदम्बं कान्तकान्तिं दधानाः ।**
**ददतु तपसि पुंसां सिद्धचक्रस्य नव्यं,**
**प्रमदमिह रतानां रोहिणीमुख्यदेव्यः ॥४॥**

अन्वय–

जिनपतिपदसेवासावधानाः 'दुरितरिपुकदम्बं धुनानाः' कान्तकान्तिं दधानाः, रोहिणीमुख्यदेव्यः इह सिद्धचक्रस्य तपसि रतानां पुंसां नव्यं प्रमदं ददतु....

जिनपतिपदसेवेति....'जिनपतिपदसेवासावधाना' जिनानां वीतरागाणां केवलिभगवतां पतयः स्वामिनस्तेषाम् अर्हत्परमात्मनां पदयोः चरणयोः सेवायाम् उपासनायां सावधानाः अवधानेन एकाग्रमनसा सह वर्तन्ते यास्ताः दत्तचित्ताः प्रभुचरणोपासनपरायणाः इत्यर्थः । 'दुरितरिपुकदम्बम्' दुरितानि दुःखानि पापानि वा तान्येव रिपुः शत्रुः तमेव कदम्बं नीपं तन्नामवृक्षविशेषं वा । "कदम्बं निकुरम्बे स्यान्नीपसर्षपयोः पुमान्" इति मेदिनी ( १०५।९ ) 'धुनानाः' कम्पायमानाः उन्मूलनस्याक्षमत्वात् । 'कान्तकान्तिम्' कान्तां मनोहरां दर्शनमात्रेणैवाह्लादकत्वात् कान्ति

शोभां देहसौष्ठवं वा । 'दधानाः' धारयन्त्यः सर्वोत्कृष्टरूपवत्य इत्यर्थः । 'रोहिणीमुख्यदेव्यः' रोहिणी तन्नामदेवीविशेषा मुख्या प्रधाना यासु ताः रोहिणी–प्रमुखाः तादृश्यः देव्यः सुराङ्गनाः षोडशविद्यादेव्यः इत्यर्थः । तद्यथा...

"रोहिणी प्रज्ञप्तिर्वज्रशृङ्खला कुलिशाङ्कुशा ।
चक्रेश्वरी नरदत्ता काल्यथासौ महापरा ॥२३९॥
गौरी गान्धारी सर्वास्त्रमहाज्वाला च मानवी ।
वैरोट्याऽच्छुप्ता मानसी महामानसिकेति ताः" ॥२४०॥

इत्यभिधानचिन्तामणिनाममाला । 'इह' अस्मिन् लोके । 'सिद्धचक्रस्य' नवपदस्य । 'तपसि' अनुष्ठानविशेषे । 'रतानाम्' आसक्तानाम् । 'पुंसाम्' नराणाम् । 'नव्यम्' नूतनम् प्रतिदिनं वर्द्धमानत्वात् । "नवं नवीनं सद्यस्कं प्रत्यग्रं नूत्ननूतने । नव्यं चाभिनवे" इत्यभिधाने (१४४८) । 'प्रमदम्' हर्षमुत्साहं वा । 'ददतु' अर्पयन्तु ।

અર્થ—જિનેશ્વરદેવોની સેવામાં એકાગ્ર થયેલી, દુઃખ (પાપ) સ્વરૂપ શત્રુરૂપી કંદબવૃક્ષને કંપાવનારી, મનોહર કાંતિને ધારણ કરતી, રોહિણી છે મુખ્ય જેમાં એવી દેવીઓ આ લોકને વિષે સિદ્ધચક્રજીનાં તપને વિષે રક્ત થયેલા માણસોને નવો જ આનંદ (ઉત્સાહ) આપો.

समास–

**जिनपतिपदसेवासावधानाः**–जिनानां पतयः–जिनपतयः, (ष. त. पु.) जिनपतीनां पदानि–जिनपतिपदानि, (ष. त. पु.) जिनपति–पदानां सेवा–जिनपतिपदसेवा, (ष. त. पु.) अवधानेन सह वर्तते याः ताः–सावधानाः । (सहार्थ. ब. व्री.) जिनपतिपदसेवायां साव-धानाः–जिनपतिपदसेवासावधानाः । (स. त. पु.)

**दुरितरिपुकदम्बम्**—दुरितम् एव रिपुः—दुरितरिपुः, (अव. पू. क.) दुरितरिपुः एव कदम्बः—दुरितरिपुकदम्बः, तम्—दुरितरिपुकदम्बम् । (अव. पू. क.)

**कान्तकान्तिम्**—कान्ता कान्तिः—कान्तकान्तिः, ताम्—कान्तकान्तिम् । (वि. पू. क.)

**रोहिणीमुख्यदेव्यः**—रोहिणी मुख्या यासु ताः—रोहिणीमुख्याः, (स. ब. व्री.) रोहिणीमुख्याः देव्यः—रोहिणीमुख्यदेव्यः । (वि. पू. क.)

## श्रीतीर्थस्तुतिः

(शार्दूलविक्रीडितवृत्तम्)

तीर्थवन्दना....

**आद्यं तीर्थकरं नमामि नितरां शत्रुञ्जयेऽष्टापदे,**
**सम्मेताभिधशैलराजशिखरे वन्देऽर्हतां विंशतिम् ।**
**चम्पायां वसुपूज्यनन्दनमथो नेमिं स्तुवे रैवते,**
**पापायां पुरि वर्धमानममलं देवं नमाम्यन्वहम् ॥१॥**

अन्वय—

शत्रुञ्जये अष्टापदे आद्यं तीर्थकरं नितरां नमामि, सम्मेताभिधशैलराजशिखरे अर्हतां विंशतिं वन्दे, अथो चम्पायां वसुपूज्यनन्दनम् रैवते (च) नेमिं स्तुवे, पापायां पुरि अलं देवं वर्धमानम् अन्वहम् नमामि ।

आद्यमिति—शत्रुञ्जये शत्रून् रिपून् विरोधिराजव्यक्तिलक्षणबाह्यकान् कामक्रोधरागद्वेषाद्यन्तरङ्गान् जयति पराभवतीति शत्रुञ्जयस्तन्नामतीर्थविशेषस्तस्मिन् । "शत्रुञ्जयो विमलाद्रिः" इति हैमः (१०२९) । 'अष्टापदे' अष्टौ तत्सङ्ख्यकानि पदानि सोपानानि यस्य सोऽपि तीर्थविशेषः श्रीऋषभप्रभो निर्वाणभूमिर्वा....

तस्मिन् । "अष्टापदश्चन्द्रमल्ल्यां लूतायां शरभे गिरौ । कनके शारिफलके" इत्यनेकार्थः । (४।१३६)। 'आद्यम्' आदौ प्रथमे एतद्वसर्पिणीकालस्य पूर्वभागे भवं जातं वा आद्यं प्रथमम् श्रीऋषभदेवमित्यर्थः । "पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्याः" इत्यमरः (३।१।८०)। 'तीर्थकरम्' तीर्थं धर्मशासनं साधुसाध्वीश्रावकश्राविकारूपं वा करोति विदधातीति तीर्थकरोऽर्हन् तम् जिनेन्द्रमित्यर्थः । 'नितराम्' सततम् । 'नमामि' नमस्कारं करोमि । 'सम्मेताभिधशैलराजशिखरे' सम्मेतः पवित्रपर्वतविशेषः अभिधा नाम यस्य सः तन्नामतीर्थविशेषः विंशतिजिनेशनिर्वाणक्षेत्रं वा तादृशः शैलराजः शैलानां पर्वतानां राजा स्वामी जिनेश्वरविंशतिमोक्षकल्याणकदायित्वात् तस्य शिखरे सर्वोपरिभागे । 'अर्हताम्' तीर्थकृताम् । 'विंशतिम्' तत्सङ्ख्यकाम् । 'वन्दे' प्रणामं कुर्वे । 'अथो' आनन्तर्ये, ततः पश्चादेव विलम्बं विनेत्यर्थः । 'चम्पायाम्' तन्नामनगरीविशेषे । 'वसुपूज्यनन्दनम्' वसुभिः नृपैः पूज्यः स्तुत्यः वसुपूज्यः तन्नामराजाधिराजः तस्य नन्दनम् पुत्रम् श्रीवासुपूज्यजिनेश्वरमित्यर्थः । "रैवते' उज्जयन्तपर्वते तन्नामगिरिविशेषे वा । 'नेमिम्' द्वाविंशं तीर्थपतिम् । 'स्तुवे' स्तुतिं कुर्वे । 'पापायां पुरि' तन्नामनगर्यां श्रीवीरजिनेन्द्रनिर्वाणभूमौ वा । 'अलम्' समर्थम् भवोदधि–तारकत्वात् । 'देवम्' तीर्थपतिम् । 'वर्धमानम्' श्रीमहावीरम् । 'अन्वहम्' अह्नि अह्नि अन्वहम् प्रतिदिनम् । 'नमामि' वन्दे । इदं पद्यचतुष्कं शार्दूलविक्रीडितवृत्तम् । तल्लक्षणन्तु पूर्वोक्तम् ।

**અર્થ** :—શત્રુંજય પર્વતને વિષે અને અષ્ટાપદ પર્વતને વિષે પહેલા તીર્થંકરદેવને હું હંમેશાં નમું છું, સમ્મેત નામના ગિરિરાજના શિખરને વિષે અરિહંતોની વીશીને=વીશ તીર્થંકર દેવોને વંદન કરું છું, હવે ચંપાનગરીમાં વસુપૂજ્ય રાજાના પુત્ર (વાસુ-

પૂજ્યસ્વામિ)ની અને રૈવત-ગિરનાર ગિરિ ઉપર નેમિનાથ પ્રભુની સ્તુતિ કરૂં છું. પાપાપુરી ( પાવાપુરી )માં સમર્થ દેવ ( દેવાધિદેવ ) એવા વર્ધમાનસ્વામિને પ્રતિદિન નમસ્કાર કરૂં છું.

समास—

आद्यम्—आदौ भवः—आद्यः, तम्—आद्यम् । "दिगादिदेहांशाद्यः' ६।३।१२४....य,

तीर्थंकरम्—तीर्थं करोतीति—तीर्थंकरः, तम्—तीर्थंकरम् । "हेतुतच्छीला० ' ५।१।१०३....ट, ( उप. त. पु. )

शत्रुञ्जये—शत्रून् जयतीति—शत्रुञ्जयः, तस्मिन्—शत्रुञ्जये । "भृ-वृ-जि-तृ-तप-दमेश्च नाम्नि" ५।१।११२...ख, (उप. त. पु.)

अष्टापदे—अष्टौ पदानि यस्य सः—अष्टापदः, तस्मिन्—अष्टापदे । (स. ब. व्री.)

सम्मेताभिधशैलराजशिखरे—सम्मेतः अभिधा यस्य सः—सम्मेताभिधः, (स. ब. व्री.) शैलानां राजा—शैलराजः, (ष. त. पु.) "राजन्सखेः" ७।३।१०६...अट्, सम्मेताभिधः शैलराजः—समेताभिधशैलराजः, (वि.पू.क.) सम्मेताभिधशैलराजस्य शिखरम्—सम्मेताभिधशैलराजशिखरम, तस्मिन्—सम्मेताभिधशैलराजशिखरे । ( ष. त. पु. )

वसुपूज्यनन्दनम्—वसुपूज्यस्य नन्दनः—वसुपूज्यनन्दनः, तम्—वसुपूज्यनन्दनम् । ( ष. त. पु. )

अन्वहम्—अह्नि अह्नि—अन्वहम् । ( अव्ययीभाव, स. ) "नपुंसकाद्वा" ७।३।८९ अत् ।

भूतभाविवर्तमानभगवद्वन्दना--

**नृक्षेत्रे मनुजोत्तरेण गिरिणा संवेष्टिते सर्वतो,**
**ऽतीतानागतवर्तमानसमये संपेदिरे ये जिनाः ।**

तेषां सिद्धिमुपेयुषां त्रिजगतां पूज्यत्वमासेदुषाम्,
भक्त्या पादयुगं नमामि सुभगं सम्यक्त्रिधा सर्वदा ॥२॥

अन्वय-

मनुजोत्तरेण गिरिणा सर्वतः संवेष्टिते नृक्षेत्रे अतीतानागतवर्तमानसमये ये जिनाः संपेदिरे सिद्धिम् उपेयुषां त्रिजगतां पूज्यत्वम् आसेदुषाम् तेषां सुभगं पादयुगं त्रिधा भक्त्या सर्वदा सम्यक् नमामि ।

नृक्षेत्र इति—'मनुजोत्तरेण' मनुजेभ्यः मनुष्येभ्यः उत्तरः पश्चिमः मनुष्यक्षेत्रसीमवर्तिपर्वतनामविशेषस्तेन । 'गिरिणा' अद्रिणा । 'सर्वतः' सर्वस्मात् देशात् परितो वा । 'संवेष्टिते' सम्यक्-प्रकारेण परिरुद्धे । 'नृक्षेत्रे' नृणां मनुष्याणां क्षेत्रे भूमौ पञ्चचत्वारिंशल्लक्षयोजनप्रमाणमनुष्यक्षेत्रमित्यर्थस्तस्मिन् । 'अतीता-नागतवर्तमानसमये' अतीतः भूतः अनागतः भावी वर्तमानः संप्रतिकालविशेषः त एव तेषां वा समयः कालस्तस्मिन् । 'ये' वक्ष्यमाणलक्षणाः । 'जिनाः' जिनेश्वरदेवाः । 'संपेदिरे' समुत्पन्नाः उपलक्षणात् प्रादुर्भवन्ति प्रादुर्भविष्यन्ति तेऽपि ग्राह्याः । 'सिद्धिम्' मुक्तिम् सर्वकर्मविनिर्मुक्तावस्थाम् । 'उपेयुशाम्' प्राप्तानाम् । 'त्रिजगताम्' त्रीणि उर्ध्वतिर्यगधोलक्षणानि स्वर्गमृत्युपातालस्वरूपाणि वा जगन्ति विश्वाः लोका वा तेषां । 'पूज्यत्वम्' स्तुत्यनम्यत्वम् । 'आसेदुषाम्' आपन्नानाम् । 'तेषाम्' उक्तरूपाणां परमात्मनाम् । 'सुभगम्' शोभनम् अप्रतिहतत्वाद् अतिशयं सर्वोत्कृष्टत्वाद् वा भगम् ऐश्वर्यम् अष्टप्रातिहार्यचतुस्त्रिंशदतिशयात्मरूपं वा यस्य तद् श्रेष्ठश्रीमद् । 'पादयुगम्' पादयोः चरणयोः युगं द्विक । 'त्रिधा' त्रिभिः प्रकारैः मनोवाकायलक्षणैः ।

'भक्त्या' सेवनासक्त्या । 'सर्वदा' सर्वस्मिन् काले क्षेत्रे वा । 'सम्यक्' शुभभावयुतेन विधिपूर्वकं वा । 'नमामि' वन्दे ।

**અર્થ**:—માનુષોત્તર પર્વતવડે સર્વ બાજુથી વિંટળાયેલ મનુષ્યક્ષેત્રને વિષે ભૂતભાવિ અને વર્તમાનકાલને વિષે જે જિનેશ્વરદેવો સંપન્ન થયા છે. સિદ્ધિને પ્રાપ્ત કરેલાં ત્રણ જગતનાં પૂજ્યપણાને પ્રાપ્ત કરેલાં એવા તેઓનાં સૌભાગ્યવાળાં ચરણયુગલને ત્રણ પ્રકારે ભક્તિથી હંમેશા સારી રીતે હું નમસ્કાર કરૂં છું.

**समास**–

**नृक्षेत्रे**–नृणां क्षेत्रम्–नृक्षेत्रम्, (ष.त.पु.) अथवा नृभिः अधिष्ठितम्–न्रधिष्ठितम्, (तृ. त. पु.) न्रधिष्ठितम् क्षेत्रम्–नृक्षेत्रम्, (म. प. लो. क.) तस्मिन्–नृक्षेत्रे ।

**मनुजोत्तरेण**–मनोः जाताः–मनुजाः, "अजातेः पञ्चम्याः" ५।१।१७०...ड, (उप. त. पु.) मनुजेभ्यः उत्तरः–मनुजोत्तरः, तेन–मनुजोत्तरेण । (पं.त.पु.)

**अतीतानागतवर्तमानसमये**–अतीतश्च अनागतश्च वर्तमानश्च–अतीतानागतवर्तमानाः, (इ.द्व.) अतीतानागतवर्तमानानाम् समयः–अतीतानागतवर्तमानसमयः, तस्मिन्–अतीतानागतवर्तमानसमये । (ष.त.पु.)

**त्रिजगताम्**–त्रीणि च तानि जगन्ति च–त्रिजगन्ति, तेषाम्–त्रिजगताम् । (वि.पू.क.)

**पूज्यत्वम्**–पूज्यस्य भावः कर्म वा–पूज्यत्वम्, तद्–पूज्यत्वम् । "भावे त्वतल्" ७।१।५०...त्व,

**पादयुगम्**–पादयोः युगम्–पादयुगम्, तद्–पादयुगम् । (ष.त.पु.)

**सुभगम्**–शोभनं भगं यस्य तद्–सुभगम्, तद्–सुभगम् । (अव्यय. ब. व्री.)

श्रीसिद्धान्तस्तवनम्—

यत्रोक्तं किल पुण्यपातकफलं सर्वाङ्गिणां ज्ञानिभि–,
जीवादीनि विचारितानि नव वै तत्त्वानि सम्यक्तया ।
यं स्वाध्यायरताः पठन्ति मुनयः कर्मक्षयायोद्यताः,
तं ध्यायामि विचारयामि विनुवाम्यर्च्चामि जैनागमम् ॥३॥

अन्वय—

यत्र ज्ञानिभिः सर्वाङ्गिणां पुण्यपातकफलम् उक्तं वै जीवादीनि नवतत्त्वानि सम्यक्तया विचारितानि किल कर्मक्षयाय उद्यताः स्वाध्यायरताः मुनयः यं पठन्ति तं जैनागमं ध्यायामि विचारयामि विनुवामि अर्च्चामि ।

यत्रोक्तमिति–'यत्र' यस्मिन् सिद्धान्ते । 'ज्ञानिभिः' ज्ञानम् आगमपूर्वगतबोधनम् अस्ति येषां तैः गीतार्थगुरुभिः । 'सर्वाङ्गिणां सर्वेषां समस्तानां सूक्ष्मजीवादारभ्यानुत्तरवासिसुरपर्यन्तानाम् अङ्गिनां देहिनाम् । पुण्यपातकफलम् ' पुण्यं सुकृतं पातकं पापं दुष्कृतं वा तयोः फलं विपाकं शुभाशुभकर्मजन्यपरिणामविशेषमित्यर्थः । 'उक्तम् ' भाषितं वर्णितं वा । 'वै' पादपूरणार्थे । "तु हि च स्म ह वै पादपूरणे" इत्यमरः (३।४।५) । 'जीवादीनि' जीवति स्वस्व-योग्यतया इन्द्रियप्रभृतिप्राणान् धारयतीति जीवः आत्मा चैतन्य-लक्षणो वा स आदौ प्रथमे येषां तानि जीवाजीवपुण्यपापाश्रवसंवर बन्धनिर्जरामोक्षलक्षणानि । 'नव' तत्सङ्ख्यकानि । 'तत्त्वानि' मूलतः प्ररूप्याणि । 'सम्यक्तया' सुगमबोधनरीत्या । 'विचारितानि' चिन्तितानि प्ररूपितानि वा । 'किलः' वृतान्तार्थे पुनरित्यर्थः । कर्मक्षयाय' कर्मणां ज्ञानावरणीयादिलक्षणानां पापानां क्षयाय विनाशाय । 'उद्यताः' तत्पराः । 'स्वाध्यायरताः' स्वस्य आत्मनः स्वस्मै

आत्मने वा हितमध्ययनं ग्रन्थपठनपाठनस्वरूपं वाचना–पृच्छना–परावर्तनाऽनुप्रेक्षाधर्मकथालक्षणपञ्चविधं तत्त्वानुचिन्तनं वा तस्मिन् रताः आसक्ताः। 'मुनयः' श्रमणभगवन्तः। 'यम्' वीतराग-प्ररूपितसिद्धान्तम्। 'पठन्ति' अधीयते। 'तम्' उक्तस्वरूपम्। 'जैनागमम्' जिनानां वीतरागाणामयं जिनै र्वा अर्हद्भगवद्भिः प्रोक्तम् जैनम् जिनेश्वरदेवसम्बन्धिनं जिनोक्तं वा आगमं सिद्धान्तं द्वादशाङ्ग-रूपं वा। 'ध्यायामि' ध्यानं करोमि श्रद्धापूर्णहृदये निष्ठापयामि। 'विचारयामि' चिन्तयामि हृदयगतम् एनं मनसि निदधे। 'विनुवामि' संस्तुवे मनोयोगेन सह वचनयोगं नियोजयन् स्तुतिं कुर्वे इत्यर्थः। प्रान्ते 'अञ्चामि' पूजयामि काययोगोऽपि सहचारी भवतीत्यर्थः। हार्दन्त्विदम्–प्राक् हृदये पश्चात् मनसि तदनु वचसि अन्ते च काययोगे एवं सर्वयोगैः सिद्धान्तप्रणिधानं कृतम्।

**અર્થ**:–જેને વિષે જ્ઞાનીભગવંતોવડે સર્વપ્રાણીઓનાં પુણ્ય–પાપનાં ફલ કહેવાયા છે વળી જીવ વિગેરે નવતત્ત્વોને સારી રીતે વિચારાયા છે. ખરેખર કર્મનો નાશ કરવા માટે તૈયાર થયેલ સ્વાધ્યાયમાં લીન એવા મુનિભગવંતો જેને ભણે છે તે જિનેશ્વરદેવનાં સિદ્ધાન્તનું હું ધ્યાન કરું છું. ચિંતન કરું છું. સ્તવન કરું છું. પૂજન કરું છું.

**समास–**

**पुण्यपातकफलम्** –पुण्यं च पातकं च एतयोः समाहारः–पुण्य-पातकम्, "विरोधिनामद्रव्याणां नवा द्वन्द्वः स्वैः" ३।१।१३०... (समा.द्व.) पुण्यपातकस्य फलम्–पुण्यपातकफलम्। (ष.त.पु.)

**सर्वाङ्गिणाम्** –अङ्गानि सन्ति येषां–अङ्गिनः, "अतोऽनेक०" ७।२।६...इन्, सर्वे च ते अङ्गिनश्च–सर्वाङ्गिणः, तेषाम्–सर्वाङ्गिणाम्। (वि. पू. क.)

ज्ञानिभिः—ज्ञानं विद्यते येषु ते—ज्ञानिनः, तैः ज्ञानिभिः । पूर्ववत्....इन् ,

जीवादीनि —जीवः आदौ येषां तानि—जीवादीनि, (व्य.ब.व्री.)

स्वाध्यायरताः—स्वस्य अध्यायः—स्वाध्यायः, "कृति" ३।१।७७ (ष. त. पु.) स्वाध्याये रताः—स्वाध्यायरताः । " क्तेन " ३।१।९२.... (स. त. पु.)

कर्मक्षयाय—कर्मणाम् क्षयः—कर्मक्षयः, तस्मै—कर्मक्षयाय। (ष.त.पु.)

जैनागमम् —जिनानाम् अयम्—जैनः, "तस्येदम्" ६।३।१६० सूचनथी " प्राग् जितादण् " ६।१।१३...अण्, जैनश्चासौ आगमश्च—जैनागमः, तम्—जैनागमम् । (वि.पू.क.)

सम्यग्दृष्टिसुरसंस्तवनम्

**भव्यानां जिनशासने स्थितवतां धर्मं शुचिं कुर्वताम् ,**
**ये निघ्नन्ति समग्रविघ्ननिवहान् ध्वान्तानि सूर्या इव ।**
**ते शक्रप्रमुखाः प्रसादसुमुखाः सम्यग्दृशां सम्मुखाः,**
**वैयावृत्यकराः सुरासुरवराः सङ्घस्य भद्रङ्कराः ॥४॥**

अन्वय—

सूर्याः ध्वान्तानि इव ये जिनशासने स्थितवतां शुचिं धर्मं कुर्वताम् भव्यानां समग्रविघ्ननिवहान् निघ्नन्ति ते प्रसादसुमुखाः सम्यग्दृशां सम्मुखाः वैयावृत्यकराः सुरासुरवराः शक्रप्रमुखाः सङ्घस्य भद्रङ्कराः ( सन्तु )।

भव्यानामिति...'सूर्याः' भानवः। 'ध्वान्तानि' अन्धकाराणि विनाशयन्ति । ' इवः ' उपमानार्थे तथैवेत्यर्थः । 'ये' निम्नवर्णित-स्वरूपाः शक्रादयः । ' जिनशासने ' जिनानां वीतरागाणां जिनै र्वाऽर्हद्भिः प्रोक्ते प्ररूपिते वा शासने साम्राज्ये आज्ञायां वा । "शासनं

नृपदत्तोर्व्यां शास्त्राज्ञालेखशास्तिषु ।" इत्यनेकार्थः ( ३।४१७ )। 'स्थितवताम्' निवासं कृतवताम्। 'शुचिम्' पवित्रम् पुण्यबन्धनहेतुत्वाद् कर्ममलदूरीकरणत्वात् च। "शुचिः शुद्धे सितेऽनले" इत्यनेकार्थः (२।५९)। 'धर्मम्' दानशीलतपोभावलक्षणम् आचरणीयोऽनुष्ठानविशेषः तम्। 'कुर्वताम्' विदधताम् आचरतामित्यर्थः। 'भव्यानाम्' भावुकानाम्। 'समग्रविघ्ननिवहान्' समग्राः समस्ताः देवदानवमानवकृताः विघ्नाः उपद्रवास्तेषां निवहाः समूहास्तान्। "समवायो निकुरम्बं जालं निवहसञ्चयौ। जातम्" इत्यभिधान० (१४१२)। 'निघ्नन्ति' नितरां संपूर्णतया घ्नन्ति क्षयं कुर्वन्ति। 'ते' विघ्नहरणतत्पराः। 'प्रसादसुमुखाः' प्रसादेन भगवत्कृपया सुमुखाः शोभनं सदैवाह्लादकत्वात् सुन्दरं मुखं वक्त्रं येषां ते तेन प्रभुकृपापात्रत्वं वर्णितम्। 'सम्यग्दृशाम्' सम्यग् कृत्याकृत्यविवेकपूर्णे शोभने दृशौ दृष्टी अवलोकनशक्ती वा येषां तेषां निर्धारणषष्ठी बोध्या। 'सम्मुखाः' संगतं प्राप्तं मुखम् आननं येषां ते प्रधाना इत्यर्थः अनेन सम्यग्दृष्टित्वं कथितम्। 'वैयावृत्त्यकराः' वैयावृत्त्यम् व्यावृत्तः प्रवचनोदितक्रियानुष्ठानलक्षणव्यापारप्रवृत्तः तस्य भावः कर्म वा वैयावृत्त्यम् व्याधिपरीषहाद्युपसर्गोपनिपाते तत्प्रतीकारस्तदानुकूल्यानुष्ठानं चेत्यर्थः।तच्चाऽऽचार्योपाध्याय-स्थविर-तपस्वि-शैक्षग्लान–साधर्मिक-कुल-गण–सङ्घलक्षणभेदेन दशधा. तत्कुर्वन्ति विदधते इत्येवंशीलाः सेवास्वभाविन इत्यर्थः एतेन भक्तिभरत्वमुक्तम्। 'सुरासुरवराः' सुराः देवाः असुराः दानवास्तेषु वराः प्रशस्ताः एनेन च उत्तमजातिस्वभावत्वमुदितम्। 'शक्रप्रमुखाः' शक्राः इन्द्राः चतुःषष्टिसङ्ख्यकाः स्वर्गाधिपाः वा प्रमुखाः मुख्याः प्रमुखे प्रथमे वा येषु ते इन्द्रादय इत्यर्थः। "प्रमुखं प्रथमे मुख्ये" इत्यनेकार्थः (२।१०४)। 'सङ्घस्य' तीर्थस्य साधुसाध्वीश्रावकश्राविकालक्षणस्य समुदायस्य

वा । 'भद्रङ्कराः' भद्रं क्षेमं कुशलं वा कुर्वन्ति विदधते इति सुखदायका इत्यर्थः । 'सन्तु' इति क्रियापदमध्याहार्यम् ।

અર્થ:-સૂર્યો અંધકારોનો નાશ કરે છે તેમ જેઓ ( ઇન્દ્ર વિગેરે) જિનશાસનમાં રહેલા પવિત્ર ધર્મને કરતા એવાં ભવ્યજીવોનાં સમસ્તવિઘ્નોનાં સમૂહનો સંપૂર્ણપણે નાશ કરે છે તે કૃપાવડે કરીને સુંદર સમ્યગ્દૃષ્ટિઓમાં પ્રધાન વૈયાવચ્ચને કરવાના સ્વભાવવાળા દેવ-દાનવોમાં શ્રેષ્ઠ ઇન્દ્ર વિગેરે દેવો સંઘના કલ્યાણને કરનારા થાઓ.

समास—

**जिनशासने**—जिनानां शासनम्—जिनशासनम्, तस्मिन्—जिनशासने । (ष.त.पु.)

**समग्रविघ्ननिवहान्**—समग्राश्चामी विघ्नाश्च—समग्रविघ्नाः, (वि. पू. क.) समग्रविघ्नानां निवहाः—समग्रविघ्ननिवहाः, तान्—समग्रविघ्न निवहान् । (ष.त.पु.)

**शक्रप्रमुखाः**—शक्राः प्रमुखाः येषां ते—शक्रप्रमुखाः । (स.ब.व्री.)

**प्रसादसुमुखाः**—शोभनं मुखं येषां ते—सुमुखाः, (अव्यय. ब. व्री.) प्रसादेन (कृताः) सुमुखाः—प्रसादसुमुखाः । "तृतीया०" ३।१।६५... (तृ.त.पु.)

**सम्यग्दृशाम्**—सम्यग् दृशौ येषां ते—सम्यग्दृशः, तेषां—सम्यग्दृशाम् । (अव्यय. ब. व्री.)

**सम्मुखाः**—संगतं मुखं येभ्यस्ते—सम्मुखाः । ( प्रादि. ब. व्री )

**वैयावृत्यकराः**—वैयावृत्यं कुर्वन्तीति—वैयावृत्यकराः । " हेतुतच्छीला० " ५।१।१०३....ट, (उप. त. पु.)

**सुरसुरवराः**—सुराश्च असुराश्च—सुरासुराः, (इ.द्व.) सुरासुरेषु वराः—सुरासुरवराः । (स.त.पु.)

**भद्रङ्कराः**—भद्रं कुर्वन्ति—भद्रङ्कराः, तान्—भद्रङ्करान् । "क्षेमप्रियमद्रभद्रात्०" ५।१।१०५...ख, (उप. त. पु.)

## ॥ प्रशस्तिः ॥

( अनुष्टुब्वृत्तम् )

झल्लेशशोभन ! पार्श्व !, शान्ते ! झंझुपुरस्थित !
प्रगल्भन्ती प्रसत्तिस्ते, स्ताज्जाड्यापहा सदा ॥१॥

सिद्धाचलेश ! नाभेय ! भीलडीमण्डनप्रभो !
विघ्नविदारि नित्यं स्यात्, सान्निध्यं सौख्यदायि ते ।२।

नमोऽस्तु भद्रॐकार-गुरवे भवतारिणे ।
सदा येषां सुधामय-दिव्याशिषा कृतिः कृता ॥३॥

नित्याप्रमत्तिवात्सल्य-वाहिनं सद्गुरुद्विकम् ।
प्रेरणापायिनं वन्दे अरविन्दयशोभिधम् ॥४॥

( वसन्ततिलकावृत्तम् )

या चन्द्रभाग्यसुमहायश-ईरिताऽभूत्,
मातागुरोरनुपमोपकृतेः सुरम्या ।
भव्यार्थबोधकजहर्षसुहेमकान्तिः,
दिव्यार्थयेऽत्र सुविदे क्षतयश्च शोध्याः ॥५॥

इति सान्वयार्थसमास-श्रीशोभनमुनिकृतचतुर्विंशिकया सह रम्यपदभञ्जिकोपेतं सान्वयार्थसमासं प्रकीर्णकस्तुतिकुलं समाप्तम् ।

---

॥ अर्हं नमः ॥

# श्रीगुरुस्तुतिः ।

( वसन्ततिलकावृत्तम् )

श्रीदायकं त्वदभिधं प्रणतिस्तु आस्ताम्,
संदर्शनं शंदमलं सुवचश्श्रवेण ।
चैतुल्य ! मोहबलिकस्य गुरो ! प्रणम्य,
कयप्राध्वनायि–गुणगौणमृचामि भक्त्या ॥१॥

चैतुल्य=हणवामां विष्णुसमान, कयप्राध्वनायिन्=आत्माने हित-कारी–सुंदरमार्गने बतावनार, गौण=गुणोनो समूह ।

**અર્થ**:–મોહરૂપી બલિરાક્ષસને હણુવામાં વિષ્ણુસમાન હે ગુરુદેવ! તમારો નમસ્કાર તો દૂર રહો તમારૂં નામ પણ લક્ષ્મીને આપનારૂં છે. ( તમારા ) શ્રેષ્ઠ વચનોનાં શ્રવણુવડે સર્યું સુંદર દર્શન પણ કલ્યાણુને આપનારૂં છે. ( તમને ) પ્રણામ કરીને આત્માને હિતકારી એવા ઉત્તમમાર્ગને વિષે લાવનાર ગુરુદેવનાં ગુણોનાં સમૂહની ભક્તિથી સ્તુતિ કરૂં છું.

क्व मेऽल्पधीः क्व गुणवार्धिरियं प्रवृत्तिः,
रैभूधरस्य करमापिकयोर्ध्वमानां ।
कवल्योऽखिलैस्तदपि भक्तिबलेन वीर्ये,
सूरीन्द्र–कृपात इतिगा स्तुतिर्नु सुज्ञदृत्या ॥२॥

रैभूधर=मेरुपर्वत, करमापिका=फुटपट्टी, कवल्या=हास्यपात्र, इतिगा=संपूर्णताने पामनारी ।

**અર્થ**:–મારી અલ્પબુદ્ધિ કઈ! અને ગુણુસમુદ્રસમાન આપ ક્યાં? ફુટપટ્ટીવડે મેરૂપર્વતની ઊંચાઈ માપવા જેવી આ પ્રવૃત્તિ સર્વવડે હાસ્યપાત્ર છે તો પણ ભક્તિનાં બળથી હું પ્રેરાઈ છું. ખરેખર સૂરિ-દેવની કૃપાથી ( સ્તુતિ ) સંપૂર્ણતાને પામનારી અને વિદ્વાનોવડે આદરણીય થશે.

त्रस्तोत्तरित्वमतितं गुरुसेवया तैः,
धाताग्रिमत्वमभवन् मुनिसंमिलित्याम् ।
रम्यास्यचन्द्र–निसरद् यदिरैन्दवीपाम्,
पङ्क्त्योऽचकोर्यत मुदोच्छ्रुति–भव्यकानाम् ॥३॥

त्रस्तोत्तरित्वम्=હાજર જવાબીપણુ, इरैन्दवीप=वाणीरूपी चांदनीने पीनार

**અર્થ**:-તેઓશ્રીવડે ગુરુદેવની સેવાદ્વારા શીઘ્ર પ્રત્યુત્તરદાયિત્વ પ્રાપ્ત કરાયું હતું. તેઓશ્રી મુનિસંમેલનમાં અગ્રેસરપણાને ધારણ કરનારા થયા...( તેમનાં ) સુંદર મુખરૂપી ચન્દ્રથી નીસરતી જે વાણીરૂપી ચાંદનીને પીનારા હર્ષથી ઊંચા થયા છે કાન જેનાં એવી ભવ્ય-જીવોની શ્રેણીવડે ચકોરી જેવું આચરણ કરાયું હતું.

रत्नप्रम्–सुषम–कङ्कुभिधा सुमाता,
मान्याढ्य–' शाह '–सुकुलीश्वरलाल–तातः ।
राजार्हसंपदमुदुज्झ्य सुदीक्षितो यैः,
ध्यत्युग्रता–सकल–शास्त्र–सुविद् बभूव ॥४॥

ध्यत्युग्रता=बुद्धिनी अतितीक्ष्णता द्वारा ॥

**અર્થ**:-(જેઓશ્રીનાં) રત્નની જન્મદાત્રી સુશીલ "કંકુબેન" નામનાં માતા અને માનવંતા શ્રેષ્ઠી 'શાહ' નામનાં સુંદર કુલવાળા 'ઇશ્વરલાલ' નામના પિતાજી હતા જેઓશ્રીએ રાજાને યોગ્ય સંપત્તિનો ત્યાગ કરીને સારી રીતે દીક્ષા લીધી અને અતિ ધારદાર બુદ્ધિવડે સમસ્ત શાસ્ત્રને સારી રીતે જાણનારા થયાં...

पावित्र्यदेहि–गुरुपाद–निषेवि–तस्मै,
दत्ताश्च भद्रगुरुणाखिलसिद्धयोऽमुतः ॥
श्रीजैनशासनधुरन्धर आत्मकार्यात्,
ॐकारनाम न तु कस्यचनोऽपरस्य ॥५॥

**અર્થ**:-પવિત્ર દેહવાળા એવા ગુરુદેવનાં ચરણની સતત સેવા કરનારા તેમને શ્રીભદ્રસૂરીશ્વરજી મહારાજાવડે સમસ્તસિદ્ધિઓ અપાઈ

હતી અને પોતાના જ કાર્યથી શ્રીજિનશાસનનાં ધુરન્ધર થયા. ખરેખર 'ૐકાર' આવું નામ પણ કોઈ બીજાનું નથી. ( કામથી અદ્વિતીય, નામથી પણ અદ્વિતીય જ હતા....)

कान्त्या विनिर्जितशरच्छशिकाय तस्मै,
रङ्कत्नुपन्यसितवान् निजशैत्यमिन्दुः ।
सूर्यप्रतापोऽपि निजक्षमताप्रभावात्,
रीणः क्षणं स चिरवैरविरोधभावम् ॥६॥

रङ्कन्=दास जेवुं आचरण करतो, शैत्य=शीतलता ।

**અર્થ**:–કાન્તિવડે વિશેષે કરીને પરાજીત કરાયો છે શરદ્ઋતુનો ચંદ્ર જેનાવડે એવાં તે (ગુરુદેવ)ને રાંક જેવું આચરણ કરતા ચંદ્રે પોતાની શીતલતા અર્પણ કરી દીધી સૂર્ય જેવા પ્રતાપવાળા હોવા છતાં પણ તેઓએ પોતાની ક્ષમતાનાં ( કાર્યદક્ષતાનાં ) પ્રભાવથી લાંબાકાલનાં વૈરવિરોધભાવનો ક્ષણમાં જ નાશ કર્યો.

शङ्कारिताऽनुगवदस्य सहायिनी स्वर्म,
गुञ्जीकृतं श्रमणसङ्घसदैक्यनादैः ।
रुष्टं तु दैवमपहरद् गुरुमल्पपुण्यैः,
भ्योम्नो विनाऽर्थं करवाम वयं गुरोः किम् ? ॥७॥

भ्योमन्=भयथी रक्षण करनारा ।

**અર્થ**:–એઓશ્રીને ( ગુરુદેવને ) શાન્તિકરણતા તો અનુચરની જેમ સાથે જ રહેનારી હતી ( જ્યાં પધારે ત્યાં શાંતિ–સંપ કરાવતા હતાં) (પ્રાન્તે તો) શ્રમણસંઘની સુંદર એકતાનાં નાદવડે આકાશને ગુંજીત કર્યું પરંતુ (અમારું) ભાગ્ય રોષિત થયું. ગુરુદેવને હરી લીધા. ખરેખર ભયથી રક્ષણ કરનારા ગુરુદેવ વિના અલ્પપુણ્યવાળા એવા અમે હવે શું કરીશું ?

नन्नामपद्मदलभक्तिसुपुष्पगुच्छम् ,
मोमोच्मि पूज्यपदपङ्कजे आश्रितायाः ।
नन्दिं ददातु विरतिप्रतिपालने मे,
मस्तस्थे ! रम्यकृपयेन् मयि दिव्यदेहिन् ! ॥८॥

नन्नाम=घणा वन्दन, मस्तस्थ=मस्तक उपर रहेल, रम्यकृपयेत्=उत्तम कृपाने करो

**અર્થ**:–આશ્રય કરાયેલી સાધ્વી એવી હું પૂજ્યશ્રીના ચરણ-કમલમાં ઘણી વંદનારૂપી કમલની પાંખડીઓવાળા ભક્તિરૂપી સુંદર-પુષ્પોના ગુચ્છને ઘણા જ ભાવથી મુકું છું. મને સંયમના પરિપાલનમાં આનંદ આપો અને મસ્તક ઉપર રહેલ દિવ્યદેહવાળા એવા હે ગુરુદેવ ! મારા વિષે સુંદર કૃપાને વરસાવો.

સૂચના :– અંક રચના પ્રમાણે અન્વય કરવો...

"श्री संघैक्यकारैक-सूत्रधार–परमाराध्यपाद-श्री ॐकारसूरीश गुरुभ्यो नमोनमः"

इति वर्णपूर्तिका श्रीगुरुस्तुतिः समाप्ता ।

ભરત પ્રિન્ટરી ન્યુ માર્કેટ, પાંજરાપોળ,
ફોન : ૩૮૭૯૬૪ રીલીફ રોડ, અમદાવાદ-૧